NOTE

The edition previous to this was prepared by a committee consisting of :—

1. Mahamahopadhyaya Sitarama Sastri, Lecturer in the Vedas, Calcutta University.

2. Pandit Bhababibhuti Bhattacharyya, Vidyabhushan, M.A., Lecturer in Sanskrit, Bangabasi College, Calcutta, and Editor of the Samaveda, Calcutta Sanskrit Series.

3. Dr. Satkari Mukherjee, M.A., Ph.D., Lecturer in Sanskrit and Philosophy, Calcutta University, now Reader and Head of the Department of Sanskrit.

4. Mr. Rasamaya Bhattacharyya, M.A., Lecturer in Sanskrit, Scottish Church College, Calcutta.

ABBREVIATIONS

A —Ātmanepada
AA —Aitareya Āranyaka
AB —Aitareya Brahmana
Abl —Ablative
Acc —Accusative
acc —according
adj —adjective
A G —Alt indische Grammatik
Aor —Aorist
Āp S S —Āpastamba Srauta Sutra
Arm —Armenian
Ātm —Ātmanepada Ātmanepadin
AU —Aitareya Upanisad
AV —Atharvaveda
Av —Avesta
AVS —Sayana on AV
B I —Bibliotheca Indica
B P —Bhagavata Purana
BD —Brhaddevata
Bh —Bhanuji
B S —Brahma Sutra
BU —Brhadaranyaka Upanisad
BUS —Sankaracarya on Brahma Sūtra
Cf —compare
class —classical
COJ —Calcutta Oriental Journal.
comd —compound
comp —comparative
CU —Chāndogya Upanisad.
D —Durga
Dat —Dative
dec —declension
du —dual
Eng —English
f or fem —feminine.
G , Geld —Geldner
Gaθ or G Av —Gathic Avesta.
Gen —Genitive
Gk —Greek
Germ —German
Goth —Gothic
Ib —Ibid
I C —Indian Culture
I E —Indo European
IHQ —Indian Historical Quarterly
ind —indicative
Ins , Instr —Instrumental
ip or imp —imperfect
ipv or imper —imperative
JAOS —Journal of the American Oriental Society

J N V —Jaiminiya Nyayamala vistara
JUB —Jaiminiya Upanisad Brahmana
KS —Kathaka Samhita
Ksira —Ksirasvamin
KU —Kausitaki Upanisad
Lat —Latin
Lit(h) —Lithuanian
Loc —Locative
m masc —masculine
M —Max Muller's edition of the Rgveda
M M —Max Muller
Mah Nar —Maha Nārayana Upanisad
MS —Maitrayani Samhita
M S —Mimamsa Sutra
MSS —Manuscripts
Mah —Mahidhara
Mbh —Mahabhasya or Mahabharata
Nir —Nirukta
n —noun
n neut —neuter
Nom —Nominative
O Bulg —Old Bulgarian
O E —Old English
Old —Oldenberg
O P —Old Persian
Opt —optative
P —Poona edition of the Rgveda
Pa —Pali
PB —Pañcavimśa Brāhmana
P Par —Parasmaipada
Part —Participle
pass —passive
Pf , perf —perfect
pl —plural
Pp —Padapatha
Pr —Prakrit
pp —pages
pres —present.
P S —Phit Sutra
Ram —Ramayana
RP —Rk pratiśakhya
RV —Rgveda
s sing —singular
S —Sāyana
Ś —Śaṅkaracarya
S B E—Sacred Books East Series
sb subj —subjunctive
ŚB —Śatapatha Brahmi
Śiś —Śiśupalavadha
S K —Siddhanta Kaum
Ś K —Śabdakaustubha
Sk —Skandasvamin
Sk M —Skanda Maheś
Skt —Sanskrit
Sp —Samhitapatha
St —Samhitā text
ST —Stanza
ŚU —Śvetaśvatara Upa
Śira U —Atharvaśira nisad

Subȷ —Subȷunctive.
super —superlative
SV —Sāmaveda.
Śvet —Śvetāśvatara
syl.—syllable.
TA —Taittırıya Āranyaka
TAS —Sāyana on TA.
Ta B —Fandya Brāhmana
TB —Taittirīya Brahmana.
TS.—Taittırıya Samhıtā
TSS —Sāyana on the Taittıriya Samhıtā.
TU.—Taittırıya Upanısad
U.—Upanısat
UC —Uttararamacarıta.
Uȷȷ —Uȷȷvaladatta
V.—Vanı Vılas Press edıtıon
Ved.—Vedıc.
Voc.—Vocatıve
V.G S —Macdonell's Vedıc Grammar for Students
V.M —Venkaṭa Madhava
VP —Vajasaneyı-Prātıśākhya.
V.P —Vışṇu Purāṇa
VS —Vajasaneyı Samhitā
Y Av —Younger Aɪ esta.
YV.—Yajurveda
अनु°—अनुक्रमणी, सर्वानुक्रमणी।
आ° श्रौ°—आश्वलायनश्रौतसूत्रम्।
आ° गृ°—आश्वलायनगृह्यसूत्रम्।
उ°—उणादिसूत्रम्।
ऋ° सं°—ऋग्वेदसंहिता।
ऐ° आ°—ऐतरेयारण्यकम्।
ऐ° ब्रा°—ऐतरेयब्राह्मणम्।
ऐ° उ°—ऐतरेयोपनिषत्।
का°—काशिका।
छा° उ° or छा°—छान्दोग्योपनिषत्।
तै° आ°—तैत्तिरीयारण्यकम्।
तै° ब्रा°—तैत्तिरीयब्राह्मणम्।
तै° सं°—तैत्तिरीयसंहिता।
धा°—धातुपाठ।
नि°—निरुक्तम्।
निघ°—निघण्टु।
नृ° उ°—नृसिंहोपनिषत्।
पा°—पाणिनि।
फि°—फिट्सूत्रम्।
ब्र° सू°—ब्रह्मसूत्रम्।
भा°—महाभाष्यम्।
महा° शा°—महाभारत शान्तिपर्व।
शत° ब्रा°—शतपथब्राह्मणम्।

CONTENTS

PREFACE

This little volume contains pieces from Vedic literature prescribed for the B A Honours Examination in Sanskrit of the Calcutta University for 1945 and subsequent years It is, however, merely a rough draft and not a finished product and as such is not immune from the imperfections inherent in such hasty work Still in the preparation of the notes the needs of the student have constantly been kept in view and a sincere attempt has been made to explain whatever may present any difficulty to the teacher or the student It is just possible that the ordinary student will find too much of comparative philology in these pages and he may skip those portions at first if he feels inclined to do so He must, however, make it a point to have by his side *Macdonell's Vedic Grammar for Students* and if possible, his *Vedic Reader* also (both published by the Oxford University Press) which are indispensable to all beginners of Vedic studies

Śākalya has always been regarded as one of the earliest interpreters of the Ṛgveda and his Padapatha, inspite of its obvious imperfections and limitations, will amply repay careful study The claim of a European scholar that he could have produced a much better Padapatha reminds one of the child on the father's shoulders claiming to be bigger than his father Much greater space has therefore been devoted to the Padapāṭha than is usual in such handbooks

Greater care has also been bestowed on the commentary of Sāyaṇa than in any previous work of this type and practically every single quotation in the commentary on the Ṛgveda portion traced to its source Different readings have been

discussed and new readings adopted in many places Copious extracts have been given from other commentaries and it has been shown in many cases that some of the explanations once thought to be the monopoly of European scholars were in fact, suggested long ago by Indian savants In the case of the Devisukta, so dear to the heart of the Hindu the Editor has composed a new commentary unfolding the peculiar beauty of each word and expression in the hymn

The English translations of many of the passages from the Rgveda quoted in the notes are taken from Griffith and of those from the Atharvaveda from Whitney The Sanskrit explanations of a few viniyoga passages in Sayana s commentary given as *foot notes* are from the pen of the *Editor s guru* Mahamahopadhyaya Pandit Sitarama Sastri of the Calcutta University The Editor takes this opportunity of expressing his indebtedness to these scholars as also to all the other Purvacaryas both Indian and foreign especially to Geldner and Macdonell whose works have been drawn upon for this *volume* The Editor s hand writing is the despair of compositors That the misprints are not more numerous is due to the devotion and skill of Mr Ramkrishna Chakravarti M A Proof Reader in the Calcutta University Press and a former pupil of the Editor

CALCUTTA
23rd October 1944

KSHITISH CHANDRA CHATTERJI

ऋग्वेदः

Hymn No. 1

AGNI

I. 1

मण्डलम् १ सूक्तम् १

मधुच्छन्दा ऋषिः। अग्निर्देवता। गायत्री छन्दः।

1

ॐ अग्निमीळे पुरोहितं	ॐ अग्निम् । ईळे । पुरःऽहितम् ।
यज्ञस्य देवमृत्विजम् ॥	यज्ञस्य । देवम् । ऋत्विजम् ।
होतारं रत्नधातमम् ॥१॥	होतारम् । रत्नऽधातमम् ॥१॥

1 I praise Agni, the household priest (high priest of the sacrifice—S.), the divine ministrant of the sacrifice, (the divine, the Hotr ministrant—S.), the Hotr and the best bestower of wealth.

सायण-भाष्यम्। 'अग्निमीळे' इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम्। स विनियोग[1] आश्वलायनेन चतुर्थाध्यायस्य त्रयोदशे खण्डे सूत्रितः। 'अथा नो अग्न इति षळग्निमीळेऽग्निं दूतम्' [आ॰ श्रौ॰ सू॰ ४।१३।७] इति। तत्र

[1] विनियोगो नाम कर्मभिः सम्बन्धः। तथा चोक्तम्—'कर्मणैव तु कर्मण्य विनियोगः प्रकीर्तितः' इति। स च द्विविधः—सामान्यतो विशेषतश्च। ... ... पाठात्क्रमेणैव ... विनियोग ... । ... एवकारेणाश्वलायनेन प्रदर्शितः। स च द्विविधः—सूक्तविनियोगऋगादिविनियोग एकैकस्य ... विनियोगस्यैव।

हीनपादग्रहणात् सूक्तनिश्चयः, 'सूक्तं[1] सूक्तादौ हीने पादे' [आ० श्रौ० १।१।१८] इति परिभाषितत्वात्। तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ[2]

"तत्राय सूक्तविनियोगः। सोमयागे यस्मिन् दिने सोमस्य रसं निष्काश्य होमः क्रियते तस्मात् सुत्यादिनात् पूर्वस्या रात्रेरपरार्धे पक्षिणामारावात् पूर्वं मन्त्रैः क्रियमाणा स्तुतिः प्रातरनुवाकः, तस्मिन्निदं सूक्तं विनियुज्यते। प्रातरनुवाकेऽग्निरुषा अश्विनौ चेति तिस्रो देवताः स्तूयन्ते। प्रतिदेवतं च गायत्र्यादिसप्तच्छन्दोयुक्ता अनेके मन्त्राः पठनीया भवन्ति। स चायं प्रातर्देवतानां क्रतुशब्देनोच्यते।" अत्र क्रत्वङ्गभूतस्य प्रातरनुवाकस्यावयवे उपचारात् क्रतुशब्दो वर्तते। 'एवमाग्नेय एव आग्नेयः क्रतुः, उषस्य एव उषस्यः क्रतुः, आश्विन एव आश्विनः क्रतुरिति भवति।' एकैकस्मिन् क्रतौ प्रथमं छन्दः परिसमाप्य ततो द्वितीयं ततस्तृतीयमित्येवं क्रमेणानुवक्तव्यम्। 'तत्राग्नेये क्रतौ गायत्रीछन्दोयुक्तमन्त्रपाठप्रसङ्गे अग्निमीळे इति सूक्तं वक्तव्यम्।' अग्रे यथायोग्यं सूक्तविनियोगादिकं परिशिष्टे प्रतिपादयिष्यते।

[1] आश्वलायनेन श्रौतसूत्रस्य प्रथमाध्यायस्य प्रथमे पादे उक्तम्—ऋच पादग्रहणे ॥१७॥ सूक्तं सूक्तादौ हीने पादे ॥१८॥ अधिके तृच सर्वेषु ॥१९॥ इति। याज्यानुवाक्यादिकं विदधानेन ग्रन्थकृता सूक्तादिगतस्य ऋग्विशेषस्य प्रथमपादस्य समुल्लेखे समग्रा ऋक् प्रत्येतव्या, प्रथमपादतो न्यूनस्य ग्रहणे सकलं सूक्तं बोद्धव्यम्, प्रथमपादतोऽधिके गृह्यमाणे तदादिकमृक्त्रयं विज्ञातव्यमिति तदर्थः।

[2] "अत्र सूक्ते प्रथमा 'अग्निमीळे' इत्येषा ऋक् पवमानेष्टौ विनियुज्यते। श्रुतिप्रतिपादितानां दर्शपूर्णमासादीनां कर्मणामनुष्ठाने त्रयोऽग्नयोऽपेक्ष्यन्ते—आहवनीयो गार्हपत्यो दक्षिणश्चेति। ते चाग्नयो वैदिक्या प्रक्रियया समन्त्रकमरणिमन्थनेन निष्पाद्यन्ते। अरणिशब्देन मन्थनोपयुक्तं मन्थनकाष्ठं शमीकाष्ठमुच्यते। तदिदमग्निनिष्पादनम् आधानशब्देनोच्यते। आधानस्य पूर्णाहुत्या समाप्तिः होमेन समाप्तिः, इष्ट्या वा समाप्तिरिति पक्षत्रयम्। तत्रान्तिमे पक्षे तिस्र इष्टयोऽनुष्ठीयन्ते या पवमानेष्टिशब्देनोच्यन्ते याज्ञिकैः। तत्र द्वितीयेष्टौ स्विष्टकृन्नामक कर्मविशेषानुष्ठाने सूक्तगता प्रथमा 'अग्निमीळे' इत्येषा ऋग् याज्यात्वेन विनियुज्यते। यागे प्रधानदेवतोद्देशेन हविषः प्रदानात् परम् उपयुक्तहविःशेषेणाग्न्युद्देशेन क्रियमाणो यागविशेषः स्विष्टकृच्छब्देनोच्यते। हविषः प्रदानावसरे पठ्यमाना मन्त्रा याज्येत्युच्यते। एवञ्चोक्ताया द्वितीय पवमानेष्टौ स्विष्टकृद्यागे हविषो दानावसरे पठनीयेयमृगित्यर्थः।" यद्यपि सूत्रे स्विष्टकृत समुल्लेखो नोपलभ्यते तथापि याज्याशब्दप्रयोगबलात् 'याज्ये इत्युक्ते स्विष्टकृतौ प्रतीयात्' इति परिभाषया सिध्यति। यत्र यत्र याज्यास्थले गौणयाज्याशब्दप्रयोगस्तत्र स्विष्टकृत्सम्बन्धी ग्राह्य इति तदर्थः।

स्विष्टकृतो याज्यात्वेन विनियोग । स च द्वितीयाध्यायस्य प्रथमे खण्डे सूत्रित'— 'साह्वान् विश्वा अभियुजोऽग्निमीळे पुरोहितमिति सयाज्ये' [आ° श्रौ° २।१।२६] इति । तत्र कृत्स्नपादग्रहणादृगित्यवगम्यते, 'ऋच पादग्रहणे' [आ° श्रौ° १।१।१७] इति परिभाषितत्वात् । तथा 'सयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्' [आ° श्रौ° २।१।२१] इति परिभाषितत्वात् स्विष्टकृत्सम्बन्धनिश्चय । तत्रापि द्वितीय[1]मन्त्रत्वेनोदाहृतत्वाद् याज्यात्वम् ।

यद्यपि 'साह्वान्' [ऋ° स° ३।११।६] इत्यनया पुरोनुवाक्ययैव देवताया अनुसरणरूपसंस्कार[2] सिद्धस्तथापि याज्यानुवाक्ययो समुच्चयो द्वादशेऽध्याये चतुर्थपादे मीमांसित —

पुरोनुवाक्यया याज्या विकल्प्या वा समुच्चिता ।
विकल्प्यान्यतरेणैव देवताया प्रकाशनात् ॥*
पुरोवाक्यासमाख्यानाद्वचनाच्च समुच्चय ॥†

[जैमिनीयन्यायमालाविस्तर १२।४।२]

---

[1] सर्वेषामर्धेऽर्धेऽनुवाक्यास्ततो याज्या [आ० श्रौ० १।५।१] इति परिभाषयैति शेष ।

[2] पुरोनुवाक्यया याज्यया च यागगतदेवता स्मार्यते । तादृशेन स्मरणेन कर्मणि कोऽपि गुण आधीयते स संस्कार इति व्यपदिश्यते । तथाविधसंस्कारमन्तरेण कर्म न सिध्यतीति मीमांसकानां सिद्धान्त । यत्र यद्येक एव याग, एकमेवाङ्गकर्म एकैव च देवता तत्रैकेनैव पुरोऽनुवाक्यामन्त्रेण देवताया अनुस्मरणे सिद्धे याज्याया समुच्चारणं सर्वथा पिष्टपेषणकल्पमित्याशङ्क्याह—यद्यपीत्यादि ।

* This is not found in the *Jaiminiyanyayamalavistara* xii 4 2 nor in the com on TS 1 1 14

† This line is printed as prose in M and P which read पुरोनुवाक्या for पुरोवाक्या As the former contains a hypermetrical syllable and as the latter is mentioned as a variant in the N S Press edition of the *Jaiminiyanyayamalavistara* and as the connexion is very close between पुरोवाक्या and प्रवाद we have adopted पुरोवाक्या No doubt hypermetrical syllables are sometimes met with in *Karikas* specially when some rebellious name

देवताप्रकाशनकार्यस्यैकत्वाद् युग्मयोर्यथा विकल्पस्तथैवैकयुग्मगतयोरिति* चेत्, मैवम्, पुरोनुवाक्येतिसमाख्याया उत्तरकालीनयाज्यामन्तरेणानुपपत्तेः। किञ्च, 'पुरोनुवाक्यामनूच्य याज्यया जुहोति' [तै० सं० ३।१।१०।४] इति प्रत्यक्षवचनेन देवतोपलक्षणहविष्प्रदानकार्ये भेदोक्तिपुरःसरं साहित्यं विधीयते। तस्मात् समुच्चय इति।

एतच्च 'अग्निम्' इत्यादि सूक्तं नवर्चम्, 'अग्निं नव मधुच्छन्दा वैश्वामित्रः' इत्यनुक्रमणिकायामुक्तत्वात्।[2] विश्वामित्र-पुत्रो मधुच्छन्दोनामकस्तस्य सूक्तस्य द्रष्टृत्वात्

---

does not lend itself to the requirements of the metre, still the shortening of the name for the purposes of the metre is much more common The J N V and the comm on TS read पुरेवात (पुरा इव आत, the first alternative as in the previous case) which makes very good sense since they do not read the previous line at all but with विकल्पा in the 2nd line पुरेवात becomes meaningless

[1] 'ऐन्द्राबार्हस्पत्ये द्वे याज्यानुवाक्यायुगले समाम्नाते—'इदं वामास्ये हविः' [ऋ० सं० ४।४९।१] 'अयं वां परि षिच्यते' [ऋ० सं० ४।४९।२] इत्येकं युगलम् 'अस्मे इन्द्राबृहस्पती' [ऋ० सं० ४।४९।४] 'बृहस्पतिर्नः परि पातु' [ऋ० सं० १०।४२।११] इत्यपरम्। तत्र समुच्चयविकल्पसंशये यथा याज्यापुरोनुवाक्ययोः सत्यपि देवतोपलक्षणार्थत्वेनैकार्थत्वे नित्यः समुच्चयः, तथा युगलयोरपि स्यात् अविशेषात् इति प्राप्ते उच्यते—विकल्प एकार्थत्वादिति। याज्यापुरोनुवाक्ययोस्तु पुरोनुवाक्यासमाख्याबलाद्याज्याप्राप्तविकल्पबाधेन समुच्चय इति विशेषः।' शास्त्रदीपिका। 'पुरः पूर्वम् अनूच्यत इति समाख्या समानजातीययाज्यापेक्षया पूर्वभावं विना न सम्भवतीति तद्बलात् समुच्चयः।'

* Most editions read एकयुग्मयो Jaiminiyanyayamalavistara, several of M M 's MSS and Sayana [redacted] commentary on TS, however, show clearly that the correct reading is एकयुग्मगतयो

[2] तृतीयमण्डलगतमन्त्राणां द्रष्टुर्महर्षेर्विश्वामित्रस्यैकशतं पुत्रा आसन्। तेषु च पञ्चाशज्ज्यायांसो मधुच्छन्दसः पञ्चाशच्च कनीयांसः। 'यद्वत्सा, युवं ज्ञेयाः, मया पुत्रकेन परिगृह्यते, [redacted] एव पुत्राणां ज्येष्ठत्वेनावतिष्ठताम्' इति पित्राभ्यर्थितास्ते ज्यायांसो नाभ्यनन्दन्। मधुच्छन्दास्तु पञ्चाशता कनीयोभिः सार्धं पितुर्वचनं बहुमन्यतेत्यैतरेयब्राह्मणे प्रपञ्चितम्। नामनिर्वचनमैतरेयारण्यके [१।१।३] समाम्नातम्—मधु ह स्म वा ऋषिभ्यो मधुच्छन्दाश्छन्दति, तन्मधुच्छन्दसो मधुच्छन्दस्त्वम् इति।

तदीय ऋषिः। 'ऋष गतौ'[1] [धा० ६।७] इति धातुः। 'सर्वधातुभ्य इन्' [उ० ४।११७]। 'इगुपधात् कित्' [उ० ४।११९]। वेदमाप्त्यर्थं तपोऽनुतिष्ठतः पुरुषान् स्वयम्भूर्वेदपुरुषः प्राप्नोत्। तथा च श्रूयते—'अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्, त ऋषयोऽभवन्'[2] [तै० आ० २।९।१] इति। यथातीन्द्रियस्य वेदस्य परमेश्वरानुग्रहेण प्रथमतो दर्शनादृषित्वमित्यभिप्रेत्य स्मर्यते—

'युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा॥' [महा० शा० २१०।१९]

इति। ऋष्यादिज्ञानाभावे प्रत्यवायः स्मर्यते—

'अविदित्वा ऋषिं छन्दो दैवतं[3] योगमेव च।
योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥' [बृहद्देवता ८।१३६]

[1] The Dhatupatha, however, reads ऋषी गतौ As the *Balamanorama* also shows ऋष we have retained it The comm on TA says ऋषित्वलक्षणविषयलाभादृषयोऽभवन् where ऋषि is formed with इन् for धातुनिर्देश Sayana, however, quotes the root correctly under RV. 1. 81 1, iii 30 9, etc Durga's Ganapatha also shows ऋषी and the comm *Manorama* says distinctly तुदेरनुबन्धोऽयं स्वरादिर्भवेत्स्यात्

• Printed editions read तदृषय where ह is evidently taken from the next sentence तदृषीणामृषित्वम्

* ['कल्पादाविव ब्राह्मणा सृष्टा न प्रलयादाविव कल्पमध्ये पुन पुनर्नोत्पन्ना इति'] 'अजा नित्या। पृश्नय' शुक्ला शुद्धा इति यावत्। तान् तपस्यमानान् तपश्चरत स्वयम्भु अनादि ब्रह्म वेद, अभ्यानर्षत्। ऋष गतौ। आभिमुख्येन प्राप्नोत्। त वेदस्यार्षणाद् ऋषिशब्दवाच्या अभवन्निति वेदभाष्यम्।' *Balamanorama* on S K 1117

† "सर्गादिसमये वेदान्" इति कौमुदीव्याख्यानान्मनोरमाधृत. पाठः।

[3] 'यस्य वाक्यं स ऋषिः। या तेनोच्यते सा देवता। यदक्षरपरिमाणं तच्छन्दः।' [अनु० २।४-६]। योगः विनियोगः।

'ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं[1] स्वराद्यपि ।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते ॥'

इति । वेदनविधिश्च स्मर्यते—

'स्वरो वर्णोऽक्षरं मात्रा विनियोगोऽर्थ[2] एव च ।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥'[3] इति ।

अग्निमित्यादिसूक्तस्य च्छन्दोऽनुक्रमणिकायां यद्यप्यस्य नोक्तं तथापि परिभाषायामेवमुक्तम्—'आदौ गायत्रं प्राग्धिरण्यस्तूपात्'[4] [अनु० १२।१४] इति । हिरण्यस्तूप ऋषिर्येषां मन्त्राणां वक्ष्यते ततः प्राचीनेषु मन्त्रेषु सामान्येन गायत्रं

---

[1] ब्राह्मणार्थम् appears to be a समाहार द्वन्द्व like योगार्थम् and means the *Brahmanas* laying down the विनियोग and the signification, *cf.* मन्त्राणां दैवतं छन्दो निरुक्तं ब्राह्मणानृषीन् । कृत्तद्धितादीन्याज्ञात्वा यजन्तो यागकण्टका. ॥ and the variant दैवं योगार्थमेव च for दैवतं योगमेव च

[2] Uvata (comm on R P) reads दैवं योगार्थमेव च

[3] These three stanzas are taken from Sadgurusisya's commentary on Katyayana's *Sarvānukramani* (1 2) which reads अविदित्व for अविदित्वा in the first stanza

[4] M M notes the reading हैरण्यस्तूपात् in some of his MSS Macdonell adopts the obviously vicious reading हैरण्यस्तूपीयात् in his text of the *Sarvanukramani* and mentions हिरण्यस्तूपात् as the reading in several MSS Sadgurusisya explains the formation of गायत्रम् but is silent about हिरण्यस्तूपीय which seems to show that he reads हिरण्यस्तूपात् though a few lines later he appears to quote the rule with हैरण्यस्तूपीयात् The previous rule मण्डलादिष्वार्षेयमैन्द्रात् does not help us much as the hymns are called आर्षेय, ऐन्द्र, etc. in the *Anukramani* but in the case of the seers no *taddhita* suffix is used. The *paribhasa* [illegible] (अनुक्रमणी viii 1), however, clearly shows that the author merely names the seer without any तद्धित suffix It may be mentioned in this connexion that in the comm on 1 12 S quotes the rule as प्राग्धिरण्यस्तूपात् and there is no variant

छन्द इत्यर्थः। पुरुषस्य पापसम्बन्धं वारयितुमाच्छादकत्वाच्छन्द इत्युच्यते। तच्चारण्यकाण्डे समाम्नायते—'छादयन्ति ह वा एनं छन्दांसि पापात् कर्मणः' [ए० आ० २।१।६] इति। अथवा चीयमानाग्निसन्तापस्याच्छादकत्वाच्छन्दः। तच्च तैत्तिरीया आमनन्ति—'प्रजापतिरग्निमचिनुत। स क्षुरपवि[1]र्भूत्वातिष्ठत्। तं देवा बिभ्यतो नोपायन्। ते छन्दोभिरात्मानं छादयित्वोपायन्। तच्छन्दसां छन्दस्त्वम्' [तै० स० ५।६।६।१] इति। यद्वा अपमृत्युं वारयितुमाच्छादयतीति छन्दः। तदपि छान्दोग्योपनिषद्याम्नातम्—'देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशन्, ते छन्दोभिरात्मानमाच्छादयन्, यदेभिराच्छादयंस्तच्छन्दसां छन्दस्त्वम्' [छा० उ० १।४।२] इति। तथा द्योतनार्थ-दीव्यति-धातुनिमित्तो देवशब्द इत्येतदाम्नायते—'दिवा वै नोऽभूदिति तद्देवानां देवत्वम्'[2] [तै० ब्रा० २।२।९।९] इति। अतो दीव्यतीति देवः, मन्त्रेण द्योत्यत इत्यर्थः। अस्मिन् सूक्ते स्तूयमानत्वादग्निर्देवः। तथा चानुक्रमणिकायामुक्तम्—'मण्डलादिष्वाग्नेयमैन्द्रात्' [अनु० १२।१२] इति। तस्य सूक्तस्य प्रथमामृचं भगवान् वेदपुरुष आह—

अग्निमीळ इति। अग्निनामकं देवम् ईळे स्तौमि। 'ईड स्तुतौ' [धा° २।९] इति धातुः। डकारस्य ळकारो बह्वृचाध्येतृसम्प्रदायप्राप्तः। तथा च पठ्यते—

'अज्मध्यस्थडकारस्य ळकारं बह्वृचा जगुः।
अज्मध्यस्थ-ढकारस्य ळ्हकारं वै यथाक्रमम् ॥'[3]

इति। मन्त्रस्य होतृप्रयोज्यत्वादहं होता स्तौमीति लभ्यते। कीदृशमग्निम्? यज्ञस्य पुरोहितम्। यथा राज्ञः पुरोहितस्तदभीष्टं सम्पादयति तथाग्निरपि

---

[1] क्षुरधारासमाना धारा यस्य वज्रस्य स क्षुरपविः। तथाविधवज्रवद्दुराप इत्यर्थः। S.

[2] देवानामुत्पादिका या प्रजापतेस्तनूः सेयमहोरूपेण निष्पन्ना। अतो देवा इदानीं 'अस्माकं दिवैवाभूत्' इत्युक्तवन्तः। अतो दिवायोगेन देवत्वं सम्पन्नम्। S

[3] This stanza is from Sadguruśiṣya's commentary on Kātyāyana's *Sarvānukramaṇī* on RV i 28 The third line gives examples ईळे मळ्ह पुरोळाश इळा ळ्हा साळ्हा निदर्शनम् The text in Macdonell's edition has to be corrected

यज्ञस्यापेक्षितं होमं सम्पादयति। यद्वा, यज्ञस्य सम्बन्धिनि पूर्वभागे आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? देवम् दानादिगुणयुक्तम्। पुनः कीदृशम्? होतारम् ऋत्विजम्। देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव। तथा च श्रूयते— अग्निर्वै देवानां होता' [ऐ० ब्रा० १।२।३] इति। पुनरपि कीदृशम्? रत्नधातमम् यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा।

[1]अत्राग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति [नि० ७।१४]—"अथातोऽनुक्रमिष्यामः। अग्निः पृथिवीस्थानः, तं प्रथमं व्याख्यास्यामः'। अग्निः कस्मात्? अग्रणीर्भवति। अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः। अक्नोपनो भवतीति स्थौलाष्ठीविः', न क्नोपयति न स्नेहयति। त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः— इताद् अक्ताद् दग्धाद् वा नीतात्, स खल्वेतेरकारमादत्ते, गकारमनक्तेर्वा दहतेर्वा, नीः परः। तस्यैषा भवति—'अग्निमीळे'" इति। अस्यायमर्थः—सामान्येन सर्वदेवतानां लक्षणस्याभिहितत्वाद् अनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकाङ्क्षितम् अतोऽनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते। कस्मात् प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत इति प्रश्नस्य 'अग्रणी'रित्यादिकमुत्तरम्। देवसेनामग्रे स्वयं नयतीत्यग्रणीः। एतदेवमग्निशब्दस्य प्रवृत्तिनिमित्तम्। तथा च ब्राह्मणान्तरम्—'अग्निर्वै देवानां सेनानी'[a] इति। एतदेवाभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे[b] आमनन्ति—'अग्निर्मुखं प्रथमो देवतानाम्'[3] [ऐ० ब्रा० १।४] इति मन्त्रः। 'अग्निर्वै देवानामवम:' [ऐ० ब्रा० १।१] इति ब्राह्मणम्। तथा तैत्तिरीयाश्चामनन्ति—'अग्निरग्रे प्रथमो

---

[1] *Cf* S. under AV III 1 1.

[a] Quoted by Durgacārya in his commentary on Nir VII 14 4 with वै, by Skanda Mahesvara in the form अग्निर्देवतानां सेनानी S. quotes the passage again under AV III 1 1 As Sayana generally follows Durga we have added a वै after अग्नि here Printed editions of RV and AV drop the particle वै

[b] M reads मन्त्रब्राह्मण, but मन्त्रब्राह्मणे being a dual ending in ए, sandhi is barred *Cf* I. 66 7 ऋग्विदर्थे यास्केन मन्त्रब्राह्मणे दर्शिते।

[3] This is not found in RV, but is mentioned in the *Aitareya Brahmana*, *Āśvalayana Srautasutra* and *Kathaka Samhita*

देवतानाम्' [तै० ब्रा० २।४।३।३]। 'अग्निरवमो देवतानाम्' [तै० स० ५।५।१।४] इति च। वाजसनेयिनश्चैवमामनन्ति—'स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नाम'[1] इति। यज्ञेष्वग्निहोत्रदर्शपूर्णमासपशुसोमरूपेष्वग्रं पूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयत इति द्वितीयं प्रवृत्तिनिमित्तम्। सन्नममानः सम्यक् स्वयमेव[2] प्रह्वीभवन्नङ्गं स्वकीयं शरीरं नयति काष्ठदाहे हविष्पाके च प्रेरयतीति तृतीयं प्रवृत्तिनिमित्तम्। स्थौलाष्ठीवि-नामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चिदक्नोपन इत्यग्निशब्दं निर्वक्ति—तस्य न क्नोपयति न स्नेहयति, किन्तु काष्ठादिकं रूक्षयतीत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्रयादग्निशब्दनिष्पत्तिं मन्यते[3]। इतः 'इण् गतौ' [धा० २।३४] इति धातुः। अक्तः 'अञ्जू व्यक्ति-म्रक्षण-कान्ति-गतिषु' [धा० ७।१] इति धातुः। दग्धः 'दह भस्मीकरणे' [धा० १।९७१] इति धातुः। नीतः 'णीञ् प्रापणे' [धा० १।८८५] इति धातुः। अग्निशब्दो ह्यकार-गकार-नि-शब्दानपेक्षमाण एति-धातोरयनशब्दादकारमादत्ते अनक्ति-धातुगतस्य ककारस्य गकारादेशं कृत्वा

---

[1] *Cf* SB II 2 4 2 स वा एनमेतदग्रे देवानामजनयत तस्मादग्निः। अग्निर्ह वै नामैतद् यदग्निरिति। SB VI 1 1 11 स यदस्य सर्वस्याग्रमसृज्यत तस्मादग्निः। अग्निर्ह वै तमग्निरित्याचक्षते परोक्षम् परोक्षकामा हि वै देवाः। Sayana is evidently quoting here from the Kanva recension

[2] This shows that सन्नममान is in the कर्मकर्तृवाच्य

[3] These derivations may appear strange, but we must not forget that they were suggested more than 2500 years ago In Europe even the other day the Greek word *bathos* 'depth' or 'height' was *derived from ba* (गम्) to go' *the* (धा) to make' and *es* (अस्) to be and the Greek verbal form *luthesomai* (1st sing future formed from the passive stem in *then* of *lu* to loose) was analysed into (1) the root *lu* to loose,' (2) *th* the relic of *the* of *tithemi* (दधामि) (3) *ē* representing *ja* 'to go' found in *eimi* (एमि), (4) *so* from *esomai*, the substantive verb (5) *mai* representing an oblique case of the pronoun of the 1st person (6) and the whole signifying 'there will be (*so*) a going (*e*) to make (*th*) me (*mai*) loose (*lu*)'

तमादत्ते, यद्वा दहति-धातुजन्याद् दग्ध-शब्दाद् गकारमादत्ते। नीरिति नयति-धातु', स च ह्रस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलित्वाग्नि-शब्दो भवति। यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति—काष्ठदाहे हविष्पाके च प्रेरयतीति समुदायार्थः। तस्याग्नि-शब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिप्रदर्शनार्थैषा 'अग्निमीळे' इत्यृग् भवतीति।

तामेतामृचं यास्क एवं व्याख्यातवान्—'अग्निमीळेऽग्निं याचामि ईळिरध्येषणाकर्मा पूजाकर्मा वा। पुरोहितो व्याख्यातः। यज्ञस्य*, देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा[1]। यो देवः सा देवता। होतारं ह्वातारम्। जुहोतेर्होतेत्यौर्णवाभः। रत्नधातमम् रमणीयानां धनानां दातृतमम्' [नि० ७।१५] इति। अस्यायमर्थः—ईडति-धातोः† स्तुत्यर्थत्वं प्रसिद्धम्। 'धातूनामनेकार्थत्वम्' इति न्यायमाश्रित्य याच्ञाध्येषणापूजा अप्यत्रोचितत्वात्तदर्थतया व्याख्याताः। पुरोहितशब्दो द्वितीयेऽध्याये [नि० २।१२]—'यद्देवापिः शन्तनवे पुरोहित' [ऋ० सं० १०।९८।७] इत्येतामृचमुदाहृत्य 'पुर एनं दधति' इति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन 'पुर एनं दधते' [तै० सं० २।१।२।१] इत्यामनन्ति। देवशब्दो दान दीपन-द्योतनानामन्यतममर्थमाचष्टे।

---

[1] Patañjali (v 1 59) adds another meaning दिवेरैश्वर्यकर्मणो देव

* Both Durga and Skanda Mahesvara, however, read 'यज्ञस्य,' meaning यज्ञस्य व्याख्यात, the word यज्ञ having been explained in III 19

† Printed editions read ईडतिधातो where ईडति [illegible] grammatically indefensible With इक् we should say 'ईडि and with श्तिप्, ईडि,' and in both cases धातु will be superfluous, though the commentator uses expressions like चनक्ति धातु, दहति धातु etc There is hardly any doubt that the भाष्यकार wrote ईडधातो which is strictly correct. Yāska says ईळि and Patañjali writes ईडि स्तुतिचोदनायाच्ञासु दृष्टः प्रेरणे चापि वर्तते। अग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्च्यावयन्तीति। (Mbh I 3 1) In the commentary on AV we often find the correct form चष्टे instead of the incorrect form चष्टति Similarly, under RV. III 27. 1 जिगाति is the correct reading and not याति

* "निपातायोप— —र्थयेति नै— अनेकार्थो,

यज्ञस्य दाता दीपयिता द्योतयितायमग्निरित्युक्तं भवति। दीपन-द्योतनयोरेकार्थत्वे-ऽप्यस्ति धातुभेदः। यद्यप्यग्निः[1] पृथिवीस्थानस्तथापि देवान् प्रति हविर्वहनाद्द्युस्थानो भवति। देवशब्द-देवताशब्दयोः पर्यायत्वान्मन्त्रप्रतिपाद्या काचिदग्निव्यतिरिक्ता देवता नान्वेषणीया। होतृ-शब्दस्य ह्वयतिधातोरुत्पन्नत्वेन देवानामाह्वातारमिति। और्णवाभनामकस्तु मुनिः जुहोति-धातोरुत्पन्नो होतृशब्द इति मन्यते। अग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यम्। रत्न-शब्दो द्वितीयाध्याये मघमित्यादिष्वष्टाविंशतौ धननामसु पठितः [निघ० २।१०]। रमणीयत्वाद्रत्नत्वम्। दधाति-धातुर[2]त्र दानार्थ[2]वाचीति[3]। तदिदं निरुक्तकारस्य यास्कस्य मन्त्रव्याख्यानम्।

अथ व्याकरण-प्रक्रियोच्यते। अगि-धातोर्गत्यर्थात्[4] [धा० ५।३८] 'अङ्गेर्नलोपश्च' [उ० ४।५०] इत्यौणादिकसूत्रेण नि-प्रत्ययः[†]। इदित्त्वान्नुमागमेन[5] प्राप्तस्य नकारस्य लोपश्च भवति। अङ्गति स्वर्गं[*] गच्छति हविर्नेतुमित्यग्निः। तत्र 'धातोः' [६।१।१६२] इत्यकार उदात्तः। 'आद्युदात्तश्च' [३।१।३] इति प्रत्ययगत इकारोऽप्युदात्तः। 'अनुदात्तं पदमेकवर्जम्' [६।१।१५८] इति द्वयोरन्यतरमुदात्तमवशेष्येतरस्यानुदात्तत्वं प्राप्तम्। तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवशिष्यते। 'सति शिष्टस्वरो बलीयान्' [(?) ६।१।१५८।९] इति हि न्यायः। ततोऽन्तोदात्तमग्निप्रातिपदिकम्। 'अनुदात्तौ सुप्पितौ' [३।१।४] इत्यमित्येतद्द्वितीयैकवचनमनुदात्तम्। तस्य 'अमि पूर्वः' [६।१।१०७] इति यत् पूर्वरूपं तदुदात्तम्, 'एकादेश उदात्तेनोदात्तः' [८।२।५] इति सूत्रितत्वात्। अग्निशब्दो धातुजन्मेति मते सेयं प्रक्रिया सर्वापि द्रष्टव्या।

मतद्वयं यास्केन प्रदर्शितम्। 'नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च। न सर्वाणीति गार्ग्यो वैयाकरणानां चैके' [नि० १।१२] इति।

---

[1] The reference is to Nirukta vii 5 2: अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः।

[*] वहन् is a very good variant   [†] See p 30.

[2] Both धातु and अर्थ are superfluous   [3] धन्दानमदं. (p 10) ... इति।

[4] 'रख रखि ... रगि लगि अगि वगि ... गत्यर्थाः' [धा० १।१२१-१२२]।

[5] 'नेड्वशि कृति' [पा० ७।२।८] इतीट्-प्रतिषेधः।   [6] इदितो नुम् धातोः [पा० ७।१।५८]।

तमादत्ते, यद्वा दहति-धातुजन्याद् दग्ध-शब्दाद् गकारमादत्ते। नीरिति नयति-धातुः, स च ह्रस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलित्वाग्नि-शब्दो भवति। यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति—काष्ठदाहे हविष्पाके च प्रेरयतीति समुदायार्थः। तस्याग्नि-शब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिप्रदर्शनायैषा 'अग्निमीळे' इत्यृग् भवतीति।

तामेतामृचं यास्क एवं व्याख्यातवान्—'अग्निमीळेऽग्निं याचामि ईळिरध्येषणाकर्मा पूजाकर्मा वा। पुरोहितो व्याख्यातः। यज्ञस्य* देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा[1]। यो देवः सा देवता। होतारं ह्वातारम्। जुहोतेर्होतेत्यौर्णवाभः। रत्नधातमम् रमणीयानां धनानां दातृतमम्' [नि० ७।१५] इति। अस्यायमर्थः—ईळति-धातोः† स्तुत्यर्थत्वं प्रसिद्धम्। 'धातूनामनेकार्थ त्वम्' इति न्यायमाश्रित्य याच्ञाध्येषणापूजा अप्यत्रोचितत्वात्तदर्थतया व्याख्याताः। पुरोहितशब्दो द्वितीयेऽध्याये [नि० २।१२]—'यद्देवापिः शन्तनवे पुरोहितः' [ऋ० सं० १०।९८।७] इत्येतामृचमुदाहृत्य 'पुर एनं दधति' इति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन 'पुर एनं दधते' [तै० सं० २।१।२।१] इत्यामनन्ति। देवशब्दो दान-दीपन-द्योतनानामन्यतममर्थमाचष्टे।

[1] Patañjali (v 1 59) adds another meaning: दिवेरैश्वर्यकर्मणो देवः.

* Both Durga and Skanda Maheśvara, however, read 'यज्ञस्य,' meaning यज्ञस्य व्याख्यातः, the word यज्ञ having been explained in III. 19

† Printed editions read ईळतिधातो where ईळति is grammatically indefensible. With इक् we should say 'ईळि' and with श्तिप् 'ईळि,' and in both cases धातु will be superfluous, though the commentator uses expressions like वर्तति धातु, दहति धातु etc. There is hardly any doubt that the भाष्यकार wrote ईडधातोः which is strictly correct. Yāska says ईळि and Patañjali writes· ईडि, स्तुतिचोदनायाच्ञासु दृष्टः प्रेरणे चापि वर्तते। न चैवं कश्चिदृत्विग्भीडे भवतीऽनुमयाचयस्मीति। (Mbh i 3. 1). In the commentary on AV. we often find the correct form वर्ति instead of the incorrect form वर्तति Similarly, under RV. III. 27. 1 जिगाति: = the correct reading and not गाति..

² "निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रय ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥"

यज्ञस्य दाता दीपयिता द्योतयितायमग्निरित्युक्तं भवति। दीपन-द्योतनयोरेकार्थ[2]त्वेऽप्यस्ति धातुभेदः। यद्यप्यग्निः[1] पृथिवीस्थानस्तथापि देवान् प्रति हविर्वहनाद् द्युस्थानो भवति। देवशब्द-देवताशब्दयोः पर्यायत्वान्मन्त्रप्रतिपाद्या काचिदग्निव्यतिरिक्ता देवता नान्वेषणीया। होतृ शब्दस्य ह्वयतिधातोरुत्पन्नत्वेन देवानामाह्वातारमिति। और्णवाभनामकस्तु मुनिः जुहोति-धातोरुत्पन्नो होतृशब्द इति मन्यते। अग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यम्। रत्न-शब्दो द्वितीयाध्याये मघमित्यादिष्वष्टाविंशतौ धननामसु पठितः [निघ० २।१०]। रमणीयत्वाद्रत्नत्वम्। दधाति-धातुर[2]त्र दानार्थ वाचीति[3]। तदिदं निरुक्तकारस्य यास्कस्य मन्त्रव्याख्यानम्।

अथ व्याकरण-प्रक्रियोच्यते। अगि-धातोर्गत्यर्थात्[4] [धा० ५।३८] 'अङ्गेर्नलोपश्च' [उ० ४।५०] इत्यौणादिकसूत्रेण नि-प्रत्ययः। इदित्वान्नुमागमेन[5] प्राप्तस्य नकारस्य लोपश्च भवति। अङ्गति स्वर्गं[1] गच्छति हविर्नेतुमित्यग्निः। तत्र 'धातोः' [६।१।१६२] इत्यकार उदात्तः। 'आद्युदात्तश्च' [३।१।३] इति प्रत्ययगत इकारोऽप्युदात्तः। 'अनुदात्तं पदमेकवर्जम्' [६।१।१५८] इति द्वयोरन्यतरमुदात्तमवशिष्येतरस्यानुदात्तत्वं प्राप्तम्। तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवशिष्यते। 'सति शिष्टस्वरो बलीयान्' [८। ६।१।१५८।९] इति हि न्यायः। ततोऽन्तोदात्तमग्निप्रातिपदिकम्। 'अनुदात्तौ सुप्पितौ' [३।१।४] इत्यमित्येतद्द्वितीयैकवचनमनुदात्तम्। तस्य 'अमि पूर्वः' [६।१।१०७] इति यत् पूर्वरूपं तदुदात्तम्, 'एकादेश उदात्तेनोदात्तः' [८।२।५] इति सूत्रितत्वात्। अग्निशब्दो धातुजन्मेति मते सेयं प्रक्रिया सर्वापि द्रष्टव्या।

मतद्वयं यास्केन प्रदर्शितम्। 'नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च। न सर्वाणीति गार्ग्यो वैयाकरणानां चैके' [नि० १।१२] इति।

---

[1] The reference is to *Nirukta* vii 5 2· अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः।

[2] वहन् is a very good variant　　[1] See p 50

[3] Both धातु and अर्थ are superfluous　　[3] वचनार्थं (p 10) इति।

[4] उख उखि ... वखि वखि ... ग्यर्थाः' [धा० १।१४४।१४२]।

[5] 'नेदित[?] इति' [पा० ७।१।५८] इत्यनेन प्रतिषेधः।　　[6] 'इदितो नुम् धातोः' [पा० ७।१।५८]।

गार्ग्यस्य मतेऽग्निशब्दस्याखण्डप्रातिपदिकत्वात् 'फिषोऽन्त उदात्तः' [फि० सू० १।१] इत्यन्तोदात्तत्वम्। पूर्वोक्तेष्वग्रणीरित्यादिनिर्वचनेषु प्रकृतिप्रत्ययाद्यशेषप्रक्रिया यथोचितं कल्पनीया। एतदेवाभिप्रेत्य यास्क आह। 'अथ निर्वचनम्। तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयात्। अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येन। अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्, न त्वेव न निर्ब्रूयात्।' [नि० २।१] इति। अस्यायमर्थः—तत् तत्र निर्वचनीयपदसमूहमध्ये येष्वग्न्यादिपदेषु पूर्वोक्तरीत्या स्वरसंस्कारौ समर्थौ व्याकरणसिद्धौ स्याताम्। स्वर उदात्तादिः। संस्कारो नि-प्रत्ययादिः। किञ्च तौ स्वरसंस्कारौ प्रादेशिकेन गुणेनान्वितौ स्याताम्। शब्दस्यैकदेशः पूर्वोक्तोऽगिधातुः प्रदेशः। तत्र भवो गुणो गतिरूपोऽर्थः। तेनान्वितौ। तान्यग्न्यादिपदानि तथा व्याकरणानुसारेण निर्ब्रूयात्। तच्च निर्वचनमस्माभिः प्रदर्शितम्। अथ पूर्वोक्तवैलक्षण्येन कश्चित् स्वेन विवक्षितोऽर्थो नान्वितस्तस्मिञ्छब्देऽनुगतो न भवेत्, तस्यैव व्याख्यानम्—अप्रादेशिके विकार इति। अग्रनयनादिरूपः क्रियाविशेषो विकारः। स च प्रदेशेनाग्निशब्दैकदेशेनात्र नाभिधीयत इत्यप्रादेशिकः। एवं सति यः पुमान् अर्थनित्यः स्वविवक्षितेऽर्थे नियतो निर्बन्धवान्। ब्राह्मणानुसारेण वा देवतान्तरविशेषणत्वेन योजयितुं वा स निर्बन्धः। तदानीं स पुमान् केनचिद्वृत्तिसामान्येन स्वविवक्षितमर्थं परीक्षेत तस्मिञ्छब्दे योजयेत्। वृत्तिः क्रिया, तद्रूपेण सामान्यं सादृश्यम्। अस्माभिश्चाग्रनयनादिरूपं क्रियात्वसामान्यमुपजीव्याग्रणीत्याद्यर्थो योजितः। तदिदं यास्काभिमतं निर्वचनम्। स्थौलाष्ठीविरक्षरसाम्यान्निर्वक्ति। अक्नोपनशब्दस्यादौ *निषेधार्थमकाररूपमक्षरं विद्यते। अग्निशब्दस्याप्यादावकारोऽस्ति। तदिदमक्षरसाम्यम्। शाकपूणिस्तु वर्णसाम्यान्निर्ब्रूते। दग्धशब्दाग्निशब्दयोर्गकाररूपवर्णेन† साम्यम्। सर्वथापि निर्वचनं न त्याज्यमिति।

---

* S. probably wrote निषेधार्थकम्

† गकारवर्णेन M.P.

ईळे इत्येतत् पदं कृत्स्नमप्यनुदात्तम्, 'तिङ्ङतिङः' [८।१।२८] इत्यतिङन्तादग्निशब्दात् परस्य 'ईळे' इत्यस्य तिङन्तस्य निघातविधानात्। पद-द्वयसंहिताकाले ईकारस्य धातुगतस्य 'उदात्तादनुदात्तस्य स्वरितः' [८।४।६६] इति स्वरितत्वम्। तस्मादूर्ध्वंभाविन एकारस्य तिङ्प्रत्ययरूपस्य 'स्वरितात् संहितायामनुदात्तानाम्' [१।२।३९] इत्यैकश्रुत्यं प्रचयनामकं भवति। पुरः-शब्दोऽन्तोदात्तः, 'अयं पुरो भुवः'* [तै० सं० ४।३।२।१] इत्यत्र तथैवाम्नातत्वात्। 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' [५।३।३९] इति पूर्वशब्दादस्प्रत्ययः पुरादेशश्च। ततोऽत्र प्रत्ययस्वरः।[1] धाञो निष्ठायां 'दधातेर्हिः' [७।४।४२] इत्यादेशे सति प्रत्ययस्वरेणान्तोदात्तो हितशब्दः। तत्र समासान्तोदात्तत्वे प्राप्ते तदपवादत्वेन 'तत्पुरुषे तुल्यार्थ°' [६।२।२] इत्यादिनाव्ययपूर्वपदप्रकृतिस्वरत्वम्। यद्वा 'पुरोऽव्ययम्' [१।४।६७] इति गतिसंज्ञायां 'गतिरनन्तरः' [६।२।४९] इति पूर्वपदप्रकृतिस्वरत्वम्। तत्र ओकार उदात्तः। अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्ववद्द्रष्टव्याः। आद्याक्षरस्य संहितायां प्रचयस्वरप्राप्तौ 'उदात्तस्वरितपरस्य सन्नतरः' [१।२।४०] इत्यतिनीचोऽनुदात्तः।

'यजयाच°' [३।३।९०] इत्यादिना यजतेर्नङ्प्रत्यये सत्यन्तोदात्तो यज्ञशब्दः। विभक्तेः सुप्स्वरेणानुदात्तत्वे सति पश्चात् स्वरितत्वम्। देव-शब्दः पचाद्यजन्तः। स फिट्स्वरेण[2] प्रत्ययस्वरेण[3] चित्स्वरेण[4] वान्तोदात्तः। ऋत्विक्-शब्द ऋतौ

---

* In the printed editions no accent marks are shown But since this is quoted to establish the correct accent of पुर accent marks are absolutely essential here as in the case of रत्न धात later on In the printed TS व is marked with the sign of the अनुदात्त because of the following उदात्त.

1 S discards the first explanation in his subsequent writings. See S. under i. 44 10, i 55. 3, i. 94. 6, AV. iii 19. 1, etc.

2 फिषोऽन्त उदात्तः [फि० १।१]।

3 प्रत्ययः। परश्च। आद्युदात्तश्च [पा० ३।१।१-३]।

4 चितः [पा० ६।१।१६३]।

यजतीति विग्रहे सति 'ऋत्विग्दधृक्०' [३।२।५९] इति निपातितः। 'गतिकारकोपपदात् कृत्' [पा० ६।२।१३९] इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। विभक्तिस्वरः पूर्ववत्। होतृ-शब्दस्तृन्प्रत्ययान्तः, नित्स्वरेणाद्युदात्तः[1]। स्वरितप्रचयौ पूर्ववत्। रत्नशब्दो 'नब्विषयस्यानिसन्तस्य' [फि० २।३] इत्याद्युदात्तः। तथा चाम्नायते 'रत्नं' धात्त'[2] [ऋ० सं० ४।३५।८] इति। रत्नानि दधातीति विग्रहः। समासत्वादन्तोदात्तो रत्नधा-शब्दः। यद्वा कृदुत्तरपदप्रकृतिस्वरः। तमप्-प्रत्ययस्य पित्स्वरेणानुदात्तत्वे सति स्वरितप्रचितौ। संहितायामाद्याक्षरस्य प्रचयो द्वितीयाक्षरस्य स्वरतरत्वमिति।

वेदावतार आद्याया ऋचोऽयंस्य प्रपञ्चितः।
विस्तरं वेदवाक्यानां संक्षिप्य वर्ण्यते ॥१॥

अग्निम्—Av. *Atram* is a different word altogether. Skt *agnih*, Lat *igni-s*, Slavonic *ogni*, O Lithuanian *ungni-s*.

ईळे—ड between two vowels is changed into ळ in RV In ईळे, ड comes between the vowels ई and ए, so it is changed, but in ईड्य it stands between the vowel ई and the semi-vowel य and therefore remains unchanged. When, however, we resolve the semi vowel य followed by the vowel अ into इ and अ for the sake of the metre, we must read ईळिअ

Scholars, both Indian and European, have expressed widely divergent views regarding the exact meaning of the root Yāska explains अग्निमीळे as अग्निं याचामि and says. ईळिरध्येषणाकर्मा पूजाकर्मा

---

[1] ञ्नित्यादिर्नित्यम् [पा० ६।१।१९७]।

[2] M reads रत्न धातमं without any accent mark and without any reference M's followers have tried to improve upon this reading and printed "रत्न धाता" इति Similarly under i. 157. 2 M. M prints [illegible] and is unable to trace the quotation His followers go a step further and print '[illegible]' [illegible] of course without any reference The correct reading is '[illegible]' and the expression occurs in RV. i 84. 2

वा Durga explains it thus ईळिधातु 'अध्येषणाकर्मा' याच्ञाकर्मा इह, अतश्च पूजाकर्मा 'वा' अपि In the Dhatupatha [ii 9] the root is read as ईड स्तुतौ The *Mahabhasya* [i 3 1, vi 1 94] says ईडि स्तुतिचोदना याच्ञासु दृष्ट , प्रेरणे चापि वर्तते, i e , ईड is found in the senses of praise, prompting and praying (for something), it is also used in the sense of 'sending' Geldner points out that in iv 24 2, v 69 3 etc ईड is synonymous with हू In many passages ईड is followed by हु *and in others* हु *by* ईड *So Geldner thinks* ईड *means 'to* invoke' Bloomfield on the other hand, holds that ईड is synonymous with हु Passages like य वाघतो हवन्ते अध्वरेषु i 58 7 and य विप्रास इळते अध्वरेषु x 30 4 are quoted by him in support of his contention Acc to him ईड is from इष द् (इष to wish) even as नीड is from निष द *Cf* Goth *aistan aida*, to be shy, timid, to honour, Gk *aidomai* (for **ais domai*) to be ashamed to stand in awe of, to respect another's misfortune, to feel regard for him

The root ईड occurs but rarely in classical Sanskrit, one well known instance being मिथ सद्य प्रभुरीशानमीडे

पुरोहितम् (from पुरस and हित < *धित)—the domestic priest, ऋत्विज्—the officiating priest at a sacrifice There were originally seven *rtviks** होत पोत, नेष्ट्, अग्नीध प्रशास्तृ (=मैत्रावरुण) अध्वर्यु ब्रह्मन् The number later rose to 16 (i) होता, मैत्रावरुण , अच्छावाक , ग्रावस्तुत्, (ii) अध्वर्यु , प्रतिप्रस्थाता नेष्टा, उन्नेता, (iii) ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्र , पोता, (iv) उद्गाता, प्रस्तोता प्रतिहर्ता, सुब्रह्मण्य

पुर is derived by Indian grammarians from पूर्व with अस European scholars point out that both पूर्व and पुर , पुरा, etc are derived from the root पृ or पृ Av *puro* Gk *paros*, Goth *faura*, O E *fore*

धित is found in such compounds as सुधित, दुर्धित, मितधित युवधित,

---

* *Cf* RV ii 1 2

तवाग्ने होत्र तव पोत्रमृत्विय तव नेष्ट्र त्वमग्निदृतायत ।
तव प्रशास्त्र त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥

etc (*cf* Pāṇini vii 4 45) In Av and O Persian we find *data* with the full grade In Lat *con ditus, ab ditus, creditus*, etc *ditus* corresponds to Skt हित *Cf* Gk *thetos* In the case of the root दध्, which became later दह्, we have a similar breaking down of ध to ह though the original ध is preserved in forms like अदीध, दीदध, etc Similarly the imper 2 sing ending धि (Gk *thi*, Av *δi*) became हि in later Skt though it is preserved in forms like शृणुधि एधि, याधि, etc

Both पुरोहित and पुर धा are used in A B 40 1 न ह वा अ पुरोहितस्य राज्ञो देवा अन्नमदन्ति तस्मात् राजा यक्ष्यमाणो ब्राह्मणं पुरो दधीत.

यज्ञस्य—is to be construed with ऋत्विजम् and not with पुरोहितम्, as the genitive generally precedes the word governing it and as both यज्ञस्य and ऋत्विजम् belong to the same pada In viii 38 1 Indra and Agni are called the *ritviks* of the Yajus यज्ञस्य हि स्थ ऋत्विजा. यज्ञ Av *yasna*, Gk *hagnos*, यज्ञस्य Gaθ *yasnahya* Y AV *yasnahe*.

देवम्—qualifies ऋत्विजम् (the divine priest) or is in apposition with अग्निम् (God the priest) In view of v 22, 2 and v 26, 7 where we find दधाता देवमृत्विजम् the explanations of Madhava (यज्ञस्य स्वामिनम्) and Skandasvāmin (यज्ञस्य दातारं दीपयितारं वा। यज्ञ हि देवेभ्यो मनुष्येभ्य श्चाग्निर्ददाति तदायत्तत्वात् दीपयति च) can hardly be accepted

Indian commentators are generally agreed in deriving देव from दिव्, 'to shine The derivation however presents two difficulties In the first place the suffix ought to be क acc to इगुपधज्ञाप्रीकिरः कः iii 1 135[1] In the second place the feminine will be formed with आ instead of ई The first difficulty is got over by adding the suffix अच् acc to नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः iii 1 134 and the second by reading देवट in the पचादि list with ट as the indicatory letter As is well known पचाद्यच् can supersede any previous or subsequent rule and when a प्रातिपदिक or प्रत्यय has ट as an indicatory letter the feminine is formed with unaccented ई acc to टिड्ढाणञ्° iv 1 15

---

[1] With क the form will be दिव and not देव

European commentators, generally, derive देव from दिव् heaven The word originally meant celestial (or the son of heaven) and then it came to mean God Even though the secondary suffix अ has been added there is no वृद्धि as in the case of भेषज adj 'healing', noun 'medicine', from भिषज् physician We may explain this view-point thus in Sanskrit सर्वबाधकात् 'दिव्'शब्दात् 'तस्येदम्' [४।३।१२०] इति वा 'तत्सापद्यम्' [४।३।८१] इति वा अण्। 'देवप्रभावोरुदात्त' [६।१।१८] इत्यादिनिर्देशाद् गुणः। प्रत्ययस्वरेणान्तोदात्तत्वम्।

The root दिव् is merely an extended form of दी to shine, so it is difficult to see how the existence of such a root can be repudiated. The Latin words *divine*, *Diana* and the Greek words *dios* and *Zeus* are all connected with this root · See BLOOMFIELD, *The Religion of the Veda*, pp 108 109

देव appears as *daēva* in Av but means (gods of the pre Zoroastrian period, i e) 'demon', similarly *ahura* correspond ing to Sanskrit असुर (which originally meant the highest divinity but later came to signify) 'demon' means God in Av Skt *deva m*, Av *daēvem*, Lat *deu m*

ऋत्विजम्—The formation is explained by RV x 2 5 यजिष्ठो देवाँ ऋतुशो यजाति, AB xxii 4 ऋत्विज ऋतुयाजान् यजन्ति, etc Skt *ṛtuh*, Av *ratu*, Gk *artu s*, Lat *artu s* Skt *yajati* Av. *yazaite*, Gk *hazomai* (for **hagio mai*) 'I revere'

होतारम्—In the 1st pada, Agni is called पुरोहित, the domestic priest, in the 2nd pāda, he is called the priest of the sacrifice and in the third pada the seer mentions the particular sacrificial priest, *viz*, Hotr "When the Purohita who was the spiritual adviser of the king in all his religious duties, actually took part in one of the great sacrifices . he was normally the Hotr"

There is a difference of opinion among scholars, both Indian and foreign, regarding the derivation of the word होतृ Aurna vabha, a very ancient writer derives it from हु 'to sacrifice,' while Yaska and his followers think that the word comes from ह्वे or ह्व 'to invoke' In the *Aitareya Brahmana* होतृ is derived

from आ वह्*. The function of the होतृ is no doubt to invoke the gods and this is emphasised in the Brāhmana derivation The word, however, corresponds exactly with Av *zaotar* and is to be derived from हु (from which, by the way, the English word God is also derived) Thus Macdonell and Keith write in the *Vedic Index* "होतृ is the name of one of the oldest and most important priests of the Vedic ritual, the counterpart of the Zaotar of the Avestan priesthood The word must be derived from हु 'sacrifice' as was held by Aurnavābha, this indicates a time when the होतृ was at once sacrificer (the later Adhvaryu) and singer But the functions were already clearly divided in the Rigveda where the Hotr's chief duty was the recitation of the Sastras He was also in the older period often the Purohita of the king, an office later filled by the ब्रह्मन् priest"

Macdonell appears to have changed his opinion later, as in the *Vedic Reader* he derives होतृ from ह्वे to call'

Lanman points out that the sense of 'invoker,' naturally suggested by his function in the ritual, was popularly associated with the original sense of 'offerer' and the word thus came to be connected with ह्वे to 'invoke'

स्वधावन्तम्—Masculine words ending in आ like स्वधा, गोपा, etc, became practically obsolete in classical Sanskrit, though

* यदन्यो जुह्वति अथ योऽनु चाह यजति च, कस्मात् त होतेत्याचक्षत इति ? यद्वाव स तत्र यथाभाजनं देवता अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वम् । 1 2

"They say, 'Since another pours the libation, then why do they style Hotr him who recites (the invitatory verses) and says the offering verses?' In that he here according to their portion invites the deities, (saying) 'Bring hither N N, bring hither N.N', that is why the Hotr has the name" (KEITH).

S. explains the formation thus

स्वनाम यास्कोक्तवान्स्या प्रक्रिया होतृशब्दनिष्पत्तिं तु जुहोतिधातो.। तस्माद्धोम कर्तृत्वात्सामर्थ्याद्विस्मरणात्होतृत्वमुपपन्नम्।

grammarians mention भिवपा, मरुत्ता, etc The comparative and superlative suffixes also are much more frequent in Vedic than in classical Sanskrit For रत्नधातमम् we should probably say भितरां रत्नदम् in classical Skt

In viii 16 6 Agni is invoked thus अधि रत्न यजमानाय सुक्रतो त्वं हि रत्नधा असि In v.1 5 Agni is described thus दमेदमे सप्त रत्ना दधानोऽग्निर्होता निषसादा यजीयान् In VS xxvii 15 Agni is described as वसुधातम Sometimes रत्न occurs along with द्रविण, as दधासि रत्न द्रविणं च दाशुषे i 94 14, त्रि नो यस्य द्रविणं वह रत्नम् iv 5 12, sometimes with वसु, as, वसु रत्ना दयमानो वि दाशुषे iii 2 11 So रत्न must mean jewel gems, riches, treasure Geldner says "ratna Kleinod (gem), especially in its older sense viz, the prize of victory, reward The word is often used for the reward which the sacrificer or singer expects" The derivation is uncertain Some derive it from रा to give, some from रम् to rejoice while some modern philologists postulate a root *rent for this word

The suffixes तर and तम are generally separated by अवग्रह in the pada text e g, चित्रश्रवःऽतम (i 1 8) etc

In the case of words ending in दातर दातम धातम पातम गोपातम भूतर भूतम and ज्ञातम however it is these words that are separated and not तर and तम This appears to be due to analogy We shall see that भ्याम् भिस भ्यस and सुप are not separated after long vowels So रत्नधाभि is analysed रत्नऽधाभि and after रत्नऽधाभि we have रत्नऽधातमम्,* etc Thus we have वरिव ऽधातम ix 1 3 but वरिवोविद्ऽतरः viii 48 1 Sk dhatamam Av datamom

2

अग्नि पूर्वेभिर्ऋषिभि	अग्नि । पूर्वेभि । ऋषिऽभि ।
रीड्यो नूतनैरुत ॥	ईड्य । नूतनै । उत ।
स देवाँ एह वक्षति ॥२॥	स । देवान् । आ । इह । वक्षति ॥२॥

Agni is worthy of being praised by ancient sages and by modern (ones), may he bring hither the gods

अयम् अग्निः पूर्वेभिः पुरातनैर्भृग्वङ्गिरःप्रभृतिभिः ऋषिभिः ईड्यः स्तुत्यो नूतनैः उत इदानीन्तनैरस्माभिरपि स्तुत्यः। सः अग्निः स्तुतः सन् इह यज्ञे देवान् हविर्भुज आ वक्षति। 'वह प्रापणे' [धा० १९८५] इति धातुः। आवहत्वित्यर्थः। पूर्वेभिरित्यत्र 'बहुलं छन्दसि' [७।१।१०] इति भिस ऐसादेशाभावः। 'पुर्व* पर्व मर्व पूरणे' [धा० १५६८-७०] इति धातुः। पूर्वतिधातोरन्-प्रत्यय औणादिकः। इन्प्रत्ययान्त ऋषि-शब्दः। 'ऋष्यन्धक°' [४।१।११४] इति निपातनाल्लघूपधगुणाभावः। कित्प्रत्ययो वात्र ज्ञेयः [उ० ४।११९]। तौ शब्दौ नित्स्वरेणाद्युदात्तौ। ईड्यशब्दस्य ण्यत्प्रत्ययान्तत्वात् "तित् स्वरितम्"† [६।१।१८५] इति स्वरिते शेषानुदात्तत्वे च प्राप्ते तदपवादत्वेन "ईड्वन्द°" [६।१।२१४] इत्यादिनाद्युदात्तत्वम्। 'नवस्य नू त्नप्तनप्खाश्च' [५।४।३०।६] इति वार्त्तिकेन‡ नवशब्दस्य

---

¹ In the words of RV पुराणैः

* पूर्व पर्व मर्व पूरणे—M P, under i 19 7 M P read पूर्व पर्व मर्व पूरणे, Some Dhatupāthas read पूर्व with long ऊ, but पुर्व is the correct form of the root The *Manoramā* on Durga's Dhātupātha says : ह्रस्वमध्यपवर्गीयवकारोऽयम्। दन्त्योष्ठ्योऽयमिति मैत्रेय।

† The rule is sometimes quoted as तित् स्वरितम् and sometimes as तित् स्वरित : The latter would appear to be the correct form, but it is difficult to say anything for certain *Cf* अनुदात्तौ सुप्पितौ iii 1 4 and अनुदात्तं प्रश्नान्ताभिपूजितयोः viii 2 100

‡ M M notes that the portion नवस्य नू त्नप्तनप्खाश्च इति वार्त्तिकेन is added in the margin in several of the MSS collated by him. This shows that it was originally a reader's note which subsequently became a part of the text S derives नूतन also under iii 32 13 (नवशब्दस्य त्नप्तनप्खाश्च प्रत्यया वक्तव्या नू इत्यादेशश्च) and under iii. 47. 5 (नवशब्दस्य नू इत्यादेश त्नप्तन[प्]खाश्च प्रत्यया वक्तव्या इति तन[प्]प्रत्यय) where the printed editions drop the प after न

नू इत्यादेशस्तनन्प्रत्ययश्च महावार्त्तिके विहितः। ततो नित्स्वरेणाद्युदात्तः। अवशिष्ट-स्वरा अग्न्यादिषु नूतनान्तेषु पूर्ववदूह्याः। उत-शब्दो यद्यपि विकल्पार्थे प्रसिद्ध-स्तथापि निपातत्वेनानेकार्थत्वादौचित्येनात्र समुच्चयार्थो द्रष्टव्यः। 'उच्चावचेष्वर्थेषु निपतन्ति' [नि० १।४] इति निपातत्वम्। तर्हि 'निपाता आद्युदात्ताः' [फि० ४।१२] इत्युकारस्योदात्तः प्राप्त इति चेत्, न, प्रातः-शब्दवदन्तोदात्तत्वात्।[1] यथा प्रातः-शब्दोऽन्तोदात्तत्वेन स्वरादिषु [१।१।३७] पठित एवमुत-शब्दस्यापि पाठो द्रष्टव्यः, स्वरादेराकृतिगणत्वात्। यद्वा 'एवादीनामन्तः'[2] [फि० ४।१४] इत्यन्तो-दात्तः। स इत्यत्र फिट्स्वरः। देव-शब्दः पूर्ववत्। देवानित्यस्य नकारस्य संहितायां 'दीर्घादटि°' [८।३।९] इति रुत्वम्। 'अत्रानुनासिकः°' [८।३।२] इत्यनुवृत्तौ 'आतोऽटि नित्यम्' [८।३।३] इत्याकारः सानुनासिकः। 'भो भगो°' [८।३।१७] इति रोर्यकारः। स च 'लोपः शाकल्यस्य' [८।३।१९]

---

in two places as is also done in Keilhorn's edition of the *Mahābhāṣya* where we read नवस्य नू त्नप्तनखाश्च। नवस्य नू त्नप्तनादेशो वक्तव्यः। त्नप्तनखाश्च प्रत्यया वक्तव्याः. In all these cases the scribes have carelessly written one न for two (*cf.* Haplology in language) Curiously enough in the printed *Kāśikā* (Lazarus, 1898) we find under v. 4. 25. नवस्य नू आदेशस्तनप्खाश्च प्रत्ययाः, where the correct reading would appear to be त्नप्तनप्खाश्च प्रत्ययाः. Unfortunately neither the *Nyāsa* nor the *Padamañjarī* comments on this portion. I should prefer महावृत्तौ (meaning वार्त्तिकवृत्तौ) to महावार्त्तिके here If महावार्त्तिके be the correct reading then S evidently means not the short sūtra-like vārttika but the vārttika as explained by the Mahābhāṣyakāra

1 On स्वरादिनिपातमव्ययम् i. 1. 37, the *Kāśikā* says. स्वरादीनि शब्दरूपाणि निपाताश्चाव्ययसंज्ञानि भवन्ति। स्वर् अन्तर् प्रातर् एते अन्तोदात्ताः पठ्यन्ते। etc.

2 In general the readings of the फिट्सूत्र's accepted by the author of the फिट्सूत्रवृत्ति are more reliable than those in the *Siddhānta Kaumudī* and other works. The फिट्सूत्रवृत्ति reads एवमादीनामन्तः but in this particular instance एवादीनामन्तः seems preferable. S. appears to vacillate between एवादीनाम् and एवमादीनाम्.

गृत्समदो ब्रूते, जनास. जना हे असुरा, य जात एव* जायमान एव सन्, प्रथम देवाना प्रधानभूत मनस्वान् मनस्विनामग्रगण्य[1] देव: द्योतमान सन्, क्रतुना वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा देवान् सर्वान् यागदेवान्, पर्यभूषत् रक्ष्यत्वेन† पर्यग्रहीत्। 'भूष अलङ्कारे' [धा° १।६६९] भूवादि‡। लङि रूपम्। यद्वा सर्वानन्यान् देवान् पर्यभूषत् पर्यभवत्, अत्यक्रामत्। अस्मिन् पक्षे भवतेर्व्यत्ययेन षस। 'श्र्युक किति' [७।२।११] इतीट्प्रतिषेध। यस्य इन्द्रस्य शुष्मात् शारीरात्§ बलात्, रोदसी, द्यावापृथिव्यौ अभ्यसेताम् अबिभीताम्। 'भ्यस भये' [धा° १।६१९] अनुदात्तेत्। 'भ्यस भयवेपनयो' इति नैरुक्ता [नि° ३।२१]। अभ्यसेताम् अवेपेता वा। तथा च मन्त्रान्तरम्— [2]इमे चित्तव मन्यवे वेपेते भियसा मही' [ऋ° स° १।८०।११] इति। नृम्णस्य

---

* देव is omitted in some MSS प्रादुर्भूतमात्र सन् AVS उत्पन्नमात्र सन् TS

[1] मन इन्द्रायाक्रमिव मनसा युक्त AV धैर्यवान TS

† रक्षकत्वेन—M P Though both रक्ष्यत्वेन and रक्षकत्वेन are possible here we have adopted the former on the strength of AVS

‡ So also under III 51 8 (भूष अलङ्कारे भूवादि), III 55 4 (भज् भरण। भूवादि), etc Commentators generally use भ्वादि or भौवादिक The expression भूवादि which owes its origin to Panini's rule भूवादयो धातव I 3 1 is used by Sadguruśisya also Under RV I 80 12 is found भौवादि which appears to be grammatically indefensible The correct reading is found under RV. I 136 5

§ शरीरात् M P but cf Durga on Nir x 10 and AVS xx 34 1 शुष्मात् बलेनेम शारीर बलम् भयाय हेतावेतच्च बल भयसाधनतयाभिप्रेत—इमृणस्य मह्नेति।

[2] Even those two great ones (Heaven and Earth) trembled in terror before thy wrath

सेना·लक्षणस्य[1] बलस्य मह्ना महत्त्वेन युक्तः[2] स. इन्द्रः नाहमिति ।[3] अत्र निरुक्तम् [१०।१०]—'यो जायमान एव प्रथमो मनस्वी देवो देवान् क्रतुना कर्मणा पर्यभवत् पर्यगृह्णात् पर्यरक्षदत्यक्रामदिति वा। यस्य बलाद्द्यावापृथिव्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्त्वेन स जनास इन्द्र इति ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यान-संयुक्ता[4] [नि° १०।१०] इति ॥१॥

य—Av *yō*, Gk *hos* Skt *yatara h*, Gk *hoteros* , Skt *yāvat*, Gk *heos*, Dor *has* for **hauos*

जात—Av *zata* , Gk *gnoto s* Lat *natu s* (*cognatu s*)

एव—Av *aeva*, O Pers *aiva*, 'one', 'single', Gk *oios* (**oiwos*) alone

प्रथम—Acc to Yaska प्रथम is for प्रतम the suprl of प्र "प्रथम इति मुख्यनाम प्रतमो भवति ।" The थ is due to the analogy of चतुर्थ, षष्ठ, etc Av *fra tomo*, O Pers *fra tama*[5] Acc to Wackernagel (A G III 404c) प्रथम contains two suprl suffixes थ and म . In the Unadi sutras the word is derived from √प्रथ with the suffix अमच *protos* is used in Gk and *primus* in Lat in the same sense

---

[1] नृन् अनुजनान् प्रत्यभिभावुक मनो यस्य स तादृश , एतत्प्रयत्नात् नृन् नमयतीति वा नृम्ण सेनादिलक्षण बलम । AVS

[2] तस्य मह्ना महत्त्वेन च अभ्यकैताम इति पूर्वेणान्वय । AVS जनास हे जना, स इन्द्रो 'नृम्णस्य बलवीर्यबलस्य मह्ना महिम्ना युक्तात् भवतीति शेष । TSS स तादृश इन्द्र नृम्णस्य बलस्य मह्ना महत्त्वेन इत्यन्वृत्तवाद्दशो महावनीऽस्यो नास्ति सत्याभ्यां भेद जना , दास्यन्मत्वमिन्द्रिय बल वेति । TBS नृम्णस्य मह्ना अतिमहदमहाभ्यस्य बलम्, अस्यामयभावो हादयिष्यतीत्येवमतिमहत्यावते द्यावापृथिव्यावभ्यभीता यस्य नृम्णात । Durga

[3] हे जनास असुरजना स इन्द्रो नाहमित्यभिमानम इन्द्रत्व पदंहरत् । अथ मृत स्वेन्द्रत्वाप्रतिपादनपरत्वपक्षे हे जनास इन्द्रो नास्तीति मन्यमाना जना उक्तगुणोपेत, स इन्द्रोऽस्त्येवेति व्याख्येयम् । AVS

[4] 'ऋषेर्दृष्टार्थस्य' अनुभूतेन्द्रमेवत्स्न्दवस्तस्य ऋषेः सम्यग्दृष्टेन्द्र प्रति प्रीति ' तुष्टि 'भवति' 'आख्यानसंयुक्ता' आख्यानसम्बन्धात् ।...अथवा 'दृष्टार्थस्य' इति देवतार्थे भूतवती दृष्टवती भावितान्न करणाय 'प्रीत' अतिहर्षात् [?] 'आख्यानसंयुक्ता' अन्येभ्य कथनसंयुक्तेत्यर्थ ।

[5] V G S

(e g , from इन्द् 'to shine [cf इन्दु], नृ to be manly'[1]) but the most plausible is that from इद् to swell[2] "The existence of Indra in the period of Indo Iranian unity, which was rendered probable by the existence of a demon named Indra, and of the god of victory Verethraghna, who is clearly equivalent to Vrtrahan, is made practically certain by the discovery of the name Indra along with those of Varuna and Nāsatya among the gods of the Mitanni While the name is of quite uncertain origin, the parallelism of the myth of the finding of the cows proves that part of the conception of the god is Indo-European" KEITH *Religion and Philosophy of the Veda*, p 188

Because of the refrain स जनास इन्द्र this hymn is designated सजनीय in TS vii 5 5 2 etc., यो जात एव प्रथमो मनस्वानिति सूक्ते स जनास इन्द्र इत्येव सजनशब्दस्य विद्यमानत्वात् सूक्तं सजनीयम्। S.

2

यः पृथिवीं व्यथमानामदृंहद्	यः। पृथिवीम्। व्यथमानाम्। अदृंहत्।
यः पर्वतान् प्रकुपिताँ अरम्णात्।	यः पर्वतान् प्रऽकुपितान्। अरम्णात्।
यो अन्तरिक्षं विममे वरीयो	यः अन्तरिक्षम्। विऽममे। वरीयः।
यो द्यामस्तभ्नात् स जनास इन्द्रः॥२॥	यः द्याम् अस्तभ्नात् सः जनासः इन्द्रः॥२॥

Who fixed fast the shaking earth, who made firm the tottering mountains, who spread out more widely the atmospheric region, who propped up the sky, he, O men, is Indra

[1] In this case the word is cognate with Skt नृ, Av. *nar*, Skt नर, Av *nara*, Lat *Nero*, etc

[2] From *oid to swell, because of his swelling manly vigour (schwellende Manneskraft) (Güntert)

हे [जनासः] जनाः, यः इन्द्रः व्यथमानाम् चलन्तीम् पृथिवीम् अदृंहत् शर्करादिभिर्दृढामकरोत्। 'दृह दृहि वृद्धौ' [धा° १।७१९-२०]। यः च प्रकुपितान्[1] इतस्ततश्चलितान् पक्षयुक्तान् पर्वतान् अरम्णात् नियमितवान्, स्वे स्वे स्थाने स्थापितवान्। अरम्णात्[*]। 'रमु क्रीडायाम्'* [धा° १।८३८]। अन्तर्भावित-ण्यर्थस्य व्यत्ययेन श्ना-प्रत्ययः। यः च वरीयः[3] उरुतमम्† अन्तरिक्षं विममे निर्ममे, विस्तीर्णं चकारेत्यर्थः। यः च द्यां दिवम् अस्तभ्नात् तस्तम्भ निरुद्धामकरोत्। 'स्तम्भु रोधने' इति सौत्रो धातुः। स एव इन्द्रो नाहमिति ॥२॥

यः पृथिवीं व्यथमानामदृंहत्—quoted by S. under iii. 30. 9.

व्यथमानाम्—The original meaning of the root is to tremble, to quake, to rock, to reel Transferred to the region of the mind it came to mean *'to be disturbed in mind'*. *Hence* व्यथा *came to* mean 'pain.' Ved. विदु means quaking Goth. *widōn* to shake

अदृंहत्—3 sing. imperfect of दृह् 'to make firm', (दृह दृहि वृह वृहि वृद्धौ i. 719.722). Av *darez* to stabilise, to bind fast. Mod. Persian *darz* 'seam' from which comes Bengali *darji* tailor does not appear to be cognate. In some texts पृथिवी is described as ध्रुवा, in others it is said to have been made firm by means of mountains, rivers, etc.

---

[1] प्रकोपं प्राप्तान्, परस्पर युद्धावितस्ततश्चलतान् पर्वतान् गिरीन् पक्षयुक्तान् अरम्णात् पक्षच्छेदेन नियमितवान्। यथेतस्ततो भ्रमणपीडा न कुर्युस्तथा स्वस्थाने स्थापितवानित्यर्थः। AVS *Cf* RV x 44 8 गिरींरज्रान् रेजमानाँ अधारयद् द्यौः क्रन्ददन्तरिक्षाणि कोपयत्। "He firmly fixed the plains and mountains as they shook. Dyaus thundered forth and made the air's mid-region quake"; RV. v 57. 3 कोपयथ पृथिवीं पृश्निमातरः.

[2] Under v. 32. 1 S says· पर्वतान् उदकवतो मेघान् अरम्णाः विसर्जयसि स्थापयसीत्यर्थः। अत्र रम्णातिर्विसर्जनकर्मा।

* Dhātupāthas generally read रम क्रीडायाम Maitreya Rakṣita remarks in his *Dhātupradīpa* अस्योदित्त्वं केचिदिच्छन्ति, तेषां मते रमित्वा रन्त्वा. Ramānātha says· रमु इति केचित्। चिरं रमित्वाप्यनुरज्यमानं रन्त्वापि कुमारे. Vopadeva reads रभुरमौ क्रीडे.

[3] वरीयः उरुतरम् स्थानमुरुम AVS.

† उरुतरम् AVS. would appear to be the better expression.

Cf TB i 1. 3 7· यदप्रथयत् तत् पृथिव्यै पृथिवित्वम् । सा शर्कराभि-रदृंहत्, i [redacted] 1.4 याभिरदृंहज्जगत प्रतिष्ठाम् । सर्वोमिमा विश्वकर्मणः अर्वाम् । ता [redacted] शिवा शर्करा हन्तु सर्वां ॥ iii 6 13 1 दैवो वनस्पति पृथिवीमुपरेणादृंहीत्, SB, xi 8 1 2 [redacted] पृथिवीमेव पर्वतैर्नदीभिरेवमादृंहत्, द्यौर्मिव मरीचिभिर्यान्त रथम्, जीमूतैश्च नक्षत्रैश्च दिवम् ।

In a later period the sustaining of the heaven and earth in their proper places was regarded as due to the direction of Brahman *Cf Brhadaranyaka Upanisad* iii 8 9 एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत etc , and Sankara Bhāsya thereon एतदक्षर सर्वव्यवस्था-सेतु सर्वमर्यादाविधरणमसौ आदित्यचन्द्रमसौ प्रशासने द्यावापृथिव्यावात्मकानत तस्मात् सिद्धम् अस्यास्तित्वम् अक्षरस्य । अव्यभिचारि हि तल्लिङ्ग यद्द्यावापृथिव्यौ नियते वर्तेते । चेतनावन्त प्रशासितारमसंसारिणमन्तरेण नैतद् युक्तम् । येन द्यौरुग्रा पृथिवी च दृळ्हा [ऋ० स० १०।१२१।५] इति मन्त्रवर्णात् ।

प्रकुपिता—*kup* also originally meant to fly about, to whirl, to smoke to bubble to boil up then it came to mean to boil with anger Gk *kapnos* smoke Lat *cupio* I long for, I boil with desire Eng *hope* The reference is to the well known legend that formerly mountains had wings Thus the *Maitrayani Samhita* i 10 13 says प्रजापतेर्वा एतज्ज्येष्ठं तोकं यत् पर्वता । ते पक्षिण आसन् । ते [1]परापातमासत यत्र यत्राकामयन्त । [2]अथ वा इयं तर्हि शिथिलासीत् । तेषामिन्द्र पक्षानच्छिनत् । तैरिमामदृंहत् । ये पक्षा आसंस्ते जीमूता अभवन् । तस्मादेते [3]सदा पर्वतमुपप्लवन्ते । [4]योनिर्ह्येषामेष । The same legend is found in the *Ramayana* also पूर्वं कृतयुगे तात पर्वता पक्षिणोऽभवन् । तेऽपि जग्मुर्दिश सर्वा गरुडानिलवेगिन ॥ ततस्तेषु प्रयातेषु देवसङ्घा महर्षिभि । भूतानि च भयं जग्मुस्तेषा पतनशङ्कया ॥ तत क्रुद्ध सहस्राक्ष पर्वतानां शतक्रतु । पक्षांश्चिच्छेद वज्रेण तत्र तत्र सहस्रश ॥ युद्धकाण्ड १।१२७ १२८ Acc to Geldner, the trembling of the earth may refer to the great earthquake at the time of the fight with the demons or at the beginning of this world. For the nasalisation see p [redacted]

---

[1] इतस्तत उत्पत्य । [2] अथ वै इयं पृथिवी तदा शिथिला आसीत् ।

[3] सदैव । [4] उत्पत्तिस्थानम् ।

अरम्णात्—रम् originally means to rest, to lean upon, as transitive, to set at rest. The root is भ्वादि आत्मनेपदिन् and क्र्यादि परस्मैपदिन् As a rule क्र्यादिगणीय roots are transitive. From meaning to rest, it meant to find rest in, to find pleasure in, to rejoice. Av. *rāmyat* he should rest. Modern Persian *rām* and modern Bengali *ārām* are from this root. *Cf.* ii. 11. 7: हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम्। वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन्॥ "Indra, thy bay steeds showing forth their vigour have sent a loud cry out that droppeth fatness. The earth hath spread herself in all her fulness: the cloud that was about to move hath rested."

ममे—from मा, Av. O. Pers *mā* to measure, जुहोत्यादिगणीय उभयपदिन्. Skt. *mātṛ*, Gk. *mé-tron* measure, *mê-tis* wisdom, skill, craft, Lat. *mēti or*, O E. *mæθ* measure.

वरीयः—comp. of उरु wide; super. वरिष्ठ. "*In many instances* these [comparatives and] superlatives attach themselves in meaning to derivative adjectives, being formed from the root which the latter contain" V G S, p. 95a

द्याम्—(Lat *diem*) Acc sing of द्यौ just as गाम् is the Acc. sing of गौ

अस्तभ्नात्—*cf* Gk *astemphēs* unmoved, *stemph-ulon* mass of olives pressed hard, oilcake. Skt. स्तम्भ holding fast, Av. *stambana*- props.

For Indra's cosmogonic activity, see *Journal of the American Oriental Society*, Vol XI, pp 182 83.

3

यो हत्वाहिमरिणात् सप्त सिन्धून्	यः हत्वा अहिम् अरिणात् सप्त | सिन्धून् |
यो गा उदाजदपधा वलस्य।	यः गाः उत्ऽआजत् | अपऽधा | वलस्य।
यो अश्मनोरन्तरग्निं जजान	यः अश्मनोः | अन्तः | अग्निम् जजान |
संवृक् समत्सु स जनास इन्द्रः॥३॥	सम्ऽवृक् | समत्ऽसु | सः जनासः | इन्द्रः॥३॥

Who slew the serpent and made the seven rivers to flow, who drove out the cattle by the unclosing [of the cave] of Vala, who has generated fire between two stones, the spoiler in battles, he, O men, is Indra.

यः अहिम् मेघं हत्वा, मेघहननं कृत्वा,[1] सप्त सर्पणशीलाः सिन्धून् स्यन्दनशीला अपः अरिणात् प्रैरयत्। यद्वा सप्त गङ्गायमुनाद्या मुख्या नदीररिणात्। रीङ् स्रवणे*। क्र्यादिः। यः च वलस्य एतन्नामकस्यासुरस्य अपधा[2] तत्कर्तृकान्निरोधान्निरुद्धाः गाः उदाजत् निरगमयत्। अपधा अपपूर्वाद् दधातेः 'आतश्चोपसर्गे' [३।३।१०६] इति भावेऽङ्प्रत्ययः। 'सुपां सुलुक्' [७।१।३९] इति पञ्चम्या आकारः। यः च अश्मनोः अश्नुते व्याप्नोत्यन्तरिक्षमित्यश्मा मेघः। अत्यन्तदृढरूपयोर्मेघयोः अन्तः मध्ये वैद्युतम्[3] अग्निम् जजान उत्पादयामास। यश्च समत्सु संभक्षयन्ति योद्धॄणामायूंषीति समदः संग्रामाः। तेषु संवृक् भवति। †वृणक्तेर्हि सर्वस्य विवर्जि रूपम्। स इन्द्रो नाहमिति ॥३॥

With a cf. अहन्नहिमरिणात् सप्त सिन्धून् iv 28 1, x 67 12

. हत्वा—Skt *hanti*, Av *jaiṇti*, Skt *jahi*, Av *jaiδi*, Skt. *hata-*, Av *jata*

---

[1] अन्तरिक्षे भवात् मेघं विदार्य AVS

* The क्र्यादि root is read as री गतिरेषणयोः in the Paniniya Dhatupatha (ix 29) and the दिवादि as रीङ् स्रवणे (iv 30) AVS reads correctly री गतिरेषणयोः. The root is quoted correctly under RV i 56 6, i 117 11, i 127 4, i 148 4, etc

[2] वलस्य एतन्नामकस्यासुरस्य या असुरेणापहृता बिले स्थापिता गा अपधा अपकृष्टाः धीयन्त इत्यपधा पिधानं तस्मात्। AVS

[3] मेघयोः सङ्घर्षेण वैद्युतोऽग्निर्जायत इति प्रसिद्धमेव। अश्मस्वरूपत्वेनातिदृढत्वात् तदाग्न्युत्पादनम् इन्द्रस्यासाधारणं सामर्थ्यम्। AVS

† In the Dhatupatha, however, the रुधादि root also is read as वृजी वर्जने "अनुषङ्गलोपो भवति।" AVS Under RV i 54 5 S says वृजी वर्जने। रौधादिक।

अहिम्—serpent, here Vrtra Av *azi*, Gk *ékhis* Lat *anguis*, Lith *angis*, O Pers *angis*, serpent

अरिणात्—री क्र्यादि P is transitive, to cause to run, to release, to let loose, री दिवादि A, is intransitive, to flow, to run *cf* Gk. *orinō* I set in motion I excite, Germ *rinnen*, Eng *run*, *river*. 'प्रावीभगे इव' [७।३।८०] इति छान्दसम् ।

सप्त—Av *hapta*, Gk *hepta*, Lat *septem*, Eng *seven*

सिन्धून्—Skt *sindhu h*, stream, then it came to mean the stream *par excellence*, *i e*, the Indus In Avesta and Old Persian it became *hindu* from which was derived the Greek form *Indos* with loss of aspiration

Very divergent views have been held by commentators regarding the seven rivers Some think seven has no special significance whatsoever but is a favourite number with the rsi's of RV Others hold that the five streams of the Punjab *viz*, the Vitasta (Jhelum, the ancient Hydaspes), the Asikni (Chenab or Candrabhaga) the Parusni (later Iravati, now Ravi); the Vipaś (Beas) and the Satadru (Sutlej) along with the Indus and the Sarasvati are meant "Still others are of opinion that the Kubha (Kabul river) should be substituted for the Sarasvati or that perhaps the Oxus must originally have been one of the seven" (*Vedic Index*) Sayana thinks that the rivers referred to are the first seven mentioned in the stanza

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥ x 75 5

while Durgâcârya maintains that the seven atmospheric streams कहुला, यम्ना, विनुता, अयपदी मेघपदी वर्षयन्ती and अवन्ध्या are intended* Sardesai, Brunnhofer and Ksetreśacandra Chattopâdhyâya believe that the land of the seven rivers is Semirechinsk in Russian Turkestan and the seven rivers are Ili, Lepsa, Karatal,

* Under viii 2 he says आकाशनदी—'एता च इला च' इत्येवमाद्या. Skanda Maheśvara says नदीनां मध्ये या प्रधानभूता गङ्गाद्याः सप्त नद्यस्ताः । अन्तरिक्षनदीर्वा सप्त 'अम्बा याम्बा'

Baskan, Aksu, Sarkan and Biyen (*Bhandarkar Commemoration Volume*, pp. 93-96, *Proceedings of the Sixth Oriental Conference*, pp 529-533). गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ is a very late verse and need not be considered in this connexion.

गाः—Av *gāo*, Gk. *bōs*. Acc to philologists even in I.E. the pl. was formed after the analogy of the sing. **guōm*, Gk. *bōn*, Skt. *gām* Some scholars hold that the cows are the rays of the sun

उदाजत—अज् to drive The original sense of the root is 'movement'. Av *azaiti*; Lat *ago*, I lead, drive, Gk. *agō*, I lead. *Cf* उद् गा आजदभिनद् ब्रह्मणा वलम् अगूहत्तमो व्यचक्षयत् स्वः ii. 24. 3.

अपधा—from अप 'away from' and धा 'to set, to place;' hence in the अधिकरणवाच्य अपधा means cave, place of concealment and in the भाववाच्य it may mean unclosing Durga explains: यो गा उदाजत् उदगमयत् अपधा अपधानेन उद्घाटनेन वलस्य मेघस्य बिराणां छिद्राणाम् Skanda-Maheśvara अपधा अपिहिते अत्र द्वितीयस्य स्थाने, आत्मनोऽधो निधानेन स्थापनेन। मेघमात्मनोऽधो निधाय तावत् पादाभ्यां यद्भवति यावदुदकमात्मस्थमित्यर्थः। अथवातिमेव बिलोद्घाटनेनैव वलस्य मेघस्य In ii 14 3 यो गा उदाजदप हि वलं वः, 'who drove out the cows, for he unclosed [the holes of] Vala' is exactly parallel to our passage Now since अप ह there stands for our अप-धा it is not unreasonable to suppose that the meaning is the same in each case त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् i 11 5 also lends support to this view. thou hast, O lord of rocks, unclosed the hole of Vala, rich in cows This shows that बिल is to be understood in ii. 14 3. Hence Ludwig, Oldenberg, Macdonell and others take अपधा as the normal Inst sing. of अपधा and translate by the unclosing of Vala. Geldner translates 'after the removal of Vala' and remarks: "probably also against the Padapāṭha अपधाः the remover" "Vala means not only the demon residing in the mountain holes of Pani but also the mountain holes themselves" *Cf* AB. xxix. 8: देवा वै वले गाः पर्यपश्यन् .....वज्रेण वलं विरुज्य गा उदाजन्.

वलस्य—Vala, like Vṛtra, is derived from वृ to cover. He is mentioned in the myth of the Paṇis. Bṛhaspati or Indra takes from him the cows which he had in his forts, his fences are burst by Indra, or his hole is opened. The fold of Vala is also mentioned, and he is clearly simply the personification of the pen in which the cows are supposed to be kept, as is indicated by the fact that he is not said to be slain, but to be pierced, broken or cloven." KEITH, *Religion and Philosophy of the Veda*, p 231). "The deliverance of the cows by Indra has been rightly compared with the deed of Hercules, who kills the three-headed Geryoneus and leads away the herds of oxen stolen by him" (WINTERNITZ, *Indian Literature*, p. 86 f. n). In classical Sanskrit Indra is known as बलभिद् or बलाराति "Vala, is a guardian of cows whom Indra rent when he robbed Paṇi of his cows. He laments for his cows when taken by Bṛhaspati. He has castles which were forced open by Indra, fences which were pierced by Indra and an unbroken summit which was broken by Indra." (*Vedic Mythology*, p 159).

अश्मनो,—Skt *aśman*, Av *asman* stone, sky, Gk. *akmōn* (stone) anvil, Modern Pers *āsmān* sky , Skt *āśmana*, stony. The English word *hammer* is cognate, only the suffix is र as in *thunder* and probably in Skt. अश्मर . See note on पर्वत, p 71.

अन्तर्—within, between, Av *antarə*, Mod Pers *andar*, Lat. *inter* As a preposition it governs the Loc Abl and Acc. V. G. S , p. 209 In the Avesta *antarə* governs the Acc.; as, *antarə zam asmanəm.ča* (अन्त., *i e* , अन्तरा क्षाम् अश्मानम् च), Y 08. 15.

जजान (Gk *gégone*)—from जन् to generate, आदि

यो अश्मनोरन्तरग्निं जजान—the reference is to the sparks emitted by the friction of stones; *cf.* ii 1 1. त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ Thou, O Agni, art born at day break, thou art the consumer of everything, thou art born from out of the water, *from the stone*, from out of the trees and from out of the herbs, O lord of men, thou art born

pure In IV 40 5 ऋषि is described as ऋद्विप्रा and in x 20 7 as ऋद्र ऋतम्

सहक्—(nom sing of सम् and हृ to twist) winning for himself, overpowering victorious

समत्सु—In धन्वना सीदा-समदो जयेम VI 75 2 समद is analysed in the Pada text as सऽमद but commentators generally explain समद as सम् अद (devouring completely) battle . The word generally occurs in the plural . Philologists derive it from सम with a derivative *d* and compare Gk *homados* noise din esp of the confused voices of a number of men

4

येनेमा विश्वा च्यवना कृतानि	येन इमा विश्वा च्यवना । कृतानि ।
यो दासं वर्णमधरं गुहाकः ।	यः दासम् वर्णम् अधरम् । गुहा अकरित्यकः
श्वघ्नीव यो* जिगीवाँल्लक्षमाद	श्वघ्नीऽइव । यः । जिगीवान् । लक्षम् । आदत् ।
दर्यः पुष्टानि स जनास इन्द्रः ॥४॥	अर्यः । पुष्टानि । सः । जनासः । इन्द्रः ॥४॥

By whom all these beings were made unstable who made subject the Dasa colour who like a gambler winning the stake seized his foe s riches he O men is Indra

येन इन्द्रेण इमा इमानि विश्वा [विश्वानि] च्यवना [च्यवनानि] नश्वराणि भुवनानि कृतानि स्थिरीकृतानि[1] । यः च दासं वर्णं शूद्रादिकम् । यद्वा दासम् उपक्षपयितारम् अधरम् निकृष्टम् असुरम् गुहा गुहायां गूढस्थाने नरके वा अकः अकार्षीत् । करोतेर्लुङि 'मन्त्रे घस ' [२।४।८०] इत्यादिना च्लेर्लुकि रूपम् । लक्षं लक्ष्यं जिगीवान् 'जि जये' [धा° १।५५४] । क्वसौ 'सन्लिटोर्जे' [७।३।५७]

* जिगीवाँ लक्षम्—All But Uvata under RP. IV 8 distinctly mentions जिगीवाँश्च लक्षम्

[1] स्वेन च्यावयितव्यानि कृतानि । यद्वा च्यवनानि कृतानि दृढीकृतानीत्यर्थः । AVS

इत्यभ्यासादुत्तरस्य कुत्वम्। दीर्घश्छान्दसः। जितवान्[1] यः अर्यः अरे, पष्ठेचवचने छान्दसो यणादेशः, शत्रोः सम्बन्धीनि पुष्टानि समृद्धानि[2] आदत् आदत्ते। तत्र दृष्टान्तः श्वघ्नीव, श्वभिर्मृगान् हन्तीति श्वघ्नी व्याधः यथा व्याधो जिघृक्षितं* मृगं परिगृह्णाति तद्वत्[3]। [स इन्द्रो नाहमिति। †] ॥४॥

इमा—class इमानि

विश्वा—class विश्वानि Av *vispe* *Cf* IV 30 22 यथा विश्वानि विपुरपे (bast broken)

च्यवना—class च्यवनानि from च्यु to move Skt *cyavate*, Av *š(y)avaite* The sage from whom च्यवन derives its name was originally called च्यवान pr part of च्यु lit moving, falling to pieces

दासं वर्णम्—the dasa colour, i e the aborigines दास noun, is accented on the second syll while दास adj is accented on the first दास is often used in the sense of infidel in opposition to आर्य

Cf *Sankhayana Srauta Sutra* VIII 25 1 अस्य मदे जरितरिन्द्र सोमस्य मत्सत। अस्य मदे जरितरिन्द्रोऽहिमहन्। इन्द्रो वृत्रमहन्। इन्द्र वृत्रासि महान्मावदरयत् पृथिवीम्। इन्द्रो व्यकरिममतिरदत सूर्यं दिवेरयत्। इन्द्र उत्राये वर्णमतिरद्व दास, वर्णमहन्। इन्द्रोऽपिन्वदपितोऽपिन्वद्गुत। इन्द्र अर्यां इव पक्षवत पर्वतान् प्रकुपितान् अरम्णात्। इन्द्रोऽपां वेगमैरयत्। इन्द्र इह यवदुत गिरि छात्। अस्य मदे जरितरिन्द्र इह यवदिह सोमस्य मत्सत।

अधरम्—lower (र being a comparative suffix) Av *aδara* Lat *inferus*, super *adhama* Lat *infimus* *Cf* RV x, 145 3 As a noun it means the lower lip though the meaning became generalised to some extent *Cf* पूर्वाधरवृ व्यक्तिशोणाधर —कुमार ५।३४

गुहा—Originally the word was not गुहा but गुह् meaning 'concealment' which yielded *juhā* in the Inst sing and with

---

[1] जय जय या य प्रकाशमून शत्रुन् सर्वं न जिगीवान् जितवान्। AVS

[2] समृद्धानि धनानि AVS

[3] जिघृक्षितम्—M जिघृक्षन्तम्—several MSS

[4] स (व्याध) यथा जिगीवान् मृग मृगयमाण सर्व स्वीकरोति तद्वत्। AVS

† This is not found in MSS but as S says something like this under each stanza we have inserted it.

adverbial shifting of accent *gúhā* concealed, secret, as here. गुहा कृ to make obscure, to cause to disappear. *Cf.* iv. 18 5:

अवद्यमिव मन्यमाना गुहाकरिन्द्रं माता वीर्येणा न्यृष्टम् ।

अथोदस्थात् स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः ॥

Regarding it (his birth) as a fault the mother concealed Indra, who was full of vigour. Then he himself arose, clothed with a robe, and filled both worlds as soon as he was born.

अकः—3rd sing root-aor. of कृ. The 2nd sing. also is अकः. *Cf* अका. When a रजात विसर्ग does not become र् in sandhi in the Saṁhitā-text, an इति is put after it in the Pada-text and in the case of finite verbs the word is often repeated in its pausa form after इति

श्वघ्नी—The stem is श्वघ्निन्. श्वघ्नी कितवो भवति स हन्ति, स्वं पुनराश्रितं भवति । (कितव=gambler) Lat *canis* (lit. dog) means an unlucky throw in a game of dice. Gk *kúon* (=Skt. श्वन्) means the same thing. Similarly श्वघ्निन् (lit dog killer) means a professional dishonest player who evades unlucky throws *

श्वघ्नी । वर्णव्यत्ययेन शकारस्य सकारः । स्वम् आत्मानं हन्यमेनेति स्वघ्नं द्यूतम् । तदस्यास्तीति स्वघ्नी । यद्वा स्वम् आत्मानं हतवान् स्वघ्नी कितवः । .. स्वशब्दोपपदात् हन्तेः 'अमर्थे क्तविधानम्' इति कप्रत्ययः । 'अत इनिठनौ' इति इनिप्रत्ययः । यद्वा, 'बहुलं छन्दसि' इति वचनात् ब्रह्मादिव्यतिरिक्तेऽप्युपपदे हन्तेः क्विप् । ऋन्नेभ्य इति ङीप् । अल्लोपोऽन इत्यकारलोपः । हो हन्तेरिति कुत्वम् । व्यत्ययेन स्त्रीलिङ्गता । S under AV. xx 17 5

As the Pada text does not use more than one अवग्रह in the analysis of one word and as श्वघ्नीव is regarded as a compound (p. 47) श्वघ्नी has not been analysed here In x 42 9 and x 43 5 कृतं यच्छ्वघ्नी विचिनोति देवने—श्वघ्नी occurs by itself and is analysed श्वऽघ्नी in the Pada texts of both RV. and AV.

जिगीवान्—Nom sing. of the perf part. of जि The palatal here reverts to the original guttural and the radical vowel is strong वस् (क्वसु) after short vowels is separated by an अवग्रह in the Pada text but as the vowel is long here, no अवग्रह is used.

* See also *Woolner Commemoration Volume*, p 142.

जिगीवांसं चम्—Final न् is changed into ँ before a following ल acc to तथा मकार उदयी लकारे RP iv 8 न् is assimilated to ल, the nasal element being preserved as the ँ

लक्षम्—(from लक्ष् to be attached to) token, mark, thence mark that is aimed at, target, stake Some scholars hold that लक्ष is *here meaning also 'a hundred thousand'*

आदत्—not analysed in the Pada text as the author regards it as the third sing *imperfect of* चद, आ दा being, as a *rule, used* in the Ātmanepada But in one or two cases the accent on the first syllable of आदत is difficult to explain unless we regard the आ as an उपसर्ग आदत्। चाति मचयति। छान्दसो लुङ्। यद्वा, आङ् पूर्वाद्दाते 'आङो दामहन' [।] इति आत्मनेपदाभाव। 'आतिस्था' इति सिचो लुक्। छान्दसो ह्रस्व॥ केवलाद्दिव वा छन्दसपि दृश्यते' इत्यन्तादिभ्याद्यान। अत एवात्मवद। S on i 127 6 आददस्याचाददि where आदत् is not analysed but आददि is written as आददि because there is no question of आत्मनेपद in the case of आददि

अर्यः—gen sing of आर as सख्य is the gen sing of सखि The meaning and derivation of अरि has been much discussed and Prof Bloomfield holds very strong views on the subject But there is hardly any doubt that अरि means enemy here Geldner says अरि means here the hard hearted and haughty rich man अर्यं पुष्टं occurs in x 60 1, 3 In x 34 13 अर्य is Nom sing and means 'noble'

पुष्टानि—मद् सके आवे क । See p 27 and also under next stanza It is explained in i 103 5

तदरेर्द पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय।
स गा अविन्दत् सो अविन्ददश्वान्त्स ओषधी सो अप स वनानि॥

See the abundant wealth that he possesses and put your trust in Indra's heroic vigour He won the cattle, and he won the horses he won the plants, the forests and the waters " Cattle, horses, etc, would thus appear to constitute पुष्ट

5

यं स्मा पृच्छन्ति कुह सेति घोर-	यम् । स्म । पृच्छन्ति । कुह । सः । इति । घोरम् ।
मुतेमाहुर्नैषो अस्तीत्येनम् ।	उत । ईम् । आहुः । न । एषः । अस्ति । इति । एनम् ।
सो अर्यः पुष्टीर्विज इवा मिनाति	सः । अर्यः । पुष्टीः । विजः इव । आ । मिनाति ।
श्रदस्मै धत्त स जनास इन्द्रः ॥५॥	श्रत् । अस्मै । धत्त । सः । जनासः । इन्द्रः ॥५॥

Of whom the terrible they ask, 'Where is he?', and of him they say 'He is not'. He diminishes the possessions of the foe like a gambler's throw. Have faith in him, he, O men, is Indra.

अपश्यन्तो जना घोरम् शत्रूणां घातकं यं पृच्छन्ति स्म[1] कुह सेति स इन्द्रः कुत्र वर्तत इति। सेति 'सोऽचि लोपे चेत् पादपूरणम्' [६।१।१३४] इति सो लोपे गुणः। न क्वचिदसौ तिष्ठतीति मन्यमाना जना एनम् इन्द्रमाहुः एष इन्द्रो नास्ति इति[2]। तथा च मन्त्रः 'नेन्द्रो अस्तीति नेम उ त्व आह' [ऋ०८।१००।३][3] इति। ईम् इति पूरणः[4]। स इन्द्रो विज इव। इव-शब्द एवार्थे। उद्वेजक एव सन्[5] अर्यः अरेः सम्बन्धीनि[6] पुष्टीः पोषकाणि गवाश्वादीनि धनानि

---

[1] निपातस्य च' [६।३।१३६] इति सायस्य संहितायां दीर्घः। AVS

[2] क्वचित् दृष्टिपथं प्राप्नुयात्। न तथापि पश्यत एव नाप्नोतीति भ्रमे AVS

[3] 'इन्द्रास्तित्वे क मन्त्रः। तत्राह—नेम ऋषिर्भार्गवो नेम एव इन्द्रो नाम न कश्चित् न चास्तीत्याह। तस्मादिन्द्रो नाम कश्चिदित्यत इति वादमात्रम् न तु तत् सत्यमित्यर्थः।'' S

[4] पद वै प्रकर्षेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा न मिताक्षरेषु पदपूरणास्ते मिताक्षरे ष्वनर्थका। कमीमिद्विति। नि० १।९

[5] अथवा विजी भयचलनार्थाभ्यां विजेरूपम्। AVS

[6] One expected the fem. सम्बन्धिनी, it is, however, construed in anticipation with गवाश्वादीनि धनानि

आ मिनाति सर्वतो हिनस्ति। 'मीञ्* हिंसायाम्' [धा° ९।४]। 'मीनातेर्निगमे' [७।३।८१] इति ह्रस्वः। तस्मात्, यत् अस्मै इन्द्राय धत्त स इन्द्रोऽस्तीति विश्वासमस कुरुत। यद्यप्यसौ विशेषतोऽस्माभिर्न दृश्यते, तथाप्यस्तीति विश्वासं कुरुत[1]। एवंनिर्धारणीयमहिमोपेतः† स इन्द्रो नाहमिति ॥५॥

धा—metrical lengthening. 'निपातस्य च' [६।३।१३६] इति संहितायां दीर्घः। The accentless स्म slightly emphasizes the preceding pronoun यम् Note that it does *not* impart a past value to the verb in RV. The corresponding particles in Gr. are *ma*, *mén*, etc

पृच्छन्ति—Av. *pərəsaiti* (3rd sing), O Pers *aparsam* (Skt. *aprccham*), Lat. *prec or*, *po(re)sco* I demand, request, Germ *frag-en.* Acc to western scholars the root is प्रश् and the विकरण is छ as in the case of गम्, यम्, इषु, ऋ and वस् to shine ऋ becomes ऋ by Samprasāraṇa exactly as ऋ becomes ऋ and श् is dropped or changed into च्. V G S, p 140, 2, p 141, 2 and f n 1.

कुह—Av *kuda* "The suffix ह probably represents original धा in *i-ha* 'here' (Prākrit *i dha*), *kuha* where? *visvaha* and

* मीङ् M P Scribes appear to have taken more liberties with this root than with any other in this commentary Here we find मीङ् which is also the reading under ii 24 12, iii 56 1, x. 134 7, etc. Under iii 28 4 we find मिञ् हिंसायाम् which is due to the influence of डुमिञ् प्रक्षेपणे The correct reading is found under i. 25 1, i 69 [redacted] i 71 10, iii 32 8, iii 84 8, etc and in the com on AV xviii 1. 5, xviii 4 60 (where one MS reads माङ् !) etc.

[1] इन्द्रोऽस्ति चेत् कुत तिष्ठतीति स नास्त्येवेति माविश्वासं मा कुरुत। स नास्तीति चेत् इमादियवसेनामारुदन्य, को नयेत्, भतो य शत्रुसेनाना जेतासि. .स इन्द्र। AVS

† Most MSS read एवंनिर्धारणमहिमोपेतः which may be somehow defended by regarding एवंनिर्धारण as a बहुव्रीहि compound but which suggests the reading एवंनिदानमहिमोपेतः। One or two MSS. read एवंनिर्धारणीयमहिमोपेतः which conveys sense but somehow does not ring true and suggests the reading एवंविधवरणीयमहिमोपेत.

viśvaha always, samaha in some way or other" V G. S. p 212 β

सैति—This irregular sandhi is of frequent occurrence in RV. and the epics Hence Panini had to frame the rule सोऽचि लोपे चेत् पादपूरणम् In RV saḥ and esaḥ occur in pausa, sa and esa before consonants, sŏ and esŏ before a, sa and esa with hiatus before vowels except a Cf एषैव रत्नमाला मधुरा याति केशव. VP v 18 10 Skt sah, sa, Av ha, Gk ho, Goth sa

घोरम्—not an adv but adj qual यम् Goth gaurs sad In x 34 14 it is a noun and means magical power'

ईम्—an old accentless Acc sing of the pronoun इ In the Avesta im and it are the Acc sing masc fem and neuter respectively i is the Acc du and neuter pl and is the Acc pl masc fem In RV im and i are used indiscriminately as the Acc for all numbers and persons Probably these were originally feminine Just as im is related to i, sim is related to sa and kim to ka im either takes the place of a noun, or prepares for a following noun or is *accompanied by other pronouns* (tam, yam enam enan) V G S p 220 1

आहुः—3rd pl perf of the defective root ah to say Only आह and आहुः are found in the Vedas In the Brahmanas the additional forms आत्थ and आहथुः are met with Classical Skt supplies the intermediate missing form आहतुः Skt aha, Av aδa Inspite of Panini s rule ब्रुवः पञ्चानामादित आहो ब्रुवः the sense of the perfect persisted in most cases Since the verb is not accented अपि must not be understood with it and we must not translate 'of whom they also say', etc Some believe that the absence of accentuation points to defective tradition but since the verb is construed not with यम् but with ईम् it is difficult to see how it could have been accented

एष—Av aêšô Only the Acc sing neuter aêtat is found in Old Persian The e of eso is to be pronounced short because of the following a

घवि—Av *as ti*, Gk *es ti* Lat *es t*, Goth *is t*, Eng *is*

सा र्यं—should be read सोऽर्यं with the short *o* for the sake of the metre In most cases the *a* dropped after final *e* or *o* has to be restored, here, however, the *a*, though found in the Samhita text, has to be dropped, otherwise the pada would contain 12 syllables instead of 11 Of course, the difficulty can be avoided by reading विजेव for विज इव but that would involve grammatical as well [redacted] metrical difficulties

र्यं—the Nom Acc pl and Abl Gen sing of *ari* is *aryah* in R̃V Similarly the Gen sing of *avi* is *avyah*, *kratu kratvah paśu paśvah pitu pitvah*, *madhu madhvah* *vasu vasvah* *śiśu śiśvah* Similarly from क्रतु we have क्रत्व in the Nom pl in expressions like घृतक्रत्व, सहस्रक्रत्व etc क्रत्वादिषुच्छन्दसि वावचनम्°

पुष्टी—from पुष् 'to thrive [redacted] accented on the suffix in RV though it is accented on the radical syllable in the later Samhitas In RV *is ti* means offering but *is ti* means desire'

विज—(*Acc pl of* विज) *corresponds to* वावन् *in the previous* stanza as भामिनाति to भादन् The dice esp the unlucky throw which [redacted] gambler made by taking up the dice* and sought to make good by means of a trick One such trick was the *glahaprabhedavarnanam* in *Dasakumara* ' *He* causes the wealth of the purse proud to disappear even as the gambler the unlucky throw ' Geldner *Cf* i 92 1 पुन पुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना । श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायु ॥ Being born again and again (though) *ancient adorning herself with* the self-same colour, a goddess diminishing the throws like a skilful gambler, *bringing the life of the mortal nearer old age* " (MACDONELL)

* Each player picks out a certain number of nuts from those spread on the diceboard Then the nuts held in the hand are laid out and counted If the number is exactly divisible by four that was the highest throw (कृत) " GELDNER

मिनाति—from मी to lessen, to diminish, to injure, to impair, Gk *mi nu o*, Lat *mi nu o* I lessen Like जी to overpower, जु to hasten and पू to purify, मी also shortens its vowel before the vikaraṇa ना but only in the Vedas RV i 124 2 अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि। ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥ 'Infringing not the divine ordinances, (but) diminishing (the length of) human lives, Usas has dawned as the last of countless (dawns) that have passed the first of those that are coming' व्रतं प्रमीणाति SB iii 2 2 24

श्रद्—heart In the *Nighantu* श्रत् is read along with बट्, सत्रा अद्धा इत्था and ऋतम् as words denoting truth (सत्यनामानि) Gk *kardie*, *kardia*, Lat *cor*, *cord is*, Lith *szirdis*, Old Slavonic *srud itse*, Germ *Herz*, Eng *heart* "Having acquired the character of an adverb [it] is once combined with कृ and often with धा *put* in the sense of *put faith in credit* (=Lat *credo* for *cred do*), [Av *zrazda*] but is nearly always separated from the verb by other words" V G S, p. 266 श्रदिन्द्राय धत्तन वीर्याय RV i 114 7 Put faith in Indra's might, श्रद्विश्वा वार्या कृधि RV x 89 5 "entrust all boons (to us) MACDONELL Verbs meaning 'to believe' take the Dat in RV In the Avesta also the Dat is used with *zrazda* e g *yoi zrazdao ankan mazdai* Y 31 1 those who have faith in Mazda In the *Aitareya Brahmana* we find श्रद्धे in connexion with श्रत् धा चक्षुर्वा ऋतम्, तस्माद् यतरो विवदमानयोराह—अहमनुष्ठया चक्षुषादर्शमिति तस्य श्रद्दधति x 8 the right is the eye, therefore when two contend whichever says I actually have seen it with my eye him men believe In the same passage in the *Brhadaranyakopanisad*, however, the Dative is found तस्माद् यदिदानीं द्वौ विवदमानावेयाताम्—अहमदर्शम् अहमश्रौषम् इति । य एव ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम v 14 4 In classical Skt it is the Loc or Gen of person and the Acc of thing that are most commonly used in connexion with श्रत् धा *Cf Mrcchakatika* को श्रद्धास्यति भूतार्थम् In Greek and Latin also the Dative is used with verbs expressing belief, *e g*, "*me panta peiro pasi pisteuein aei* Menander, *Sent* 335.

Try not always to trust all men in all things : *credere suis militibus* Livy, II. 45. To trust their soldiers (*cf. crede mihi*, etc.)." GILES, *A Short Manual of Comparative Philology*, pp. 323, 325.

श्रदस्मै धत्त—*cf.* AB I 6: स यदाहैमित्याहाथास्य श्रद्दधाति...न बहुनां धनानामेषा श्रद्दधाति।

यो रध्रस्य चोदिता यः कृशस्य	यः। रध्रस्य। चोदिता। यः। कृशस्य।
यो ब्रह्मणो नाधमानस्य कीरेः।	यः। ब्रह्मणः। नाधमानस्य। कीरेः।
युक्तग्राव्णो योऽविता सुशिप्रः	युक्तऽग्राव्णः। यः। अविता। सुऽशिप्रः।
सुतसोमस्य स जनास इन्द्रः ॥६॥	सुतऽसोमस्य। सः। जनासः। इन्द्रः ॥६॥

Who is the stimulator of the rich, and of the poor, of the priest that supplicates his aid and praises him, who, fair-jawed, aids him that has set the stones together and him that has pressed Soma, he, O men, is Indra.

यो रध्रस्य। "रध हिंसासंराद्ध्योः [धा° ४।८५]। समृद्धस्य चोदिता[1] धनानां प्रेरयिता भवति। यः च कृशस्य दरिद्रस्य च, यः च नाधमानस्य। 'नाधृ नाधृ याच्ञोपतापैश्वर्याशीःषु' [धा° १।६-७]। याचमानस्य, कीरेः करोतेः कीर्तयतेर्वा, स्तोतुः, ब्रह्मणो ब्राह्मणस्य च धनानां प्रेरयिता। यः च सुशिप्रः शोभनहनु

---

* The mention of the mere root without any indication of the suffix is rather unusual, but we find the same thing under II 21 4

[1] रध्रस्य समृद्धस्य धनवतोऽपि। रध्रेरौणादिको रक्प्रत्ययः। चोदिता अभिमतफलप्रदाता। समृद्धस्य राजादेर्धनैः तस्य चोदिता धनगमयिता वा। अथ कृशस्य धनादिरहितेन चोदकस्यापि चोदिता यदभीष्टधनस्य प्रेरयिता। AVS.

सुनीथंको घा सन्, युक्तग्राव्ण अभिषवार्थम् उद्यतग्रावण सुतसोमस्य अभि षुतसोमस्य यजमानस्य अविता रक्षिता भवति, स एव इन्द्र नाहमिति। ब्रह्मशब्दस्य स्वक्षपरत्वे ह्याद्युदात्तता स्यात्, यथा—'ब्रह्म वन्वानो अजरं सुवीरम्' [ऋ २।८।२] इति। अयन्त्वन्तोदात्त' पठ्यत इति नाम्नपर ॥६॥

रध्रस्य—Scholars have held widely divergent views regarding the meaning of this word willing pliant obedient (M W) weary (Grassmann) honest (Aufrecht) miserable stingy (Pischel) weak (Geldner) zealous of office (diensteifrig—Ludwig) Macdonell and others follow Sayana and think the word is derived from राध to succeed and means rich Bloomfield points out that the expression चोद राधो मघोनाम् calls upon Usas in i 48 2 and upon Sarasvati in vii 96 3 Inspire thou the liberality of the patrons (of the sacrifice) and that in ii 30 6 Indra and Soma are addressed as रध्रस्य स्थो यजमानस्य चोदौ Ye two are the inspirers of the liberal sacrificer

इन्द्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेन
नकिरापिर्ददृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः ॥ vi 44 10

O Indra liberal God we have always relied particularly (इत्) on thee to give O thou who drivest the bay steeds! Do not disregard us! (But) among men there is not in evidence any one who befriends us Why then forsooth do they call thee inspirer of the liberal (sacrificer)?

यस्पतिर्वार्याणामसि रध्रस्य चोदिता।
इन्द्र स्तोतॄणामविता द्विषो न पाह्यंहसो ॥ x 24 3

Thou who art the lord of choice riches who dost inspire the liberal giver who helpest O Indra the singer, do thou protect us from hateful penury!

From a consideration of these passages and several others along with our stanza Bloomfield concludes that रध्र means a liberal (giver or sacrificer) Our passage he translates

'The beautifully bearded God that inspireth the liberal and the stingy (कृश 'stingy,' somewhat like German *karg*, which means both 'meagre' and 'stingy') , that inspireth the needy Brahman poet, that helpeth him who operates the press stones and extracts the soma—he, O folks, is Indra' and remarks Here I seem to feel that कृश is the opposite of रध्र, and identical with भदिस्सत् पवि. in 6 53 3, रेवं भदाशुरि in 8 45 15, and the host of other words for impious, stingy men, well hated in the Veda, whose property is taken from them and given to the pious instead (see 1 81 9, 8 45 15) See the brilliant note of BLOOMFIELD in *Rigveda Repetitions*, Vol I, pp 286-288

चोदिता—furtherer inspirer, stimulator, from चुद् to impel Note that the word is accented on the suffix and so, not possessing the force of a verb, is construed with the Gen and not the Acc 'तृन्नृचोयार्थमेदोऽस्य मकरार्थ ... तचि ... ॥"

कृश—(Av *Ḱarəsa*) formed with क from कृश to grow lean, but as the normal past part of the root was not in much use Skt grammarians regarded the word as the past passive part of कृश् (कृशित is found in the Brahmanas)

ब्रह्म —Note that *brahman* accented in the 1st syl is neuter and means *prayer*, and *brahman* accented on the 2nd syll is masc and means *pray er*, i e , priest See V G S , p 453c The root is बृह् to swell Av. *baresman*.

नाधमानस—See under नाधित x 34 5

कीरे —Acc to western scholars it is from कृ 'to commemorate' कारु singer, poet, Gk *kerux* herald, messenger, Skt कीर्ति fame, etc , are from the same root कीर्तयति in classical Skt is a denominative from कीर्ति

युक्तग्रावा —Skt *yuk-ta* , Av *yux ta-*, Gk *zeuk-to s*, Lat *junc t us*, Lith *junk tas*, Eng *yok-ed* Latin and Lithuanian show the n while Greek shows the strong grade of the present. ग्रावन् stone specially for pressing Soma, Arm *erkan* millstone, cf

Goth. (*asilu-*)*quairnus* '(Ass)mill.' The word is etymologically connected with Skt. *guru*, Lat. *gravis*, etc.

अविता—अव् originally meant to have pleasure in, hence on one hand it meant to desire, on the other to favour, to aid. Skt. *avati*, Av. *avaiti* to bestir oneself, to help, Lat. *avēre* to be eager for, to desire.

सुशिप्रः—Yāska says: शिप्रे हनू नासिके वा. Macdonell—fair-lipped. Geldner—with fair (drinking) lip.* Bloomfield—beautifully bearded. Some philologists connect the word with Lat. *capillus* and think शिप्र masc. means hair, moustache, beard and शिप्रा fem. means hair of the head, false hair

सुतसोमम्—"The plant was prepared for use by being pounded with stones or in a mortar. The former was the normal method of procedure, appearing in the Ṛgveda as the usual one. The stones are called ग्रावन् or अद्रि, and were, of course, held in the hands. The plant was laid on boards one beside the other (अधिषवण), and, according at least to the later ritual, a hole was dug below, so that the pounding of the plant by means of the stones resulted in a loud noise, doubtless a prophylactic against demoniac influences."—*Vedic Index*, Vol. II, p. 476

7

यस्याश्वासः प्रदिशि यस्य गावो	यस्य । अश्वासः । प्रऽदिशि । यस्य । गावः ।
यस्य ग्रामा यस्य विश्वे रथासः ।	यस्य । ग्रामाः । यस्य । विश्वे । रथासः ।
यः सूर्यं य उषसं जजान	यः । सूर्यम् । यः । उषसम् । जजान ।
यो अपां नेता स जनास इन्द्रः ॥७॥	यः । अपाम् । नेता । सः । जनासः । इन्द्रः ॥७॥

* "mit der schönen (Trinker-) Lippe" In his Glossary, however, he had translated 'wearing a beautiful moustache'.

In whose control are horses, in whose control are cattle, in whose control are villages, in whose control are all vehicles, who generated the sun, and who (generated) the Dawn, who is the leader of the waters, he, O men, is Indra

यस्य[1] सर्वान्तर्यामितया वर्तमानस्य प्रदिशि प्रदेशनेऽनुशासने[2] अश्वासः अश्वा वर्तन्ते । यस्य अनुशासने गावः । यस्य अनुशासने ग्रामाः[3] ग्रसन्तेऽत्रेति [उ° ११४२] ग्रामा[4] जनपदाः । यस्य आज्ञायां[5] विश्वे[6] सर्वे रथासः रथा वर्तन्ते । यः च सूर्यं हत्वा[7] सूर्यं जजान जनयामास । यः च उषसम् । तथाच[*] मन्त्र—'जजान सूर्यमुषसं सुदंसाः' [ऋ° सं° ३।३२।८] इति । यः च मेघ-भेदनद्वारा अपां नेता प्रेरकः, सः इन्द्रः इत्यादि प्रसिद्धम् ॥७॥

अश्वास —for the ending, see p 62 Av and O Pers *aspa-*, Lat *equos*, Gk *hippos* (for *ekwos), Lith *aszwa* (=अश्वा, Lat *equa*)

प्रदिशि—प्रदिश् from प्र and दिश् to point means direction, control, Av, *daes*, Gk *deiknu mi*, Lat *dico*, I show, I tell *Cf* AV 1 9. 2 अस्य देवा प्रदिशि ज्योतिरस्तु See also under x 84 4

---

[1] पूर्वमन्त्रे धनिनो निर्धनस्य स्तोतुर्यदुत्ताभिमतप्रदाने [य समर्थः] स इन्द्र इत्युक्तम् । अत्र प्राणिनामपेक्षिता अश्वगोरथप्रकाशादिलक्षणा येऽर्था सन्ति तेषां सर्वेषां प्रदाने य समर्थः, स इन्द्र इत्यभिधीयते । AVS

[2] उपसर्गे घोः किः । प्रपूर्वात् दिश अतिसर्जने [धा° ६।३] इत्यस्मात् [सम्पदादिभ्यो भावे] क्विप् ।

[3] ग्रामलाभकामिभ्यो दित्सिता ग्रामा AVS

[4] Unadi I 142 ग्रसेरात्

[5] One expected अनुशासने as in the two preceding cases

[6] गजोष्ट्रशकटादीनां परिग्रहार्थं विश्वे इति विशेषितम् । AVS

[7] गमनादिसंव्यवहारोपयोगिप्रकाशाय । AVS

[*] तथा—M P. But तथाच is needed here तथाच मन्त्रान्तरम् would be still better

ग्रामाः—from the root *gram* to press, to grip, *cf* Eng *cram*, Lat *gremium* bosom, orig that part of the body to which objects are pressed when seized by the arms so as to lift them

रथासः—from ऋ to go, (acc to some from रंह to leap, to roll) Av *ratha*, Lat *rota*, wheel Lith *ratas* wheel' *ritu* 'I roll रथो रंहतेर्गतिकर्मणः, स्थिरतेर्वा स्याद्विपरीतस्य, रममाणोऽस्मिंस्तिष्ठतीति वा, रपतेर्वा रसतेर्वा। *Nir* ix 12

उषसम्—see p 90

" यः सूर्यं य उषसं जजान—*cf* दाधार यः पृथिवीं द्यामुतेमां जजान सूर्यमुषसं सुदंसाः RV iii 32 8

अपाम्—In RV the sing forms *apa* and *apah* are met with and the Av shows the sing *afs* *apəm* *apəm ca* *apa ca* *a(a)pe* *apat* *a(a)po* (G), *arpya* (L) and the duals *apa* *ape* besides the plurals *apo* etc

अपां नेता—In RV iii 45 2 Indra is called अपामजः In RV iv 26 2 Indra says अहमपो अनयं वावशानाः I led the waters bellowing loudly *Cf* RV vi 57 4 यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः ।

8

यं क्रन्दसी संयती विह्वयेते	यम्। क्रन्दसी इति। संयती इति सम्ऽयती। विह्वयेते इति विऽह्वयेते।
परेऽवर उभया अमित्राः ।	परे। अवरे। उभयाः। अमित्राः।
समानं चिद्रथमातस्थिवांसा	समानम्। चित्। रथम्। आतस्थिवांसा।
नाना हवेते स जनास इन्द्रः ॥८॥	नाना। हवेते इति। सः। जनासः। इन्द्रः ॥८॥

Whom the two battle ranks meeting in conflict invoke variously both the enemies—the farther and the nearer Two mounted on the self same chariot call on him separately He O men is Indra

यं क्रन्दसी रोदसी, शब्दं कुर्वाणे मानुषी दैवी च द्वे सेने वा, संयती परस्परं सङ्गच्छन्त्यौ*, यमिन्द्रं विह्वयेते स्वरक्षार्थं विविधमाह्वयतः। परे उत्कृष्टा अवरे अधमाश्च उभयाः उभयविधा[1] अमित्राः शत्रवः यमाह्वयन्ति। समानम् इन्द्ररथसदृशं रथम्[2] आतस्थिवांसा आस्थितौ द्वौ रथिनौ; तमेवेन्द्रं नाना पृथक् पृथक् हवेते आह्वयेते[3] [आह्वयतः?†]। यद्वा समानमेकरथमारूढाविन्द्राग्नी हवेते यज्ञार्थं यजमानैः पृथक् पृथगाहूयेते। तयोरन्यतरः स इन्द्रो नाहमिति ॥८॥

[अथर्ववेदभाष्यम्। संयती परस्परं संगच्छमाने क्रन्दसी शब्दं कुर्वाणे। द्यावापृथिव्याविरयर्थः। स्वाधिष्ठानां प्राणिनां वृष्ट्यर्थं पृथिवी, द्यौश्च हविरर्थम्, इतुनभयोः क्रन्दनम्। अथवा संयती परस्परं सङ्गते क्रन्दसी प्रतिभटान् प्रविदुद्राय आह्वयन्त्यौ [? आह्वयमाने] उभे शत्रुसेने विह्वयेते इन्द्रं विविध-माह्वयतः। स्वस्वसहायायेति शेषः। उक्तमेवार्थं प्रकारान्तरेण स्पष्टमाह—

---

* Parasmaipada So also under iii 33 2 But परस्पर संगच्छते under iii 24 4 and AV. xx. 34 8, etc.

[1] Printed editions generally read उभया उभयविधा उभयमाह्वयन्ति which is evidently corrupt

[2] Sāyana has missed the particle चित् here.

[3] A modern English poet makes fun of this natural tendency in the following quartrain

God heard the embattled nations shout
"Gott strafe England!" and "God save the King!"
God this, God that; and God the other thing.
"Good God!" said God, "I've got my work cut out."

(Quoted by Sir SARVAPALLI RADHAKRISHNAN in his *Kalki*.)

† The com on AV. shows आह्वयत. In the com. on RV., however, आह्वयते is often found where we should expect आह्वयति. अचिक्रदत् आक्रन्दति आह्वयते iv. 24. 8, हवामहे आचार्यमाह्वयामहे i 102. 9., etc. etc. In most of these cases the Ātm. is due to attraction. Thus Bhaṭṭa Bhaskara explains रमध्वम् as अनुरक्ता भवध्वम् under TS. i. 3. 7.

परे उत्कृष्टा अवरे निकृष्टाश्च। परस्परं जयपराजयापेक्षया परत्वम् अवरत्वं च द्रष्टव्यम्। एवम् उभयाः अमित्राः प्रतिद्वन्द्विसेनयोर्वर्तमानाः दासवः स्वस्वजयार्थं साहाय्काय विह्वयन्ते। इत्थं सेनाद्वयान्तःस्थितानाम् इन्द्राह्वानम् अभिधायाथ सेनास्वामिनोः परस्परप्रतिद्वन्द्विनोरिन्द्राह्वानम् अभिधत्ते। समानं चित् अश्वसारथ्यादिभिः समानं परस्परसदृशं रथम् आतस्थिवांसा अधिष्ठितवन्तौ तौ च नाना पृथक् पृथक् हवेते आह्वयतः।]

क्रन्दसी—Nom du of क्रन्दस battle array, army from क्रन्द् to scream, to bellow, to shout, du because one army is पर (farther) and the other अवर (nearer) *Cf* x 121 6 यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने

Rabindranath uses क्रन्दसी in the sense of 'heaven and earth' in his well known lines ऐ शुन दिशि दिशि तोमा लागि कांदिछे क्रन्दसी हे शिवरा बधिरा उर्वशी। चित्रा उर्वशी।' though the word must have become obsolete even in the Vedic period A younger Bengali writer uses the word in the sense of a girl in tears!

संयती—Nom du of संयत् pr part of सम् (together) + इ (to go).

वि ह्वयेते—नाना हवेते। अस्येदु भिया गिरयश्च दृळ्हा ... वि ह्वयन्ते सिषासवः RV i 102 6 Through his might Indra makes a counterpoise impossible Therefore people intent on gain call on him separately ' तमिन्नरो वि ह्वयन्ते समीके RV iv 24 3 'Men call on him alone in battles' त्वां जना ममसत्येष्विन्द्र संतस्थाना वि ह्वयन्ते समीके RV x 42 4 'Standing in battle for their rights, together, the people, Indra, call on thee diversely in the fray' आयमृक्थैर्ऋषयो वि ह्वयन्ते RV x 80 5 The Rsi's call on Agni diversely with songs of praise ' नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः। अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हीन्द्र निभृतं मनस्तव॥ RV i 102 5. 'Because these men given to praising loudly are invoking thee in various ways, for protection, O holder of treasures, mount our chariot for gain; for victorious, Indra, is thine firm mind ' यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये। अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम्॥ RV viii 1 3 'Even though these people

call on thee variously for aid, may thus our prayer, addressed, O Indra, unto thee, strengthen thee day by day.'

तां देवासुरा व्यह्वयन्त । प्रतीचीं देवाः परासीमसुराः । 'Her the gods and demons invoked separately, the gods directly, the demons indirectly' TS i 7 1 3

Besides the usual forms of ह्वे there is in RV हू the सम्प्रसारण form of the root which is ह्वयति as well as हुवति Acc to Bloomfield ह्वे is popular, while हू is hieratic

परावते—The अ has to be restored here to make up the requisite number of syllables

परे—Av O Pers para Alt form परास The Loc sing also is परे where we have the alt form परस्मिन्

अवर—alt form avarasah (अव down + र comparative suffix) Av aora, aora avara

माकि —In the declension of what is known in Sanskrit Grammar as किम् शब्द, two stems have fallen together In the Nom Acc. sing neut we find किम् in classical Sanskrit and the rest are formed from क But in RV we find the interrogative कि used once as the Nom sing, masc क्व यो वीरा किस स x 52 8 and the indefinite माकि (Gk *me tis*) no one, never' and नकि no one' 'nothing' Av *cis* Gk *tis*, Lat *quis* This कि is retained in the Gen sing of the Prakrits (किस, कीस) though it is not found in Sanskrit माकि is used in prohibitive sentences with the injunctive (V G S, p 240)

नकि, माकि *and* नकीम् *along with* माकीम् etc are read in *Nighantu* iii 12

नेशत्—3 sing reduplicated aorist injunctive of नश to be lost (नश अदर्शने) The ए here like the ओ in वोचत्, is the result of contraction in reduplication V G S p 175 2 In classical Skt also the aorist is optionally नेशत् acc to several grammarians नशिमन्योरलिट्येत्वम् *Mbh* vi 4 120

माकीम्—(Gathic Av *cīm*, younger Av *cim* with the negative particles *nae*, *naeδa*, *ma* *māδa*) probably the Acc sing of माकि with lengthened vowel Like माकि it is used in prohibitive sentences with the injunctive (*Vedic Grammar*, p. 430) नकीम् and माकीम् are preserved in Pr णाइं and माइं (मय णाइं मज्झं। माइं माऍ He viii, 2 190 1)

रिषत्—3 sing a aorist injunctive of रिष्

शारि—3 sing aorist injunctive passive of शॄ to crush, *cf* SB i 7 3 19 स पतित्वा शाइमपि यये

केवटे—*kevata* (Gr *kaidta*) is read in the *Nighaṇṭu* in the list of names of कूप

अथ—the later form of अध It may generally be translated by (*and*) *then* (*and*) *so*, when there is a contrast, especially after a negative, it is equivalent to *but* (V G S, p 214)

अरिष्टाभि—Uninjured *cf* अरिष्ट सर्व एधते RV i 41 2 By a curious irony of fate रिष्ट came to signify good luck (रिष्टाति—auspicious) and अरिष्ट came to mean fatal 'disastrous' in later Sanskrit

8

शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम् ।	शृण्वन्तम् । पूषणम् । वयम् । इर्यम् । अनष्टऽवेदसम् ।
ईशानं राय ईमहे ॥८॥	ईशानम् । रायः । ईमहे ॥८॥

We approach (*vayam īmahe*) Pusan who listens (*śṛṇvantam Pūṣaṇam*), who is watchful (*iryam*) whose property is never lost (*anaṣṭavedasam*) who lords it over wealth (*rāyaḥ īśānam*)

अस्मत्स्तोत्राणि शृण्वन्तम् इर्यम् दारिद्र्यस्य प्रेरकम् अनष्टवेदसम् अविनष्टधनम् ईशानम् सर्वस्येश्वरम् एवंविधं पूषणं देवं वयं रायः धनानि ईमहे याचामहे ॥८॥

स्वयं—(from स्व to set oneself in motion) watchful - Sāyaṇa sometimes explains it as प्रेरक, sometimes he identifies it with स्वयं and explains it as स्वामी, ईश्वर

अनष्टवेदसम्—बहुव्रीहि of अनष्ट not lost and वेदस् (cf वित्त) property पूषन् is called अनष्टपशु in x 17 3 वेदस् is read in the Nighaṇṭu in the list of धननाम

राय —Three constructions are possible here (i) राय may be regarded as an obj Genitive governed by the participle ईशानम्, cf. ईशान वार्याणाम् i 5 2, i 24 3, तमीशान जगतस्तस्थुषस्पतिम् i 89 5, ईशान राधसो महः vi 55 2, तमीशान वस्व vii [illegible] 4, ईशानमिन्द्र सौभगस्य भूरे vii 21 8, ईशानमस्य जगत स्वर्दृशमीशानमिन्द्र तस्थुष viii 32 22, (ii) it may be regarded as the direct object of ईमहे ईशानम् being construed as an adjective to the indirect object तम् ईशानम is used without any obj gen in इन्द्रमीशानमोजसा i 11 8 न ईशान न याचिषत् viii 1 20 and ईमहे governs two objects in राय सखायमीमहे vi 55 2 (iii) राय ईमहे may be analysed as राये ईमहे (this is, of course, against the Pada text) and राय regarded as a final Dative as in त मित सखित्व ईमहे त राये त सुवीर्ये i 10 6 Note that the Nom pl rāyah is accented on the first syllable while the Acc pl as also the Abl Gen sing is accented on the second अविदम्पदाय पुरुमेदुष ६।१।१० ईशान राय ईमहे also occurs in तष्टांशातर मयीशान राय ईमहे viii 26 22, तमिन्द्र दानमीमहे शवसानमभीर्वम्। ईशान राय ईमह viii 46 6.

ईमहे—is read in the Nighaṇṭu in the list of roots meaning याचना ई means 'to go' (p 136), to approach with prayers, to beseech, to solicit to gain

9

पूषन्तव व्रते वय	पूषन् । तव । व्रते । वयम् ।
न रिष्येम कदा चन ।	न । रिष्येम । कदा । चन ।
स्तोतारस्त इह स्मसि ॥९॥	स्तोतार । ते । इह । स्मसि ॥९॥

O, Pūsan (*Pū́ṣan*), [abiding] in thy ordinance (*tava vraté*) may we never be injured (*kádā caná vayam ná riṣyema*). We are thy praisers (*te stotā́raḥ smasi*) here (*ihá*)

चातुर्मास्येषु वैश्वदेवे पर्वणि पौष्णस्य हविषः 'पूषन् तव व्रते' इत्येषानुवाक्या ।[1] सूचितञ्च—'वाममद्य सवितर्वाममु श्वः पूषन् तव व्रते वयम्' [आ° २।१६।१६] इति ॥

हे पूषन्[2] पोषक [देव], तव त्वदीये व्रते कर्मणि वर्तमाना वयं कदा चन कदाचिदपि न रिष्येम हिंसिता न भवेम । तादृशाश्च वयम् इह अस्मिन् कर्मणि ते तव स्तोतारः स्मसि स्तः भवामः ॥९॥

पूषन् तव—class. पूषंस्तव, but in RV. final न् usually remains unchanged before त. The cases where the न् is changed into अनुस्वार and स् is inserted are mentioned in RP. iv. 76: तांस्त्वं सर्वांस्तान् देवांस्त्वं तांस्तायस्वावदस्त्वं च

व्रते—from वृ 'to will' 'to choose', means will, ordinance. In the *Nighantu* the word is read in the list of कर्मनाम. व्रतमिति कर्मनाम वृणोतीति सतः । Nir ii 13.

ते—Since स्तोतारः is accented on the suffix it is construed with the Genitive Cf दत्वोर्हंता ii 12 10, भवी नेता ii. 12. 7 See p. 199.

स्मसि—O Pers *a mahy*, Av. *mahi*. The 1st plural ending *-masi* is five times as common as *mas* in RV. It became altogether obsolete in classical Skt, but its Ātm. counterpart *-mase* is found in Pāli *mahe*.

---

[1] वैश्वदेव-वरुणप्रघास-साकमेध शुनासीरीयाख्य-पर्वचतुष्टयात्मकानि चातुर्मास्यानि कर्माणि । तेषां वसन्ते फाल्गुन्यां पौर्णमास्यां वैश्वदेवमुखेन प्रारम्भो भवति । वर्षास्वाषाढ्यां पूर्णिमायां वरुणप्रघासा अनुष्ठीयन्ते । शरदि कार्त्तिक्यां पौर्णमास्यां तत्पूर्वदिने च साकमेधाः सम्पाद्यन्ते । साकमेधानन्तरं [illegible] तत्कालमेव शुनासीरीयमनुष्ठेयम् । एवञ्च प्रायेण प्रतिचतुर्मासं कर्मणां प्रवृत्तेः 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायेन 'चातुर्मास्य'व्यपदेशः । तत्र प्राथमिके वैश्वदेवपर्वणि आग्नेयोऽष्टाकपालः पुरोडाशः, सौम्यश्चरुः, सावित्रोऽष्टाकपालो द्वादशकपालो वा पुरोडाशः, सारस्वतश्चरुः, पौष्णश्चरुः, मारुतः सप्तकपालः पुरोडाशः वैश्वदेवी पयस्या, द्यावापृथिवीय एककपाल इत्यष्टौ हवींषि । तत्र पौष्णेन चरुणा यः पूष्णो यागस्तत्र चरुप्रदानकाले पुरोऽनुवाक्यार्थोयम् ।

[2] हे पूषन् जगत्पोषक पृथिव्यभिमानिदेव S under i. 42 1

10

परि॑ पूषा प॒रस्ता॒-
द्धस्तं॑ दधातु॒ दक्षि॑णम् ।
पुन॑र्नो न॒ष्टमाज॑तु ॥१०॥

परि॑ । पू॒षा । प॒रस्ता॑त् ।
हस्त॑म् । द॒धा॒तु॒ । दक्षि॑णम् ।
पुन॑रिति॑ । नः॒ । न॒ष्टम् । आ । अ॒ज॒तु॒ ॥१०॥

Let Pūsan (*Pūsa*) stretch out (*pari dadhatu*) his right hand (*daksinam hastam*) from afar (*parastat*) Let him drive back (*punah ā ajatu*) to us (*nah*) what has been lost (*nastam*)

पूषा पोषको देवः परस्तात् परस्मिन् देशे सुखप्रचारादन्यस्मिन् चोरव्याघ्रादिभिरुपेते देशे गच्छतो गोधनस्य निवारणाय स्वकीयं दक्षिणं हस्तं परिदधातु परिधानं निवारकं करोतु । न अस्मदीयं नष्टम् च गोधनं पुनः आजतु आगच्छतु । आगमयतु* ॥१०॥

परिदधातु—(परि means 'around' and धा 'to set), "to lay or put or place or set round "

अजतु—The root अज् is read in the Dhatupatha as अज गतिक्षेपणयोः where क्षेपण would appear to mean 'to drive Hence the goad for driving cattle is known as प्राजन (cf Beng पाचन वाड़ी) Av azaiti to drive, to lead away Lat ago to lead, to drive Gk agō to lead Indian commentators generally regard the root as चन्नेतव्यर्थं in the sense of 'to drive ' The root is generally used of cattle, cf यो वा सदाजदपथा पयस्व ii 12 1, hence it is clear that by नष्टम् here cows are meant (विनिष्टमतयमथोग्गो विशिष्टमनिपत्तौ), cf i 23 13 आजा नष्टं यथा पशुम् ("अजिरवात्सर्वीतिष्काश । यथा नष्टमज गा वा लमेरागमयति, पशूना रक्षितत्वात्" Sk)

* Peterson notes that आगमयतु is not found in the Ulwar MS., but all the MSS collated by M and P show it and S often gives the primary meaning first and then the secondary meaning without इत्यर्थः or इति यावत् after it

YAMA

Characteristic features

"Yama is the son of Vivasvant and of Saranyū, the immortal daughter of Tvastr. He is elsewhere said to have been one of an original pair of human beings (x 10. 2), and to have sprung from the Gandharva, a deity of the atmosphere, and his wife (x. 10. 4). He was the first of mortals who died, and discovered the way to the other world, he guides other men thither, and assembles them in a home, which is secured to them for ever (x. 14. 1, 2) In one place he is represented as carousing with the gods under a leafy tree (यस्मिन् वृक्षे सुपलाशे देवैः सम्पिबते यमः x. 185. 6) He is a king, and dwells in celestial light, in the innermost sanctuary of heaven (x 14. 8, 7,8) where the departed behold him associated in blessedness with Varuna. He grants luminous abodes in heaven to the pious (x. 14. 9) who dwell with him in festive enjoyment

"The Fathers who have attained to the heavenly state are described as being objects of adoration to their descendants. They are said to be of different classes, upper, intermediate and lower. Their different races are mentioned by name, *viz.*, Angirases, Vairūpas, Navagvas, Atharvans, Bhrgus, Vasisthas, etc Though not all known to their worshippers they are known to Agni Their descendants offer them worship and oblations (x. 15 2, 9). supplicate their good will (x. 14. 6), deprecate their wrath on account of any offences which may have been committed against them (x. 15 6), entreat them to hear, intercede for, and protect their votaries (x. 15. 5), and to bestow upon them opulence, long life and offspring. They

are represented as thirsting for the libations prepared for them on earth (x. 15. 9), and they are invited to come with Yama, his father Vivasvant and Agni, and feast with avidity, and to their hearts' content, on the sacrificial food."[1]

"Whether the flames devour the body or the earth cover it, the spirit, freed from all needs, moves through the air toward new life; led by Pūṣan, it crosses the stream and passes by Yama's watchful dogs to the world of spirits from which it came. ... In the highest heaven, in Yama's...bright realm beams unfading light, and those eternal waters spring; there wish and desire and yearning are stilled; there dwell bliss, delight, joy and happiness." (KAEGI, pp. 69 70)

Yama (lit. = twin) was so called because he and Yamī were twins even as Yima and Yime are twins in the Avesta The *Bṛhaddevatā* says.

अभवन्मिथुनं त्वष्टुः सरण्यूस्त्रिशिराः सह।
स वै सरण्यूं प्रायच्छत् स्वयमेव विवस्वते॥
ततः सरण्य्वां जज्ञाते यमयमी विवस्वतः।
तौ चाप्युभौ यमावेव ज्यायांस्ताभ्यां तु वै यमः॥ vi. 162 63

"Tvaṣṭṛ had twin children, Saranyū as well as Triśiras He himself gave Saranyū in marriage to Vivasvat Then Yama and Yamī were begotten on Saranyū by Vivasvat. And these two also were twins but the elder of the two was Yama" (MACDONELL) This is based on *Nirukta* xii 10 त्वाष्ट्री सरण्यूर्विवस्वत आदित्याद् यमौ मिथुनौ जनयाञ्चकार

In the *Nirukta* यम is derived from यम् 'to restrain': यमो यच्छतीति सतः x. 20 (यच्छति उपरमयति जीवितात् सर्वं भूतग्राममिति यमः। D.)

[1] MUIR, *Sanskrit Texts*, V.

Hymn No. 8

YAMA

x. 14

म० १०. सू० १४

वैवस्वतो यम ऋषिः। यमो देवता। ६—लिङ्गोक्ता देवताः। ७-९ लिङ्गोक्ता देवता", पितरो वा। १०-१२—सरमापुत्रौ श्वानौ देवते। १-१२— त्रिष्टुप् छन्दः, १३,१४,१६—अनुष्टुप्; १५-बृहती।

1

परेयिवांसं प्रवतो महीरनु	परेयिऽवांसम् । प्रऽवतः । महीः । अनु
बहुभ्यः पन्थामनुपस्पशानम् ।	बहुऽभ्यः । पन्थाम् अनुऽपस्पशानम् ।
वैवस्वतं सङ्गमनं जनानां	वैवस्वतम् । सम्ऽगमनम् । जनानाम् ।
यमं राजानं हविषा दुवस्य ॥१॥	यमम् । राजानम् हविषा दुवस्य ॥१॥

He that hath departed (*pareyivā́ṁsam*) towards (*anu*) the great (*mahī́ḥ*) slopes (*pravátaḥ*) and hath spied out (*anu-paspaśānám*) a path (*pánthām*) for many (*bahúbhyaḥ*), him the son of Vivasvant (*Vaivasvatám*), the assembler of people (*jánānām saṅgámanam*), Yama the King (*Yamáṁ rā́jānam*) worship (*duvasya*) with oblation (*haviṣā́*).

'परेयिवांसम्' इति षोडशर्चं चतुर्दशं सूक्तं विवस्वतः पुत्रस्य यमस्यार्षम्। 'अङ्गिरसो नः पितरो नवग्वा' इति षष्ठ्या अङ्गिरःपित्रथर्वभृगुस्तुत्या लिङ्गोक्ता देवताः। 'प्रेहि' इत्याद्यास्तिस्रो लिङ्गोक्तदेवताकाः पितृदेवताका वा। 'अति द्रव सारमेयौ' इत्यादिकस्तृचः सरमापुत्रौ यौ श्वानौ परलोकमार्गाभिमानिनौ स्थितौ

तद्देवताः । शिष्टा यमदेवत्याः । 'यमाय सोमम्' इति त्रयोदशाद्या अनुष्टुभः । 'यमाय मधुमत्तमम्' इत्येषा बृहती । आदितो द्वादश त्रिष्टुभः । तथा चानुक्रान्तम् —'परेयिवांसं षोळश यमो यामं षष्ठी लिङ्गोक्तदेवता पराश्च तिस्रः द्विश्या वा तृचः श्वभ्यां परा अनुष्टुभो बृहत्युपान्त्या'[1] इति । गतः सूक्तविनियोगः[2] । महापितृयज्ञे यमयाग आद्या याज्या[3] । सूत्रितञ्च—'इमं यम प्रस्तरमा हि सीदेति द्वे परेयिवांसं प्रवतो महीरनु' [आ° २।१९।२२] इति ।

---

[1] ''षष्ठी लिङ्गोक्तदेवता । लिङ्गोक्तायाङ्गिरः पितृयमभृगवः । अत पराश्च तिस्रो लिङ्गोक्तदेवता । वेति लिङ्गोक्तदेवत्या पितृदेवत्या वा । अथ तृचः । श्वानौ सरमापुत्रौ अस्मनन्तं देवता । श्वभ्यां स्तुतिः सौति । श्वभ्यामिति तादर्थ्ये चतुर्थी ।' इति षड्गुरुशिष्य । तथा च बृहद्देवता । 'परेयिवांसमित्यत्र स्तूयते मध्यमो यमः अथर्वाणोऽथ भृगवोऽङ्गिरसः पितरः सह । षष्ठ्यां देवगणास्तत्र स्तूयन्ते शुभवत्तयः ॥ पितृभिश्चाङ्गिरोभिश्च संस्तुतो दृश्यते यमः । मातलिः सह यादि 'मातलि' पिता हि स ॥ सख्यायुर्भेन सूक्ते पितृभिः स्तूयते यमः । प्रेहि प्रेहीति लिङ्गैः प्रेता यत्र उदाहृता ॥ पितृणां हि पतिर्देवो यमस्तस्मात् स सूक्तभाक् । अतिद्रव तृचे श्वानौ पर पितृमुदीरताम् ॥ ६।१५५-१५८ ।

[2] दशमण्डलगतानां बहूनां सूक्तानां विनियोगः श्रौतसूत्रादिषु नोपलभ्यते । प्रातरनुवाके प्रातरनुवाकन्यायेन चाश्विनशस्त्रे सुबहूनां सूक्तानां शंसनस्य विधानात् येषां विनियोगो विशिष्य नोक्तस्तेषां तत्रैव विनियोगो बोद्धव्यः । एतच्च दशममण्डलगत प्रथमसूक्तस्य भाष्योक्त प्रकारेणावगम्यते ।

[3] 'चातुर्मास्ययागे साकमेधनामके पर्वणि अनीकवान् अग्निः सान्तपना मरुतः, गृहमेधिनो मरुतः, क्रीडिनो मरुतः, अग्निः, इन्द्रः, अग्निः, सोमः, सविता, सरस्वती, पूषा इन्द्राग्नी, इन्द्रो महेन्द्रो वा विश्वकर्मा चेति देवानुद्दिश्य यागाः अनुष्ठीयन्ते । तत्र प्रथम पूर्णयागानां पूर्वदिनेऽनुष्ठानं भवति, तत एव परदिनेऽनुष्ठीयते । उक्त यागानुष्ठानान्तरं पितृदेवताका इष्टिरनुष्ठीयते । सा च महापितृयज्ञशब्दे नोच्यते । तत्र सोमवन्तः पितरः पितृमान् वा सोमः, बर्हिषदः पितरः, अग्निष्वात्ताः पितरः यमः वैवस्वतो वा यम इति देवता । प्रतिदेवतम् अवानुवाक्याद्वयम् एका च याज्येति मन्त्रत्रयम् सुपयुज्यते । तत्र देवतात्वेन यम उद्दोत्ता यागकर्मे 'परेयिवांसम्' इत्येषा यमयागस्य याज्येत्यर्थः ।''

हे मदीयान्तरात्मन् यजमान वा, त्वं राजानम् पितॄणां स्वामिनं यमं हविषा पुरोडाशादिना दुवस्य परिचर। कीदृशम्? प्रवतः प्रकृष्टकर्मवतो भूलोकवर्ति-भोगसाधनं पुण्यमनुष्ठितवतः पुरुषान् महीः तत्तद्भोगोचितभूप्रदेशविशेषान् अनु परेयिवांसम् क्रमेण मरणादूर्ध्वं प्रापितवन्तम्। तथा बहुभ्यः स्वर्गार्थिभ्यः पुण्यकृद्भ्यः पुण्यकृतामर्थे पन्थां स्वर्गस्योचितं मार्गम् अनुपस्पशानम् अबाध-मानम्। पापिन एव पुरुषान् स्वर्गमार्गबाधेन नरकं प्रापयति न तु पुण्यकृत इत्यर्थः। वैवस्वतम् विवस्वतः सूर्यस्य पुत्रं जनानाम् पापिनां सङ्गमनम् गन्तव्यस्थानरूपम् ॥१॥

परेयिवांसम् परागतम् अत्यन्तविप्रकृष्टदेशे गतवन्तम्। उपेयिवाननाश्वाननूचानश्च [३।२।१०९] इति क्वस्वन्तो निपातितः। उपसर्गग्रहणमतन्त्रम्[1]। परागतिं विशिनष्टि। प्रवत महीः अनु प्रकृष्टवतीर्भूमीः प्रति। सर्वां भूमिमतिक्रम्य वर्तमानमित्यर्थः। उपसर्गाच्छन्दसि धात्वर्थे [५।१।११८] इति वतिः। अर्थग्रहणसामर्थ्याल्लिङ्गसंख्यायोगः[2]। किंच बहुभ्यः पितृलोकं गतेभ्यः पन्थां पन्थानं मार्गम् अनुपस्पशानम् अन्विष्यमवेक्ष्यमाणं। अवगच्छन्तमित्यर्थः। स्पशतिर्दर्शनकर्मा। एवंरूपं वैवस्वतं विवस्वतः पुत्रं जनानां मृतानां सङ्गमनम् प्राप्तिस्थानभूतम् एवं महानुभावं यमं राजानं हविषा सपर्यत* पूजयत। ॥१॥

[1] न धात्वोपसर्गसम्बन्धम्। धात्वोपसर्गं पूर्वाभिरूपमगांश भवत्येव। काशिका।

[2] "उपसर्गाच्छन्दसि धात्वर्थे" इति सूत्राद् धात्वर्थाभिधेये वतिप्रत्ययः। ननु [illegible] कथ लिङ्गसंख्याभ्यां योग.। उच्यते। उपसर्गाच्छन्दसि धात्वी [illegible] सामर्थ्याद् धात्वर्थः [illegible]। तथापि [illegible] धात्वर्थाभिधेये उपसर्गाद् वतिर्भवतीति। [illegible] लिङ्गसंख्याभ्यां [illegible]। [illegible] पुण्याङ्गमोऽर्थ इति। सायणम्। [illegible] इति। S. under AV 1 13 2

* A V reads सपर्यत for दुवस्य

† The second com. in each case is reprinted from Sāyana's Atharva Veda-bhāṣyam

The stanza occurs also in TA. vi. 1 1 where S explains exactly as under RV.

In the *Nirukta* the stanza is explained thus परेयिवांस पर्यागतवन्त प्रवत उद्वतो निवत इति। अवतिर्गतिकर्मा*। बहुभ्य पन्थामनुपस्पाशयमानम्, वैवस्वत सङ्गमन जनानां यमं राजान हविषा दुवस्येति। दुवस्यती राध्नोतिकर्मा। "Who has departed who has gone round the heavenly heights, *i e*, elevations, depressions The verb *av* means 'to go' The sense is and with oblation, worship the king Yama, the son of Vivasvat (the sun), who has shown the path to many and who is the rendezvous of men The verb *duvasyati* means to worship" (L SARUP)

परेयिवांसम्—Here and under TA vi 1 1 S takes the root as अन्तर्भूतण्यर्थ, but under Av xviii 1 49 he rightly takes it in its ordinary sense *Cf* परेयु in st 2

मही —मही is a well established adjective, the fem of मह्, *cf* महो महीं सुष्टुतिमीरयामि, I utter forth a mighty eulogy of the mighty one ii 33 8 In the *Nighantu* मही is read in the list

* MSS and printed editions read अवतिर्गतिकर्मा and commentators have racked their brains in vain to offer a reasonable explanation Durga says अवतिर्गतिकर्मा इत्येतदस्य निर्वचन कथ सम्बध्यत इति विचारयितव्यम्। अथवा प्रवत इत्यवतिरेवायमादिगुण अपूर्व इति भाष्यकाराभिप्राय। Skanda Maheśvara merely says उपसर्गाश्छन्दसि धात्वर्थे इत्येव वतिशतो बहुवचनम्। प्रवच्छेन गमनेन सहती प्राप्तवतीरित्यर्थः। SARUP says· It is not clear why Yaska introduces the verb *av* 'to go' Durga does not throw any light on it "

It is just possible however that the correct reading is प्रवतिर्गत्यर्थ as प्रवते along with अवति and चवते is found in the *Nighantu* in the list of गतिकर्म roots In *Nir* xi 38 प्रवतति is explained as प्रपवति It would appear therefore that Yaska derives प्रवत् from ह्व 'to go with प्र and explains प्रवत as उद्वत and निवत

2

यमो नो गातुं प्रथमो विवेद	यमः । नः । गातुम् । प्रथमः । विवेद ।
नैषा गव्यूतिरपभर्तवा उ ।	न एषा । गव्यूतिः । अपऽभर्तवै । ऊँ इति ।
यत्रा नः पूर्वे पितरः परेयु-*	यत्र । नः । पूर्वे । पितरः । पराऽईयुः ।
रेना जज्ञानाः पथ्या३ अनु स्वाः ॥२॥	एना । जज्ञानाः । पथ्याः । अनु । स्वाः ॥२॥

Yama (*Yamáh*) for us (*naḥ*) the way (*gātúm*) hath first found out (*prathamáh viveda*); this pasture (*eṣā́ gávyūtiḥ*) is not to be taken away (*ná apabhártavai u*). Whither (*yátra*) our former fathers (*naḥ pū́rve pitáraḥ*) have departed (*pareyúḥ*) thither (*enā́*) those that have been born since (*jajñānā́ḥ*) tread along their own roads (*svā́ḥ pathyā̀ḥ ánu*)

प्रथमः सर्वेषां मुख्यो यमो नः अस्माकं प्रजानां गातुम् शुभाशुभनिमित्तं, विवेद जानाति । एषा गव्यूतिः न अपभर्तवै उ । अतिशयज्ञानयोगाद् यमस्य न केनचिदपहर्तुमपनेतुं शक्यत इत्यर्थः । यत्र यस्मिन् मार्गे नः अस्माकं पूर्वे पितरः परेयुः एना अनेन मार्गेण गच्छन्तो जज्ञानाः जाताः सर्वे स्वाः स्वभूताः पथ्याः स्वकर्ममार्गभूता गतीः अनु गच्छन्ति ॥२॥

यमो देवः नः अस्माकं सम्बन्धिनां मृतानां गातुं मार्गं प्रथमः पूर्वगामी सन् विवेद अजानात् । उ अपि च एषा मृतेन गन्तव्या यमेन नेतव्या गव्यूतिः पद्धतिः । मार्ग इत्यर्थः । "गोर्यूतौ छन्दसि" [६।१।७९।२] इति वान्तादेशः । अपभर्तवै अपहर्तुं देवैः मनुष्यैः वा परिहर्तुं न शक्येति शेषः । अवश्यं गन्तव्यैवेत्यर्थः । आत्मसाक्षात्काररहितैः पुरुषैः स्वकर्मफलभोगाय पितृलोकप्राप्तेरावश्यकत्वात् । अपभर्तवै इति । तवै चान्तश्च युगपत् [६।२।५१]

* AV. xviii. 1. 50 reads परेताः for परेयुः.

इत्युभयपदप्रकृतिस्वरत्वम् । यत्र यस्मिन् मार्गे नः अस्माकम् पूर्वे पूर्वभाविनः पितरः परेताः परागताः । येन च मार्गेण पुनरागत्य जज्ञानाः जाताः सर्वे स्वाः स्वीयाः स्वस्वकर्मानुरोधिनीः पथ्याः हितकरा* भूमीर्गच्छन्ति । स्वस्वकर्मोपार्जितानि स्थानानि स्वेषां हितानि भवन्ति । तं मार्गं यमो विवेदेति पूर्वत्र सम्बन्धः ॥२॥

गातुम्—path, way, place, from गा 'to go', *cf.* class. ओघातु Yama *was the first mortal to die and discover the way of the departed.* Skt. *gātu h*, Av. *gatu š*, O P. *gaθu* The word is read in *Nigh* I 1, among the synonyms of the earth In the *Nirukta* (IV 21) गातु यज्ञाय गातु यज्ञपतये is explained as गमनं यज्ञाय गमनं यज्ञपतये. In the *Aitareya Aranyaka* S explains गातु as गन्तव्य मार्गं. 'कमिमनिजनिगाभायाहिभ्यश्च' [उ° १।७३] इत्यौणादिकः तु । *gatu is derived both from* गा 'to go' and गा 'to sing', of these the former became obsolete in classical Skt, the latter remained as an agent noun "गातुः पुंस्कोकिले भृङ्गे गन्धर्वे गायनेऽपि च" इति विश्व ।

गव्यूति—बहुव्रीहि of गो and ऊति with euphonic य, lit. having food for cattle, then pasture, then by generalisation as in the case of many words with गो as one of their members, abiding-place Acc to Sanskrit Grammar the components are गो and यूति

अपभर्तवै—Dat. infinitive of अप-भृ with a passive sense [1] Infinitives in तवै are merely extended forms of the dative inf in तवे and are doubly accented, *e g*, *é tavai* 'to go' *pa´tavái* 'to drink', *hantavai* 'to slay' (x 125 6) etc Class अपहर्तुम् 'तवैतोश्चन्दसि'।

पितर —'To the Fathers correspond the Fravashis among the Iranians, the "*heroes of the past" and the Theoi Patrōioi* among the Greeks, the Divi Manes and Lares among the Romans' KAEGI, p 159

एना—is often used as an Instrumental adverb, meaning 'in this way' V. G. S, p 210 Here, however, it is clearly correlative to यत्र *Cf.* AV. IX 9 22

यत्रा सुपर्णा अमृतस्य भक्षमनिमेषं विदथाभिस्वरन्ति ।
एना विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्राविवेश ॥

---

* One expected हितकरीर्भूमीः

[1] *Cf* पतिविद्ये v 62. 9.

of पृथिवीनाम बाहुनाम, गोनाम and द्यावापृथिवीनाम *Cf* AV xviii 4 7 तीर्थैस्तरन्ति प्रवतो महीरिति by crossings they cross to the mighty heights

प्रवत —Indian commentators generally follow the order of words in the text and construe प्रवत as an adj to मही European commentators follow the maxim पाठक्रमादर्थक्रमो बलीयान् and holding as they do that प्रवत्, उद्वत् and निवत् are abstract nouns regard मही as an adj to प्रवत[1] The word प्रवत् cannot be derived with the suffix मतुप् for the simple reason that मतुप् is unaccented and प्रवत् is accented on the second syllable AVS correctly derives it with वति from प्र acc to उपसर्गाच्छन्दसि धात्वर्थे "The suffix vat forms seven feminine abstract substantives with a local sense, from adverbs or prepositions अर्वावत् 'proximity', आवत् 'proximity', उद्वत् 'height', निवत् 'depth', परावत् 'distance,' प्रवत् 'height', संवत् 'region,' MACDONELL, *Vedic Grammar*, § 233" In every case the suffix is accented *Cf* याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम्। आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः॥ RV I 35 3 'The god goes by the upward by the downward path, adorable he goes with his two bright steeds God Savitar comes from the far distance chasing away all sorrows'

यमाय —मृतस्य यमोऽस्य स्वत्वकरोऽस्य पन्थाः । Dativus commodi

पथिन्—class पथिन् The following forms are found in RV Nom sing पन्थाः Nom pl पन्थाः,[2] Acc sing पन्थाम्, Instr sing पथा Instr pl पथिभिः, Gen pl पथाम्, Loc pl पथिषु A stem पन्थान् makes its appearance in AV and VS which show पन्थानः exclusive

---

[1] The fact that we have everywhere प्रवतो महीः and not महीः प्रवतः is in favour of the view of Indian commentators Whitney translates 'the paths called great' On the other hand प्रवत् is used by itself in a [illegible] AV vi 28 3

[2] The Nom pl pathas occurs in RV i 100 3 and the Gen pl pathīnām in v 1 11.

ly in the Nom. pl., although in the Acc. sg. पन्थाम् is still the usual form. पन्थान and पन्थानम् evidently owe their origin to *पन्थान and *पन्थानम्. (A. G. III, pp. 302 f.) Av. *pantam*, beside *pantānəm* which occurs only once.

अनुपस्पशानम्—perf. part. Ā of स्पश् 'to spy' 1Ā preceded by अनु. *Cf.* AV. vi. 28. 3: यः प्रथमः प्रवतमाससाद बहुभ्यः पन्थामनुपस्पशानः। यो ३स्येशे द्विपदो यश्चतुष्पदस्तस्मै यमाय नमो अस्तु मृत्यवे॥

वैवस्वतम्—In the Avesta also Yima the first of men and ruler of paradise is the son of Vīvanhant.

सङ्गमनम्—formed from the causal root; *cf.* अहं राष्ट्री सङ्गमनी वसूनाम् x. 125. 2. "In the Avesta, Vd. ii. 21 Yima makes a gathering (*hanjamanəm*) of mortals. *Cf.* Ἀιδέω ἀγεσίλαος." LANMAN. "Yama is the first man, so also the first to arrive in the realm of the Immortals, the natural head of those who are destined, each in his turn, to follow him thither. Therefore he is called in x. 135. 1 the 'lord of races, the father,' and in x. 14. 1 the 'gatherer of the peoples.' *Cf.* AV xviii. 3. 13 यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम्। वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा सपर्यत॥"

यमं राजानम्—Yama is often called राजन् in RV but never देव. In the Avesta also the title *xšaēta* ("ruler") is always added to the name of Yima and from this full name Yima Xšaētō arose the word *Jamshid*. In classical Sanskrit and many Indian vernaculars also we generally speak of Yama-rāja. *Cf.* वैराज्ञ मनमुल् यमराजसहोदर। यमः सावकदेव वेद: ... धर्माणि च॥

दुवस—2 sing. imp. pres. of दुवस् 'gift' from दु collateral form of दा 'to give'. The denominative must have grown obsolete by the time of AV. which substitutes सपर्यत for दुवस. It is the sacrificer that is addressed. In the AV. the plural form is used.

जज्ञाना—perf part A of जन् 'to be born' Geldner (*Vedische Studien*, II 233 289) thinks there is here a clear reference to metempsychosis 'they are born each according to his (fate's) path'' G regards जज्ञाना here as equivalent to a finite verb (Z D M G 63 347)

पथ्या—pathways The stem is पथ्या fem with final स्वरित This is Vedic Classical पथ्य Under iii 14 3 S derives it thus पथिषु साधव इत्यर्थे तत्र साधुरिति यत्। भस्याढे इति टिलोपः। तित्स्वरितम् इति स्वरितः।[1] Since an independent Svarita is immediately followed by an उदात्त we have कम्पस्वर here See pp 129-130

3

मातली कव्यैर्यमो अङ्गिरोभि-	मातली। कव्यैः। यमः। अङ्गिरःऽभिः।
र्बृहस्पतिर्ऋक्वभिर्वावृधानः।	बृहस्पतिः। ऋक्वऽभिः। ववृधानः।
याँश्च देवा वावृधुर्ये च देवान्त्	यान्। च। देवाः। ववृधुः। ये। च। देवान्।
*स्वाहान्ये स्वधयान्ये मदन्ति ॥३॥	स्वाहा। अन्ये। स्वधया। अन्ये। मदन्ति ॥३॥

Matali with the Kavyas (*Mātalī Kavyaiḥ*), Yama with the Aṅgirases (*Yamaḥ Aṅgirobhiḥ*), Bṛhaspati with the Ṛkvans (*Bṛhaspatiḥ Ṛkvabhiḥ*) having grown strong (*vāvṛdhānaḥ*)—those whom the gods have made strong (*yān ca devāḥ vāvṛdhuḥ*) and those who [have made strong] the gods (*yé ca devān*), some (*anyé*) rejoice in (*madanti*) the exclamation Svāhā (*Svā́hā*), others (*anyé*) in the oblation (*Svadháyā*)

---

[1] Though यतोऽनावः 6. 1. 213 supersedes तित् स्वरितम् here, still यतोऽनावः is regarded by S. as अनित्य 'यतोऽनावः' इत्याद्युदात्तत्वं अनित्यम् इति 'ईडेन्यो नमस्यः' इत्यत्र दर्शितम्। S. under RV i 71 4.

* AV. xviii, 1. 47. reads *d* as ये चोऽस्य पितरो हवेषु.

आग्निमारुते 'मातली कव्यै'रित्येषा धाय्या[1]। सूचितञ्च—'इमं यम प्रस्तरमा हि सीद मातली कव्यैर्यमो अङ्गिरोभिरुदीरतामवर उत्परासः' [आ° श्रौ° ५।२०।६] इति।

मातली मातलिरिन्द्रस्य सारथिः, तद्वानिन्द्रो मातली। स कव्यैः कव्यभागिभिः पितृभिः सह वावृधानः वर्धमानो भवति यमः च अङ्गिरोभिः पितृविशेषैः सह वर्धमानो भवति। [बृहस्पतिः ऋक्वभिः ऋक्प्रतिपाद्यैः पितृविशेषैः सह वर्धमानो भवति*।] तत्र देवा इन्द्रादयो यान् च कव्यभागादीन् पितॄन् वावृधुः वर्धयन्ति ये च कव्यभागादयः पितरो देवान् इन्द्रादीन् वर्धयन्ति तेषां मध्ये अन्ये इन्द्रादयः स्वाहा मदन्ति स्वाहाकारेण हृष्यन्ति। अन्ये पितरः स्वधया स्वधाकारेण हृष्यन्ति ॥३॥

मातली यमो बृहस्पतिश्च पितॄणां नेतारो देवाः। अत्र मातली नाम देवः [कव्यैः] एतत्संज्ञकैः पितृभिः सह वावृधानः वर्धमानो भवति यजमानप्रत्तेन हविषा। तथा यमः देवः अङ्गिरोभिः पितृभिः सह। यमस्य देवत्वं पितृत्वं चेति द्वैरूप्यमस्ति। अत्र देवत्वं विवक्षितम्। तथा बृहस्पतिः देवोऽपि ऋक्वभिः अर्चनीयैः [एतन्नामकैः पितृभिः सह वावृ]धानः। तत्र यान् च पितॄन् देवाः मातल्यादयः प्रमुखाः सन्तः वावृधुः वर्धयन्ति यज्ञे। ये च पितरः कव्यादयः देवान् निर्दिष्टान् वावृधुः वर्धयन्ति। स्वधाप्रदाने। ते अत्र निर्दिष्टाः पितरः नः अस्मान् हवेषु आह्वानेषु अवन्तु रक्षन्तु ॥३॥

मातली—It will be noticed that in the com. on AV. S. simply says मातली नाम देवः, but here, under TS. ii, 6. 12. 5, etc., he identifies him with Indra. The process of identification is not sound, as Mātali always ends in long ī in the three passages in

---

1 "सोमयागे द्वितीयसवने होतुर्द्वितीयं शस्त्रमाग्निमारुतं नाम। तस्मिन्शस्त्रे धाय्यार्थे-नैषा विनियुक्ता। धाय्या नाम मन्त्रभेदो पठनीया यत्र।"

* This is not found in any MS. We have supplied it from the com. on TS. ii. 6. 12. 5.

which it occurs in AV, and further if the suffix *in* be added to the *i* stem the word would be accented on the suffix S might have said मातली मन्देगाव स्न्दो लक्ष्यते

कव्यैः—कव्य from कवि means originally wise, as masc pl, a class of Pitrs In later literature कव्य is generally used along with हव्य and means the food offered to the Pitrs Unlike स्वाहा and स्वधया in *d* which are instrumentals proper, कव्यैः is the sociative instrumental (सहार्थे तृतीया)

अङ्गिरोभिः—The Angirases, a great family of priests are mentioned here as a great group of ancestors They are generally associated with Brhaspati who is called Angirasa See p 38

ऋक्वभिः—*Rkvan* like *Maghavan* is formed with the possessive suffix वन् before which ऋच् is regarded both as पद and as भ, पदत्वात् कुत्वम् भत्वात् जश्त्वाभावः The Rkvans also are a class of ancestors Brhaspati's association with the Rkvans is well known, *cf* स सुष्टुभा स ऋक्वता गणेन iv 50 5 There was the same confusion between van and vant stems in the case of ऋक्वन् as in the cases of अर्वन् and मघवन्

वावृधानः—perfect part A of वृध् 'to grow' Note the lengthening of the reduplicating vowel as in the case of वावशान, वावन्, जागृ, etc (V G S, p 155 9) Pp shows the short vowel

यांश्च etc —*Cf* the very common expression योऽस्मान् द्वेष्टि यं च वयं द्विष्मः.

वावृधुः—perfect 3 pl. of वृध् The ancestors make the gods strong with the offerings and the gods make the ancestors strong with their aid For a somewhat similar idea *cf* सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् (*Raghu* i 26) and देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ *Gītā* iii 11

स्वाहा—स्वाहेति देवानां हविर्दाने। "स्वाहाकारेण वा वषट्कारेण वा देवेभ्योऽन्नं प्रदीयते" इति श्रुतेः। कौशिकसूत्रम् [११६]—'स्वाहाकारवषट्कारप्रदाना देवाः, स्वधाकारनमस्कारप्रदानाः पितरः' इति। अत एव यास्केनोक्तम्। 'स्वाहेत्येतत् सु आहेति वा, स्वा वागाहेति वा, स्वं प्राहेति वा, स्वाहुतं हविर्जुहोतीति वा' [नि॰ ८.२१] इति। S on AV. ii 16 1

स्वधा—like स्वस्ति, स्वधा was declined in RV where it meant a funeral offering to the Pitrs अध स्वधा अधयत् i 144 2 'then drank स्वधा s' The later form of the word appears to be सुधा even as सुस्थ would appear to be the later form of स्वस्थ

In the *Nighantu* (i 12) स्वधा is read among the synonyms of उदक and of अन्न (स्वधे figures among synonyms of द्यावापृथिवी) Later it came to be used as an exclamation uttered on presenting an oblation to the Pitrs 'स्वेभ्यो धीयते स्वस्मिन् वा धीयत इति स्वधा। यज्ञार्थे काविधानम् इति च। स्वम् आत्मानं सौभाग्यशरीरं दधाति पुष्णातीति वा स्वधा। अन्नो ज्युपसर्गे च।' S on AV ii 29 7

स्वाहान्ये स्वधयान्ये—Matali, Yama and Brhaspati rejoice in the exclamation स्वाहा and the Kavyas, Angirases and Rkvans in the funeral oblations offered to them

4

इमं यम प्रस्तरमा हि सीदा-	इमम् । यम । प्रऽस्तरम् । आ । हि । सीद ।
ङ्गिरोभिः पितृभिः संविदानः ।	अङ्गिरःऽभिः । पितृऽभिः । सम्ऽविदानः ।
आ त्वा मन्त्राः कविशस्ता वह-	आ । त्वा । मन्त्राः । कविऽशस्ताः । वहन्तु ।
न्त्वेना राजन्हविषा मादयस्व* ॥४॥	एना । राजन् । हविषा । मादयस्व ॥४॥

On (*ā*) this strewn grass (*imam prastaram*) O Yama (*Yama*), be seated (*sīda*), joining thyself (*saṁvidānaḥ*) with the Angirases, the Pitrs (*Angirobhiḥ pitṛbhiḥ*) Let the spells (*mantrāḥ*) recited by wise men (*kaviśastāḥ*) bring thee (*tvā ā vahantu*) Rejoice (*mādayasva*) O King (*rājan*), in this oblation (*enā haviṣā*)

* AV xviii 1 60 reads रोह for सीद in *a* and हविष for हविषा in *d*

महापितृयज्ञे यमस्य 'इमं यमे'त्यादिके द्वे अनुवाक्ये[1]। 'इमं यम प्रस्तरमा हि सीदेति द्वे' [आ° श्रौ° २।१९।२२] इति हि सूत्रितम्। सैवाग्निमारुतेऽपि धाय्या। सूक्तं पूर्वमेवोदाहृतम्[2] ॥

हे यम, अङ्गिरोभिः एतन्नामकैः पितृभिः संविदानः ऐकमत्यं गतस्त्वम् इमं प्रस्तरम् विस्तीर्णं यज्ञविशेषम् आसीद आगत्योपविश। हि यस्मादेवं तस्मात् कविशस्ताः विद्वद्भिर्ऋत्विग्भिः प्रयुक्ता मन्त्राः त्वा त्वाम् आवहन्तु। हे राजन्, एना एतेन हविषा तुष्टो मादयस्व यजमानं हर्षय ॥४॥

हे यम इमं पुरत आस्तीर्णं प्रस्तरं बर्हिषम्। उपस्तीर्णो दर्भः प्रस्तरः। प्रे स्त्रोऽयज्ञे [३।३।३२] इति निषेधाद् घञभावः। ऋदोरप् [३।३।५७]। तं प्रस्तरम् आ सीद। हि इति पादपूरणः। किमेक एव? नेत्याह। अङ्गिरोभिः एतन्नामकैः पितृभिः सह संविदानः ऐकमत्यं प्राप्तः। 'समो गम्यृच्छि°' [१।३।२९] इत्यात्मनेपदम्। [हे राजन्] त्वा त्वां कविशस्ताः कविभिः क्रान्तप्रज्ञैर्महर्षिभिः स्तुताः मन्त्राः आह्वानसाधनाः आ वहन्तु आह्वानं कुर्वन्तु आगमयन्तु। आगत्य ■ एना एतेन अनेन। द्वितीयाटौस्स्वेनः [२।४।३४] इत्येनादेशः। सर्वविधीनां छन्दसि विकल्पितत्वाद् इनादेशाभावः। हविषः। तृतीयार्थे षष्ठी। हविषा अस्माभिर्दत्तेन मादयस्व ॥४॥

प्रस्तरम्—from स्तृ to strew means primarily straw strewn grass In class Skt it means rock

आ सीद—transitive The verb is accented because of हि

संविदान —pr part Ā of विद् 'to find' which in RV is both पदादि and जुहोत्यादि

मादयस्व—स्वाट् विष, cf स्वाहाभिः स्वधयान्ये मदन्ति 3 d The sense of विष् is clear in मदिरा मा शक्तो मादयन्ति x 94. 1

---

1 "चातुर्मास्यपर्णीय तृतीये महापितृयज्ञे (पृ २५१) यमदेवतापक्षे इम यमेत्यादिके द्वे यथाक्रमयाज्याऽनुवाक्ये विनियुज्येते। अनुवाक्या नाम हविषा यज्ञपात्रवर्ते पठ्यमाना ऋक। सा च सर्वत्रैव भवति, यस्मात् याज्याऽनुवाक्याद्यं भवति इति पूर्वसूत्रमेव (पृ २५१)।"

2 पूर्वस्मिन् सूक्ते भाष्ये (पृ: २५८)।

अङ्गिरोभिरा गहि यज्ञियेभि-
र्यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता ते
ऽस्मिन्यज्ञे बर्हिष्या निषद्य ॥५॥

अङ्गिरःऽभिः | आ | गहि | यज्ञियेभिः ।
यम | वैरूपैः | इह | मादयस्व ।
विवस्वन्तम् | हुवे | यः | पिता | ते ।
अस्मिन् | यज्ञे | बर्हिषि | आ | निऽसद्य ॥५॥

Come here (*ā́ gahi*) with the reverend Aṅgirases (*yajñíyebhih aṅgirobhih*). O Yama (*Yáma*) rejoice here (*ihá mādayasva*) with the sons of Virūpa (*Vairūpaih*) I invoke (*huve*) Vivasvant (*Vivasvantam*) who is thy father (*yáh pitā́ te*). [Let him rejoice] being seated (*niṣadya*) on the Kuśa grass (*barhíṣi ā́*) in this sacrifice (*asmin yajñé*)

हे यम, वैरूपैः विविधरूपयुक्तैर्विरूपसामप्रियैर्वा यज्ञियेभिः यज्ञयोग्यैः अङ्गिरोभिः सह आगहि आगच्छ। आगत्य च इह अस्मिन् यज्ञे मादयस्व यजमानं हर्षय। यः विवस्वान् ते तव पिता अस्ति अस्मिन् यज्ञे तं विवस्वन्तं हुवे आह्वयामि। स चास्तीर्णे बर्हिषि आ निषद्य उपविश्य यजमानं हर्षयतु ॥५॥

हे यम इह अस्मिन् कर्मणि अङ्गिरोभिः एतन्नामकैः पितृभिः सह आ गहि आगच्छ। कीदृशैः? यज्ञियैः यज्ञार्हैः। एवं वैरूपैः विरूपाख्यस्य महर्षेः गोत्रजैः सह आगहि। आगत्य च इह अस्मिन् यज्ञे मादयस्व तर्पयस्व। न केवलं त्वामेव ह्वयामि, किन्तु ते तव यः पिता विवस्वान् आदित्यः तं विवस्वन्तं हुवे आह्वयामि। ह्वयतेर्लिटि 'बहुलं छन्दसि' [६।१।३४] इति सम्प्रसारणम्। अस्मिन् बर्हिषि आस्तीर्णे निषद्य यथा हविः स्वीकरोति तथा आह्वयामीति शेषः। आभिमुख्येन निषद्य इति वा ॥५॥

यज्ञियेभिः—worthy of sacrifice. 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्'। यज्ञियानाम् occurs in the next stanza and in x. 125 3.

वैरूपे.—Children of Virupa The Virūpas are a subdivision of the Angirases "Virūpa is mentioned in i. 45. 3, viii 64 6 and the Virūpas in iii 53 6 and x 62 5" MUIR Note that वैरूपैः is not analysed in the Padapātha See p 293

हुवे—Oldenberg holds (Z D M.G. 59, 355) that हुवे appears also as 2 sing imperative Ātm In that case we should translate 'call Vivasvant who is thy father' and there will be no occasion for resorting to अध्याहार to secure समान कर्तृकत्व But it is doubtful how far Oldenberg's view is correct And in this particular case Old thinks that since the priest has already invoked Yama, it would appear more appropriate for him to say 'I invoke thy father Vivasvant' than to say Invoke, Yama, thy father V'; (Ib. 359).

Old points out that that the subject of निषद्य is the deity is clear from RV iii. 35 6, i 101 9, TS i 7. 13 4

आ निषद्य—पूर्वत्र यच्छब्दश्रुतेरत्र तच्छब्दाध्याहारः, मादयस्वेति विभक्तिविपरिणामेन चान्वयः।

d occurs in iii 35 6 also from which it appears to have been borrowed here

6

अङ्गिरसो नः पितरो नवग्वा	अङ्गिरसः । नः । पितरः । नवऽग्वाः ।
अथर्वाणो भृगवः सोम्यासः ।	अथर्वाणः । भृगवः । सोम्यासः ।
तेषां वयं सुमतौ यज्ञियाना-	तेषाम् । वयम् । सुऽमतौ । यज्ञियानाम् ।
मपि भद्रे सौमनसे स्याम ॥६॥	अपि । भद्रे । सौमनसे । स्याम ॥६॥

The Aṅgirases, our fathers (*A´ṅgirasaḥ naḥ pitáraḥ*) the Navagvas, the Atharvans, Bhṛgus, the Soma loving (*Návagvāḥ, Átharvāṇaḥ, Bhṛ́gavaḥ somyā́saḥ*): we (*vayám*) would be (*syā́ma*) in the favour (*sumataú*) of those worshipful ones (*téṣām yajñíyānām*), as also (*ápi*) in their excellent (*bhadré*) loving-kindness (*saumanasé*)

अङ्गिरसः अङ्गिरोनामका अथर्वाणः अथर्वनामका भृगवः भृगुनामकाश्च नः अस्माकं पितरो नवग्वाः* अभिनवगमनयुक्ता यद्वा नूतनवत् प्रीतिजनका इत्यर्थः। ते च सोम्यासः। सोममर्हन्तीति सोम्याः। यज्ञियानाम् यज्ञार्हाणां तेषां सुमतौ अनुग्रहयुक्तायां बुद्धौ वयं स्याम सर्वदा तिष्ठेम। अपि च सौमनसे भद्रे सौमनसस्य कारणे कल्याणे फले स्याम सर्वदा तिष्ठेम ॥६॥

अङ्गिरसः एतन्नामानः अङ्गारात्मकाः। "येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्" [ऐ॰ ब्रा॰ ३।३४] इति निरुक्तम्। एवं महर्षयः नः पितरः [अस्माकं पितरः नवग्वाः नूतनस्तुतिका नवभिर्मासैरुद्गता वा। तथा अथर्वाणः च नः पितरः भृगवः च नः पितरः। "भृगुर्भृज्यमानो न देहेऽङ्गारेषु" [नि॰ ३।१७] इति निरुक्तम्। एते सर्वे सोम्यासः सोमार्हाः सोमसम्पादिनः। एषामङ्गिरःप्रभृतीनाम् ऋषिगणमध्ये प्राधान्यादिदानीन्तनानामपि प्राचुर्येण तद्गोत्रत्वात् पितृत्वम्। यज्ञियानां यज्ञार्हाणां तेषां सुमतौ शोभनायाम् अनुग्रहरूपायां बुद्धौ वयं स्याम भवेम। तेषां सुमतिरस्मासु भवेदित्यर्थः। अपि अपि च तेषां भद्रे कल्याणे सौमनसे। सुमनसो भावः सौमनसम्। युवादिषु [५।१।१३०] पाठो द्रष्टव्यः। तत्र स्याम भवेम। उक्तस्यैवार्थस्य स्पष्टाभिधानमेतत् ॥६॥

नवग्वाः—The word has been variously explained:

(1) a group of nine priestly ancestors,

(2) priests who win nine cows a-piece,

(3) priests who go out in sets of nine,

(4) नवग्व is the same as Lat. *nuntius*.

Daśagva was formed after the pattern of Navagva. S. explains the formation thus under RV. i 62. 4: नवशब्दे उपपदे गमेर्भावे

* "'अङ्गिरसो नः पितरो नवग्वाः' इति सामानाधिकरण्यदर्शनात् अङ्गिरसो नवग्वा इत्युच्यन्ते। ते किल तपस्यन्तो नवभिर्मासैः सिद्धिं गताः।" Skandasvāmin on RV. i. 33. 6. "मेधातिथिप्रभृतयोऽङ्गिरसः केचिन्नव मासान् सत्रमनुष्ठाय फलं लेभिरे, केचिद्दश मासान्। तत्र ये नव मासान् सत्रमनुष्ठाय लब्धफला उदतिष्ठन् ते नवग्वाः। ... ये दश मासान् सत्रमनुष्ठाय लब्धफला उदतिष्ठन् ते दशग्वाः।" S. under RV. iii 39. 5.

क्विपि 'गमः क्वौ' [६।४।४०] इत्यनुनासिकलोपे 'ऊ च गमादीनामिति वक्तव्यम्' [६।४।४०।२] इत्यूकारान्तादेशः। नवभिः गूः गमनं येषां ते नवग्वाः। अकारोपजनश्छान्दसः। पूर्ववद् बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्।

अथर्वाणः—"The name in the singular denotes the head of a semi-divine family of mythical priests" "Atharvan first established order by sacrifices, while the Bhrgus showed themselves gods by their skill (x. 92. 19)." "In the plural the Atharvans are enumerated as Fathers along with the Angirases, Navagvas and Bhrgus. They dwelt in heaven and are called gods. They destroy goblins with a magical herb (AV. 11. 6. 13, 4 37. 7)." *Vedic Mythology*.

भृगवः—The Bhrgus are connected with the discovery of the fire, its lighting up and its care. The word Bhrgu clearly means shining, from the root *bhrāj*. Bhrgu has been held to be originally the designation of the fire, or more especially the lightning, and the Greek Phlegyai have been compared [redacted] fire priests The comparison is not certain; it is, however, clear that the Bhrgus are mythical fire-priests, possibly, but not probably, the historic reminiscence of an actual family. KEITH, pp. 225-6. There are two popular papers on the "Ancient Bhrgus" in the *Journal of Oriental Research*, Vol V, Parts I and II.

सोम्यास.—see p 78

This stanza is explained in *Nir.* xi 19 thus : अङ्गिरसो नः पितरो नवगतयो नवनीतगतयो वा, अथर्वाणः भृगवः सोम्याः सोमसम्पादिनः तेषां वयं सुमतौ कल्याण्यां मतौ यज्ञियानामपि येषां भद्रे भन्दनीये भाजनवति वा कल्याणे मनसि स्यामेति। (नवगतयः पितृयागागतं येषां प्रतिमासं नवा गतिर्भवति। नवनीतगतयः नवनीतं प्रति येषां मनसो गतिरिदमाकर्त्तिमिति। ते नवग्वाः। विज्ञायते हि "स्वयं विन्दोने पितृयाम्" इति। भन्दनीये स्तुत्ये। भाजनवति येन मनसा भाजयन्ति अभिमतैरर्थैः स्तोतॄन् तस्मिन् सौमनसे च भद्रे सौमनसे वा अप्यवहारी स्याम इत्यर्थः।

सौमनसे—Not analysed in the Pada text, because the first member सु which has undergone lengthening is a monosyllable and ends in a vowel. The form in class. Skt. is सौमनस्ये. "सुमनसो भावः सौमनसम्। 'तस्येदम्' इति सम्बन्धमात्रविवक्षायाम्। स भाव भावप्रत्यये सम्बन्धविशेषे पर्यवस्यति। यथा, 'ब्राह्मणादिभ्योऽण्' इति आर्षे अण्। दृढादिष्वस्य पाठो द्रष्टव्यः। S under i. 76. 2.

तेषां वयं सुमतौ etc —तस्य वयम् etc. RV III 1 21, III. 59 4, VI 47. 13, X 181 7, AV VII 92. 20, 125 7 etc.

7

प्रेहि प्रेहि पथिभिः पूर्व्येभि-	प्र । इहि । प्र । इहि । पथिऽभिः । पूर्व्येभिः ।
र्यत्रा नः पूर्वे पितरः परेयुः ।	यत्र । नः । पूर्वे । पितरः । पराऽईयुः ।
उभा राजाना स्वधया मदन्ता	उभा । राजाना । स्वधया । मदन्ता ।
यमं पश्यासि वरुणं च देवम् ॥७॥	यमम् । पश्यासि । वरुणम् । च । देवम् ॥७॥

Go forth (*prĕhi*), go forth (*prehi*) by the ancient (*purvyĕbhih*) paths (*pathibhih*) whither (*yatra*) our (*nah*) former (*purve*), fathers (*pitarah*) departed (*pareyuh*) Thou shalt look on (*paśyasi*) Yama and the god Varuna (*Yamam Varunam ca devam*), both kings (*ubhā rājana*) rejoicing in oblation (*svadhaya mádanta*)

सत्रमध्ये दीक्षितस्य मरणे 'प्रेहि'त्याद्याः पञ्चर्चस्तृतीयावर्जिता होत्रा शंसनीयाः[1] । सूत्रितञ्च—'प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति पञ्चानां तृतीयामुद्धरेत्' [आ° श्रौ° ६।१०।१९] इति ॥

यत्र यस्मिन् स्थाने नः अस्माकं पूर्वे पुरातनाः पितरः पितामहादयः परेयुः पूर्व्येभिः पूर्वस्मिन् काले भवैः[2] । अनादिकालप्रवृत्तैरित्यर्थः । पथिभिः

[1] 'समानकर्तृभिरष्टौ द्वादशावरैश्चतुर्विंशतिपरमैरनुष्ठीयमानाः सोमयागविशेषाः सत्राणि नाम, येषां यागानां विधानावसरे ब्राह्मणवाक्ये दृशधातोर्वा आस्धातोर्वा बहुवचनान्तस्य प्रयोगः क्रियते । ते चाग्निहोत्रिणः सम्भूय यागं कुर्वन्तः कर्मकौशलार्थमेकस्यैकस्यैकं कार्यं निर्णीय कल्पितया यजमानरूपया [illegible] भूत्वा याममनुतिष्ठन्ति । तत्र यो यजमानस्तस्य दीक्षित इत्युक्तिः । तस्य दीक्षितस्य चेत् सत्रकर्ममध्ये मरणं तदा स श्मशानं नीत्वा दाहोत्तरं यज्ञमागत्य तदह कर्तव्यं समापयेयुः । तत्र होता तद्दिनकर्तव्ये स्तोत्रमन्त्रसमूहे शस्त्रादिषु याम्या ऋचो वक्तव्याः । तत्र प्रेहि प्रेहीत्याद्यास्तृतीयावर्जिताः पञ्च ऋचो वक्तव्या भवन्ति ।"

[2] भवे छन्दसि [४ ४ ११०] इति यत् । 'यतोऽनावः' इत्याद्युदात्तत्वे प्राप्ते व्यत्ययेनान्तोदात्तत्वम् । वस्तुतस्तु 'पूर्वैः कृतमिनयौ' च इति यप्रत्ययः । प्रत्ययस्वरेणान्तोदात्तत्वम् ।

x. 84. 3. तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान् RV. vi. 5. 4. "Burn him with thine own bulls for ever youthful, burning with burning heat, thou fiercest burner." विष्णुर्वरिष्ठो वरदो वरेण्यः Visnu P. कुतः कुवलयं कर्णे करोषि कलभाषिणि । किमपाङ्गमपर्याप्तमस्मिन् कर्मणि मन्यसे ॥ *Kāvyādarśa.*

पूर्व्येभिः—पूर्वैः कृतमिनयौ च 4.4.133. पथिभिः पूर्विणैः । पूर्व्यैः । पूर्विणैः पूर्व्यैरिति बहुवचनान्तेन पूर्वपुरुषा उच्यन्ते । तत्कृताः पन्थानः प्रशस्ता इति पथां प्रशंसा । *Kāśikā.*

उभा राजाना मदन्ता—उभौ राजानौ मदन्तौ. Both Yama and Varuna are kings, but Varuna alone has the epithet देव.

पश्यासि—3 sing. present subjunctive of दृश् (पश् for स्पश् acc. to philologists). Also पश्याः.

वरुणं च देवम्—does not amount to समासप्रयोगता because of उभा and the duals in *c.*

8

सं गच्छस्व पितृभिः सं यमे-	सम् । गच्छस्व । पितृऽभिः । सम् । यमेन ।
नेष्टापूर्तेन परमे व्योमन् ।	इष्टापूर्तेन । परमे । विऽओमन् ।
हित्वायावद्यं पुनरस्तमेहि	हित्वाय । अवद्यम् । पुनः । अस्तम् । आ । इहि
सं गच्छस्व तन्वा सुवर्चाः ॥८॥	सम् । गच्छस्व । तन्वा । सुऽवर्चाः ॥८॥

Be united with *(sáṃ gacchasva)* the Pitrs *(pitŕbhiḥ)*, with *(sám)* Yama *(yaména)*, with the sacrifices and good works *(iṣṭāpūrténa)* in the highest heaven *(paramé vyóman)*. Leaving behind *(hitvā́ya)* [all] evil *(avadyám)*, go anew *(púnar éhi)* to thy abode *(ástam)*, be united with *(sáṃ gacchasva)* thy body *(tanvā̀)* full of lustre *(suvárcāḥ)*.

हे मदीय पितः, त्वं परमे उत्कृष्टे व्योमन् व्योमनि स्वर्गाख्ये स्थाने स्वभूतैः पितृभिः सह संगच्छस्व । इष्टापूर्तेन श्रौतस्मार्तदानफलेन*

* All. But TA. vi. 61. 2 reads श्रौतस्मार्तकर्मफलेन which appear to be the correct reading here also. Under AV. iii. 12. 8 also S. says श्रौतं स्मार्तं च कर्म.

सङ्गच्छस्व। तत इष्टापूर्तेन संगम्य अवद्यम् पापं हित्वाय परित्यज्य अस्तम् म्रियमाणाख्यं* गृहं पुनरेहि आगच्छ। ततः सुवर्चाः। तृतीयार्थे प्रथमा। सुवर्चसा शोभनदीप्तियुक्तेन तन्वा स्वशरीरेण सङ्गच्छस्व ॥८॥

हे मृत पुरुष त्वं पितृभिः पितृ-पितामह-प्रपितामहैः संगच्छस्व पैतृमेधिकेन सापिण्ड्यकरणविधिना संस्कारेण [हेतुना सङ्गतो भव। पितृषु मध्ये प्राप्तस्थानो] भवेत्यर्थः। यस्तेषां राजा यमः तेनापि संगच्छस्व। तथा परमे उत्कृष्टे पितृलोकात् अपि श्रेष्ठे व्योमन् व्योम्नि द्युलोके नाकपृष्ठाख्ये कर्मफलोपभोगस्थाने इष्टापूर्तेन। इष्टं प्रत्यक्षश्रुतिचोदितं यागहोमदानादि। पूर्तं स्मृतिपुराणागमचोदितं[1] वापीकूपतटाकदेवागारनिर्माणादि। तेन उभयेन संगच्छस्व। तत् फलम् उपभुङ्क्ष्वेत्यर्थः। तथा अवद्यं पापं हित्वा त्यक्त्वा अस्तम् गृहनामैतत्। उत्तमलोकस्थितं गृहं पुनरेहि प्राप्नुहि। सुवर्चाः शोभनदीप्तिकस्तव आत्मा तन्वा स्वर्गलोकभोगयोग्येन शरीरेण संगच्छताम्[2] संयुज्यताम्। 'समो गम्यृच्छि०' [१।३।२९ का] इति संपूर्वाद् गमेरकर्मकादात्मनेपदम् ॥८॥

इष्टापूर्तेन—इष्ट is the past part. of यज् 'to sacrifice' and पूर्त of पृ 'to fill.' As both are formed in the भाववाच्य acc to नपुंसके भावे क्तः they mean 'sacrifice' and 'fulfilment'. The word is a द्वन्द्व in which each member must originally have been a neuter plural but later on the form became crystallised and the compound came to be used in the singular. It is an irregular समाहार द्वन्द्व and occurs only here in RV. though it is frequently used in later literature. Acc to Sanskrit Grammar the long final of the first member can easily be accounted for by the rule अन्येषामपि दृश्यते 6. 3. 137. Under AB. 34. 3 S. says: इष्टापूर्तशब्दार्थः पूर्वाचार्यैर्दर्शितः—

वर्णाश्रमाणां यो धर्म इष्टं पूर्तमथेतरत्।
प्रपा-तटाकादिरूपं तच्च सर्वत्र दृश्यते।
श्रौतं पूर्तं श्रौतमिष्टमिति केचिदिहोचिरे॥

* म्रियमाणाख्यम्—M.

[1] चोदितं विहितम्।

[2] AV. reads संगच्छताम् for सङ्गच्छस्व.

In the *Kathopanisad* (i 8) the word is used in the dual इष्टापूर्ते being a द्वन्द्व is not analysed in the Pada text

व्योमन्—the loc of व्योमन् is व्योमन् and व्योमनि in the Vedas व्योम्नि and व्योमनि in classical Skt

हित्वाय—हित्वा, हित्वी and हित्वाय are the gerunds from हा to leave in RV हित्वा alone is used in class Skt AV (which has only गत्वाय and इष्ट्वाय of gerunds in त्वाय) substitutes हित्वा for हित्वाय

अवद्यम्—See p 110

अस्तम्—अस्तम् is read in *Nigh* iii 4 among the synonyms of गृह SB ii 5 [redacted] 9 says गृहा वा अस्तम् अस्यते क्षिप्यते सर्वं वस्तुजातमस्मिन् इत्यस्तं गृहम् । 'हसिमृग्रिण्वा...' [3।86] इति तन् प्रत्ययः । Since अस्तम् also means गृह अस्त [redacted] evidently derived from the root अस 'to be' With the unadi suffix तन् See p 317

सुवर्चा —Adjective qualifying त्वम् understood Skt *varcas* Av *varcah* strength सु शोभनं वर्चः तेजः यस्य सः । 'सोर्मनसी अलोमोषसी' इत्युत्तरपदाद्युदात्तत्वम्। Cf प्रजीवन्तावपरि ... सुमना सुवर्चा x [redacted] 44

तन्वा—Cf x 16 [redacted] अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः । आयुर्वसान उप वेतु शेषः सं गच्छतां तन्वा जातवेदः ॥ Restore him O Agni, to the Fathers, him who, offered to thee now goes in peace clothing himself in useful strength and let him meet with a new body ; x 56 1 संवेशने तन्वश्चारुरेधि प्रियो देवानां परमे जनित्रे ॥ When thou enterest thy (new) body, be welcome, be dear to the gods in the highest homes Kapoi pp 161, 100

9

अपेत वीत वि च सर्पतातो-	अप । इत । वि । इत । वि । च । सर्पत । अतः ।
ऽस्मा एतं पितरो लोकमक्रन् ।	अस्मै । एतम् । पितरः । लोकम् । अक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं	अहःऽभिः अत्ऽभिः अक्तुऽभिः विऽअक्तम् ।
यमो ददात्यवसानमस्मै ॥९॥	यमः । ददाति । अवऽसानम् । अस्मै ॥९॥

Go away (*ápeta*), disperse (*ví ta*), and creep away (*ví ca sarpata*)[1] from here (*átaḥ*), for him (*asmái*) the Pitṛs (*pitáraḥ*) have made (*akran*) this place (*etám lokám*). Yama (*Yamáḥ*) gives (*dadāti*) him (*asmai*) a place of rest (*avasā nam*), adorned (*vyáktam*) with days (*áhobhiḥ*), water (*adbhíḥ*) and nights (*aktúbhiḥ*).

पैतृमेधिके कर्मणि श्मशानायतनं प्रोक्षति 'अपेत वीत' इति'। सूत्रितञ्च—'गर्तोदकेन शमीशाखया त्रिः प्रसव्यमायतनं परिव्रजन् प्रोक्षत्यपेत वीत वि च सर्पतात इति' [आ॰ गृ॰ ४।२।८] इति*।

श्मशाने पूर्वं स्थिता हे पिशाचादयः, अतः अस्मात् मृतयजमानदहनस्थानात् अपेत अपगच्छत। वीत विशेषेण गच्छत। वि सर्पत च। इदं स्थानं परित्यज्य नानाभावेन दूरतरं देशं गच्छतेत्यर्थः। पितरः अस्मै मृतयजमानस्यार्थाय एतं लोकम् इदं दहनस्थानम् अक्रन् यमस्याज्ञया अकुर्वन्†। यमोऽपि अहोभिः दिवसैः अद्भिः अभ्युक्षणोदकैः अक्तुभिः रात्रिभिः व्यक्तम् सक्तम्। शुद्धिनिमित्तैः काष्ठोदकादिभिः शोधितमित्यर्थः। अवसानम् दहनस्थानम् अस्मै मृतयजमानस्यार्थाय ददाति दत्तवान् ॥९॥

अत्र 'अनया दहनस्थानं संप्रोक्षेत्' इति विनियोगात् तत्स्थानस्थितानां रक्षःपिशाचादीनामपगमनमाभधीयते। हे रक्षःप्रभृतयः यूयम् अपेत अपगच्छत। वीत। वी गत्यादिषु [धा॰ २।३८]। अत्र गतिरर्थः। विगता भवत। अतः अस्माद् दहनस्थानात् वि सर्पत च विविधं विशेषेण वा गच्छत। दूरं गच्छतेत्यर्थः।

[1] आहिताग्नेर्मरणे तं यज्ञपात्रैः सह श्मशानं नीत्वा यत्र तस्य दाहः कर्तव्यस्तस्य श्मशानायतनस्य प्रथममद्भिः प्रोक्षणं कर्तव्यम्। तत्र प्रोक्षणेऽयं मन्त्रः प्रयुज्यते।

* The quotation from the *Gṛhyasūtra* ends in इति, so another इति is necessary to show the end of the quotation. This इति is dropped in the printed texts and MSS.

† अव्यकुर्वन्—M.

बृहतीः बृहत्यो महत्यः। जसि 'वा छन्दसि' [६।१।१०६] इति पूर्वसवर्णदीर्घः। °'बृहन्महतोरुपसंख्यानम्' [६।१।१७३।१] इति ङीप उदात्तत्वम्। अग्निम् उपलक्षणमेतत्। अग्न्युपलक्षितं सर्वं वियदादिभूतजातं जनयन्तीः जनयन्त्यः। तदर्थं गर्भम् हिरण्मयाण्डस्य गर्भभूतं प्रजापतिं दधानाः धारयन्त्यः आपः ह आप एव विश्वम् आयन् सर्वं जगद्व्याप्नुवन्। यत् यस्मात् ततः तस्माद्गर्भात्* देवानाम् देवादीनां सर्वेषां प्राणिनाम् असुः प्राणभूत एकः प्रजापतिः समवर्तत समजायत†। यद्वा, यत् यं गर्भं दधानाः आपः विश्वात्मनावस्थितास्ततो गर्भभूतात् प्रजापतेर्देवादीनां प्राणात्मको वायुरजायत। अथवा यत्। लिङ्गवचनयोर्व्यत्ययः। तल्लक्षणा या आपो विश्वमावृत्य स्थिताः ततः ताभ्योऽद्भ्यः सकाशात् एकः अद्वितीयः असुः प्राणात्मकः प्रजापतिः समवर्तत निरक्राम। तस्मै कस्मै इत्यादि गतम् ॥७॥

उवटभाष्यम्। 'आपो ह वा इदमग्रे सलिलमेवास' [श° ब्रा° ११।१।६।१] इत्येतद्ब्राह्मणं निदानभूतमनयोः कण्डिकयोः। आपः। पुराकल्पद्योतको ह इति निपातः। यत् बृहतीः महत्यः विश्वं सर्वम् आत्मत्वेन आयन् प्रापुः। गर्भं हिरण्यगर्भलक्षणं दधानाः। जनयन्तीः जनयिष्यन्त्यः। अग्निम् अग्निरूपं हिरण्यगर्भम्। हिरण्यगर्भवचनो वा अग्निशब्दः। ततः गर्भात् संवत्सरोषितात्। देवानां मध्ये समवर्तत समभवत् असुः प्राणात्मकः एकः देवानाम्। स हि लिङ्गशरीरो य इत्यमूर्तो हिरण्यगर्भः।

तैत्तिरीयभाष्यम्। यद् यस्य प्रजापतेरनुग्रहात् महतीः महत्य आपः विश्वम् आयन् विश्वाकारं प्राप्ताः। अत एव स्मर्यते—

अप एव ससर्जादौ तासु वीर्यमवासृजत्
तदण्डमभवद्धैमम् [मनु° १।९]

---

* गर्भात्:—Bom.

† यत्...समजायत—occurs in only one MS. of M.

इति । कीदृश्य आपः ? दक्षम् अग्निचयने कुशलं यजमानं दधाना धारयन्त्यः उत्पादयन्त्यः । तथा चेतव्यमग्निं जनयन्तीरुत्पादयन्त्य । ततस्तस्मात् प्रजापतेः देवानां सर्वेषाम् असु जीवनहेतुः प्राण एको निरवर्तत निष्पन्नः ।

In the AV version this is the first stanza Here also it is connected with the beginning of the hymn, गर्भं in this stanza standing for हिरण्यगर्भ in st 1 "The waters here referred to are to be understood as the waters in the beginning of the creation, where, as we read (RV x 129 3) 'everything was like a sea without a light' or as the *Satapatha Brahmana* says, 'everything was water and sea' These waters held the germ (RV x 82 5 b), and produced the golden light the sun (RV x 72 7) whence arose the life of all the gods, *viz*, Prajapati "

दधती —nom pl, class दधन Some construe दधती आपो ह यत् विश्व गर्भ दधाना (carrying the All as the embryo), अग्नि जनयन्ती आयन्, तत etc

जनयन्ती —class जनयन्त Cf जनयन्ती iii 61 4 The root जन् is transitive in the Vedas and means to generate

अग्निम्—Agni is mentioned here as being the first of the gods and their chief representative In i 70 3 (गर्भो यो अपाम्), iii 1 13 (अपां गर्भम्), etc, Agni is described as the embryo of the waters Agni is the central figure in all sacrifices Hence Agni means sacrifice by लक्षणा

तत—from the waters, cf x 125 7 ततो वि तिष्ठे भुवनानु विश्वा

आयन्—3 pl imperfect of इ to go' आपो अपे विश्वमायन् AV "Instances like this tend to confirm the use of अप् as a verb of motion" *Variants*, II 253

असु —life breath Av *ahu* In Av *ahûm merencô** means life destroying In x 168 4 असु is praised as आत्मा देवानाम् the life breath of the gods From AV downwards the word came

* It is interesting to note that this मिरेचो became मोचड़ान in Beng and मचकड़ in Gujrati by metathesis, though the regular form मरचाना is preserved in Hindi

to be used in the pl. in the sense of the प्राणवायु even as प्राण is used in the plural in the sense of पञ्चवृत्ति प्राण (see ब्रह्मसूत्र ii. 4. 12) in later literature.

8

यश्चिदापो महिना पर्यपश्य-	यः । चित् । आपः । महिना । परिऽअपश्यत् ।
द्दक्षं दधाना जनयन्तीर्यज्ञम् ।	दक्षम् । दधानाः । जनयन्तीः । यज्ञम् ।
यो देवेष्वधि देव एक आसीत्	यः । देवेषु । अधि । देवः । एकः । आसीत् ।
कस्मै देवाय हविषा विधेम ॥८॥	कस्मै । देवाय । हविषा । विधेम ॥८॥

Even he who (*yah cit*) by his greatness (*mahinā'*) beheld the waters (*ā'pah paryapaśyat*) which bestowed power (*dákṣam dádhānāh*) and generated the sacrifice (*yajñám janáyantīh*), he who (*yáh*) was (*ā'sīt*) the one god (*ékah deváh*) above the gods (*devéṣu ádhi*).

यज्ञम् यज्ञोपलक्षितं विकारजातं[1] जनयन्तीः उत्पादयन्तीस्तदर्थं दक्षम् प्रपञ्चात्मना वर्धिष्णुं प्रजापतिमात्मनि दधानाः धारयित्रीः। दधातेर्हेतौ शानच्। 'अभ्यस्तानामादिः' [६।१।१८९] इत्याद्युदात्तत्वम्। ईदृशीः आपः। व्यत्ययेन प्रथमा। आपः प्रलयकालीनाः। महिना महिम्ना। छान्दसो मलोपः। स्वमाहात्म्येन यः च[2] प्रजापतिः पर्यपश्यत् परितो दृष्टवान्। यः च देवेषु अधि देवेषु मध्ये देवः तेषामपीश्वरः सन् एकः अद्वितीय आसीत् भवति। अस्तेश्छान्दसो लङ्। 'अस्तिसिचोऽपृक्ते' [७।३।९६] इतीडागमः। तस्मै कस्मा इत्यादि गतम्॥८॥

---

1 यज्ञं परियज्ञम् Uvaṭa. यज्ञशब्देन यज्ञकर्त्री प्रजा लक्ष्यते। Mah.

2 S. apparently paraphrases चित् by च.

The first half of this stanza is practically the same as that of the previous stanza : दक्षम् stands for गर्भम् and यज्ञम् for अग्निम् TA i 13 8 reads स्वयम्भुम् for अग्निम्

महिना—In the older language are found several instrumental singulars of *man* stems in which *mna* becomes *ma* (*e g*, *draghma* x 79 4) or *na* (*e g*, *mahina*, *varinā* and *prathina* with extent, *bhuna* with greatness and *prena* with love) : महिना[1] is due either to the dissimilatory elision of the *m* after the initial *m* (Wackernagel, A G III, 268 9) or is a blend of *mahna* and *mahimnā* for metrical and stylistic conveniences (Bloomfield, JAOS XVI clvi n) 'The AV whose diction is less hieratic and in closer contact with popular speech, whose metres are far less trammelled, reads at iv 30 8 (var of RV x 125 8) *eta'vati mahimna' sam babhuva* " The only occurrence of the metrically bad *mahimnā* after the caesura is in वैश्वानरो महिना विश्वकृष्टि RV i 60 7[2]

---

[1] वरिणा, प्रथिना, etc , expressing as they do similar ideas are obviously formed after the analogy of महिना

[2] 'महिना occurs [illegible] times in RV All the occurrences are restricted to two metrical types : First in octosyllabic padas the word occupies the fourth, fifth and sixth syllables Secondly the word follows immediately upon the caesura of a tristubh jagati pāda, no matter whether the caesura is after the fourth or fifth syllable Both positions are metrically speaking, critical The second half of octosyllabic pādas, is regularly iambic the caesura in tristubh jagati padas is regularly followed by an anapaest (⏑ ⏑ —) It is evident at once that the regular instrumental *mahimna'*, a bacchius (⏑ — —), could not, without violating the two general metrical laws, stand in these positions, and yet the facts show that there was a marked lexical and stylistic need for such a word in that very position " JAOS XVI clvi

दक्ष—(from दक्ष् to be able) means will, power. दक्ष बल क्रतु प्रज्ञानम् —Bhāratasvāmin under SV. v 4. 4. See p 158. As Prajāpati is the embodiment of all power, दक्ष refers to Prajāpati here *Cf.* दक्षं दधासि जीवसे 1. 91. 7

TS reads दक्षं दधाना जनयन्तीरग्निम् in both stanzas. S. explains दक्षम् अग्निचयने कुशलं यजमानं दधाना धारयन्त्य उत्पादयन्त्यः । तथा चेतव्यम् अग्निं जनयन्तीः उत्पादयन्त्यः ।

दधानाः—pr. part of धा. The perf. part. is accented on the final syl.

यो देवेष्वधि देव एक आसीत्—who was the one god above the gods. AV reads यासु देवीष्वधि देव आसीत्—over whom, divine ones, god was.

एक—is absent in AV and MS It is unnecessary and offends the metre and should therefore be dropped

9

मा नो हिंसीज्जनिता यः पृथिव्या	मा । नः । हिंसीत् । जनिता । यः । पृथिव्याः ।
यो वा दिवं सत्यधर्मा जजान ।	यः । वा । दिवम् । सत्यऽधर्मा । जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान	यः । च । अपः । चन्द्राः । बृहतीः । जजान ।
कस्मै देवाय हविषा विधेम ॥९॥	कस्मै । देवाय । हविषा । विधेम ॥९॥

May he not injure us (*mā́ naḥ hiṁsīt*) who (*yaḥ*) is the generator (*janitā́*) of the earth (*pṛthivyā́ḥ*), or who (*yaḥ vā*) with true ordinances (*satyadharmā*) generated the heaven (*divam jajā́na*) and who (*yáḥ ca*) generated (*jajā́na*) the great (*bṛhatī́ḥ*) and brilliant (*candrā́ḥ*) waters (*apáḥ*)...

स प्रजापतिः नः अस्मान् मा हिंसीत् मा बाधताम् । यः पृथिव्याः भूमेः जनिता जनयिता स्रष्टा । 'जनिता मन्त्रे' [६।४।५३] इति णिलोपो

निपात्यते। 'उदात्तयणो हल्पूर्वात्' [६।१।१७४] इति पृथिवीशब्दाद्विभक्तेरुदात्तत्वम्। यः वा यश्च सत्यधर्मा। सत्यमवितथं धर्म जगतो धारणं यस्य स तादृशः प्रजापतिः दिवम् अन्तरिक्षोपलक्षितान् सर्वान् लोकान् जजान जनयामास। जनी प्रादुर्भावे [धा° ४।४१]। णिचि वृद्धौ 'जनीजॄष्क्नसुरञ्जः°' [ग° सू° ६।४।९२] इति मित्त्वात् 'मितां ह्रस्वः' [६।४।९२] इति ह्रस्वत्वम्। ततो लिटि "अमन्त्रे°" [३।१।३५] इति निषेधादाम्प्रत्ययाभावे तिपो णलि वृद्धौ 'लिति' [६।१।१९३] इति प्रत्ययात् पूर्वस्योदात्तत्वम्। यश्च बृहतीः महतीः चन्द्राः आह्लादिनीः अपः उदकानि जजान जनयामास। 'ऊडिदम्°' [६।१।१७१] इत्यादिना अप्शब्दादुत्तरस्य शस उदात्तत्वम्। तस्मै कस्मा इत्यादि गतम् ॥९॥

[यश्चापश्चन्द्राः प्रथमो जजान। यश्च चन्द्राः आह्लादिका जगत्कारणभूता आपो जलानि प्रथम आदिभूतः सन् अजाव सवपादितवान्। तद्द्वारा मनुष्यान् इत्यर्थः। यतः श्रुतौ आपश्चन्द्रा इति मनुष्या व्याख्याताः। मनुष्या एव हि यज्ञेनाप्नुवन्ति चन्द्रलोकं पितृमार्गानुसारिणः। 'मनुष्या वा आपश्चन्द्राः' [तै° सं° ७।३।१।२०] इति श्रुतेः। Mah.

सत्यधर्मा अवितथधारणशक्तिः। बृहतीः बहुला। TSS]

हिंसीत्—3. sing. injunctive of हिंस् 'to injure.'

मा नो हिंसीत्—*Cf.* i. 114. 7-8: मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥ "O Rudra, harm not either great or small of us, harm not the growing boy, harm not the full-grown man. Slay not a sire among us, slay no mother here, and to our own dear bodies, Rudra, do no harm. Harm us not Rudra, in our seed and progeny, harm us not in the living, nor in cows or steeds. *Slay not our heroes in the fury of thy wrath. Bringing* oblations evermore we call to thee."

VS xii. 102 reads मा मा हिंसीत् for मा नः हिंसीत् (the pl. नः is better, since विधेम is pl.), व्यानट् for जजान and प्रथमो for बृहतीः. On व्यानट्

Uvata remarks व्यानडिति व्याप्तिकर्मा, सुत्या तु यजतेरर्थे व्याख्यात Mahidhara explains आप as जगत्कारणभूता

सत्यधर्मा—धर्म as an *a* stem is unknown to RV It is a neuter *an* stem (*cf* तानि धर्माणि प्रथमान्यासन् x 90 16) meaning ordinance law from √ to hold to uphold (lit that which holds its own which persists or endures or that which upholds the universe) Vedic धर्मन् *n* became post Vedic धर्म *m* but the original form persisted at the end of Bahuvrihi compounds hence Panini had to frame the rule धर्मादनिच् केवलात् v 4 124 धर्म is read in the अर्धर्चादि list and commentators hold 'धर्मोऽदृष्टार्थवाची तत्साधनवाची तु नपुंसकलिङ्गः । तानि धर्माणि प्रथमान्यासन् ।

जजान—In the Vedas the root जन is transitive with Parasmaipadin endings and intransitive with Atmanepadin endings

चन्द्रा —The word was originally श्चन्द्र and meant shining The original form is preserved in हरिश्चन्द्र and in Ved सुश्चन्द्र, विश्वश्चन्द्र etc Skt *candra* Gk *kandaros* glowing coal Lat *candēre* to shine to glow Skt *candana* (lit the glowing tree) and Eng *candid* (lit glowing white) are derived from this root The word चन्द्रमास् is really a कर्मधारय compound of चन्द्र bright and मास moon For चन्द्रा आप *cf* TS vi 4 2 4 यद्दिवा भवति अपो रात्रिं प्रविशन्ति तस्मात् ताम्रा आपो दिवा ददृश्रे यन्नक्तं भवति अपोऽहः प्रविशन्ति तस्माच्चन्द्रा आपो नक्तं ददृश्रे । (यदा दिवसः प्रवर्तते तदा रात्रिरपः प्रविशति तस्माद्दिवा आपः दृश्यमाना [illegible] ताम्रस्य । नक्तम् अहः प्रवेशात् चन्द्रा शुक्ला आपो दृश्यन्ते ।)

10

प्रजापते न त्वदेतान्यन्यो	प्रजापते न त्वदेतान्यन्यो
विश्वा जातानि परि ता बभूव ।	विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु	यत्कामास्ते जुहुमस्तन्नो अस्तु
वयं स्याम पतयो रयीणाम् ॥१०॥	वयं स्याम पतयो रयीणाम् ॥१०॥

O Prajāpati (*Prajāpate*), none other than thou (*na tvád anyah*) has encompassed (*paribabhūva*) all these created things (*tá víśva jātā́ni*), let that be ours (*tat nah astu*) desiring which (*yatkamah*) we sacrifice to thee (*te juhumah*), may we be (*vayam syama*) masters (*patayah*) of riches (*rayīnā́m*).

द्व्यादधाख्य इष्ट्ययने प्राजापत्यस्य हविषः 'प्रजापते' इत्येषानुवाक्या[1]। सूत्रितञ्च—'प्राजापत्य द्व्यादधः' 'प्रजापते न त्वदेतान्यन्यः' [आ° श्रौ° २।१४।११-१२] इति। केशनखकीटादिभिर्दुष्टानि हवींष्यनयैवाप्सु प्रक्षिपेत्[2]। सूत्रितञ्च—'अपोऽभ्यवहरेयुः[3]' 'प्रजापते न त्वदेतान्यन्य' [आ° श्रौ° ३।१०।२२-२४] इति। चौलादिकर्मस्वप्येषा होमार्था[4]। सूत्रितञ्च—'तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च' [आ° गृ° १।४।४] इति॥

हे प्रजापते, त्वत् त्वत्तोऽन्यः कश्चित् एतानि इदानीं वर्तमानानि विश्वा विश्वानि सर्वाणि। 'शेश्छन्दसि बहुलम्' [६।१।७०] इति शेर्लोपः। जातानि प्रथमविकारभाञ्जि[5] ता तानि सर्वाणि भूतजातानि न परि बभूव न परिगृह्णाति न व्याप्नोति[6]। त्वमेवैतानि परिगृह्य स्रष्टुं शक्नोषीति भावः। परिपूर्णो भवति.

---

[1] द्व्यादधो नामेष्ट्ययनम्, तत् प्रजापतिदेवताकम्, पर्वणि पर्वणि कर्तव्यम्। तत्र प्रजापते इत्युगनुवाक्या। इष्टिविरहेण गमन येषु तानीष्ट्ययनानि चातुर्मास्यादीनि।

[2] तथा चाश्वलायनसूत्रे—'व्यापन्नानि हवींषि केशनखकीटपतङ्गैरन्यैर्वा बीभत्सैः। विप्रमिश्राणि च' [३।१०।२० २१] इति।

[3] "दुष्टानि हवींष्यप्सु प्रक्षिपेदित्यर्थः।"

[4] चौलादिकर्मसु चतस्र आज्याहुतयो होतव्याः। तत्र प्रजापते न त्वदेता चतुर्थीम् आहुतिं जुहुयात्।

[5] Referring to the six भावविकारs—जायते अस्ति विपरिणमते वर्धते अपक्षीयते विनश्यति mentioned by Yaska (Nir. 1. 2)

[6] परिपूर्णो भवति परिग्रहे परिरक्षायां वा वर्तते। परिगृह्णाति परिग्रहीतुं शक्नोति परिरक्षितुं वेत्यर्थः। त्वमेव परिरक्षणाय प्रभवसि वा। यत ईदृशोऽसि अतो ब्रूम। Sh. M यत एवं त्वां वयं सर्वस्य विभुं पश्याम सर्वेश्वरम् अतो ब्रूम स कामोऽस्माकं त्वदनुध्यानात् समृध्यताम् Durga परिभव सष्टेरुपलक्षणम्। सृष्टिसंहारयोरपीत्यर्थः। TSS परिपूर्णो भवतिस्त्वर्थे वर्तते SBS

परिग्रहार्थं । वय च यत्कामा यत् फल कामयमाना ते तुभ्य जुहुम हवींषि प्रयच्छाम तत् फल न अस्माकम् अस्तु भवतु । तथा वय च रयीणाम् धनाना पतय ईश्वरा स्याम भवेम । [रयीणाम् ।] 'नामन्यतरस्याम्' [६।१।१७७] इति नाम उदात्तत्वम् ॥१०॥

This is one of the six[1] stanzas in RV in which the Pada text does not differ from the Samhita text So it must either have been added after the constitution of the Pada text or the Padakara may have taken no notice of it because of its apocryphal character It must moreover be admitted that it is something in the nature of an anticlimax after the eloquent stanzas that have preceded it Still it is an oft quoted mantra occurring in VS x 20 xxiii 65 AV vii 80 3 TS i 8 14 2 iii 2 5 6 MS ii 6 12 KS xv 8 TB ii 8 1 2 Nir x 48 SB v 4 2 9 xiii 5 2 23 xiv 9 3 3 etc etc AV and VS read रूपाणि (रूपाणि भूतजातानि) for जातानि AV also reads परिभूरजान for परि ता बभूव

The Padapatha if constructed would run as follows —

प्रजापते । न । त्वत् । एतानि । अन्यः ।
विश्वा । जातानि । परि । ता । बभूव ।
यत्ऽकामाः । ते । जुहुमः । तत् । नः । अस्तु ।
वयम् । स्याम । पतयः । रयीणाम् ॥

परिता—Gunavisnu in his *Chandogyamantrabhasya* reads परिता as one word and explains it as पालयिता G s failure to take into account the accents of words sometimes leads him into curious errors

यत्कामास्—*Cf* यत्काम इदं जुहोमि तन्मे समृध्यताम् TB iii 11 2 4

[1] The other five stanzas are vii 57 12 x 20 1 x 101

एतानि—MS reads एता (न हि त्वद्य एता) which though older in form is due to "a conscious archaizing in a secondary text." *Variants*, III § 165

वय स्याम पतयो रयीणाम्—RV iv 50 6, v 55 10, viii 40 12, viii 48 13

DEVI SUKTA

Introductory Note

The goddess Vak (Speech) is represented as praising herself in this hymn which became one of the most famous hymns in later times The other hymn addressed to Speech is x 71 some of the stanzas of which have become almost proverbial It is probably this hymn that gave rise to the idea of *Sabda-brahman*

"From the conception of the power of prayer and spells in the Veda it is clear how Speech could be looked upon as accompanying and supporting all the gods, and reaching wherever the magic power of the *brahma* extended The idea bears a resemblance to the Word of God as personified in the *Wisdom of Solomon*, xviii 15 ff, and to the Logos of Philo but it did not lead to the same development in cosmogonic doctrine* "

In the *Sarvanukramani* Vāk is said to be the daughter of the great sage *Ambhrna* of whom hardly anything is known 'In the voice of the thunder", says Darmesteter, ' the Greeks recognised the warning of a god which the wise understand, and they worshipped it as *Ossa Dios aggelos* the Word Messenger of Zeus ,' the Romans worshipped it as a goddess Fama , Indra adores it as 'the Voice in the cloud,' Vak Ambhrni which issues from the waters, from the forehead of the father, and

---

* THOMAS, *Hymns from the Rigveda*, p 88

hurls the deadly arrow against the foe of Brahman So the word from above is either a weapon that kills, or a revelation that teaches "* What is said of Vag Ambhrni is not exactly correct

This hymn thus antedates the Greek doctrine of Logos by some centuries " Vak appears in RV as an active female divine power showing grace to mortals In the Brahmanic period Vāk becomes more and more like the Greek Logos, and it may truthfully be said that in this period "the Word was God " 'In Greece," says Hopkins "the conception of Logos begins with Herachitus, passes on to the Stoics , is adopted by Philo , becomes a prominent feature of Neo Platonism , and reappears in the Gospel of St John It is certainly legitimate to suppose that Herachitus might have received the idea indirectly if not directly from contemporary Eastern Philosophers '

In early Babylonian religion also 'the Word was exalted by higher religion to a great cosmic divine agency sometimes personified '

This is probably the best known hymn of RV in Bengal and has its ritual application in the Durgāpuja as well as in the recitation of the Candi or Saptasati Hymns in which the first person is used are known as *adhyatmika*† Such hymns are rare This is an आध्यात्मिक hymn The other well known आध्यात्मिक hymns are x 48-49 and x 119 in all of which Indra is the speaker In the case of आध्यात्मिक hymns the seer is the same as the deity ("उत्तमस्य तु वर्गस्य य ऋषि सैव देवता।)

* "SBE, Vol iv, p lxxviii

† तास्त्रिविधा ऋच—परोक्षकृता प्रत्यक्षकृता आध्यात्मिक्यश्च। तत्र परोक्षकृता सर्वाभिर्नामविभक्तिभिर्युज्यन्ते, प्रथमपुरुषैश्चाख्यातस्य। इन्द्रो दिव इन्द्र ईशे पृथिव्या [१०।८९।१०]। अथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना। त्वमिन्द्र बलादधि [१०।१५३।२], वि न इन्द्र मृधो जहि [१०।१५२।४] इति। अथाध्यात्मिक्य उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना। यथैतदिन्द्रो वैकुण्ठ [१०।४८-४९] लवसूक्त [१०।११९] वागाम्भृणीयम् [१०।१२५] इति। परोक्षकृता प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठा, अल्पश आध्यात्मिका।

Hymn No. 11

DEVĪ SŪKTA

x 125

म० १० सू० १२५

आम्भृणी वाक् ऋषि । परमात्मा देवता । १, ३ ८—त्रिष्टुप्, २—जगती ।

1

अहं रुद्रेभिर्वसुभिश्चरा-	अहम् । रुद्रेभिः । वसुऽभिः । चरामि ।
म्यहमादित्यैरुत विश्वदेवैः ।	अहम् । आदित्यैः । उत । विश्वऽदेवैः ।
अहं मित्रावरुणोभा बिभ-	अहम् । मित्रावरुणा । उभा बिभर्मि ।
र्म्यहमिन्द्राग्नी अहमश्विनोभा ॥१॥	अहम् । इन्द्राग्नी इति । अहम् अश्विना । उभा ॥१॥

I (*aham*) go about (*carāmi*) with the Rudras (*Rudrébhih*), with the Vasus (*Vasubhih*), I (*aham*) with the Ādityas (*Ādityaih*) and (*uta*) with the All gods (*viśva devaih*), I (*aham*) bear (*bibharmi*) both (*ubhá*) Mitra and Varuna (*Mitrā́-Varuna*), I (*aham*) Indra and Agni (*Indrā́gnī*), I (*aham*) both (*ubhá*) Aśvins (*Aśvinā*)

अहमित्यष्टर्चं सप्तोदशं सूक्तम् । अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्म-विदुषी स्वात्मानमस्तौत् । अतः सर्षिः । सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता । तेन ह्येषा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति । द्वितीया जगती, शिष्टाः सप्त त्रिष्टुभः । तथा चानुक्रान्तम्—'अहमष्टौ वागाम्भृणी* तुष्टावात्मानं द्वितीया जगती' इति । गतो विनियोगः ।

* Ṣadguruśiṣya evidently reads वाङ्नामाम्भृणी for he explains वाङ्नामाम्भृणी । अम्भृणस्य महर्षेः पुत्री । आत्मानं तुष्टाव । स्वयमेवर्षिका देवता चैषर्द ।

अहं सूक्तस्य द्रष्ट्री वागाम्भृणी यद् ब्रह्म जगत्कारणं तद्रूपा भवन्ती रुद्रेभिः रुद्रैरेकादशभिः। इत्थम्भावे तृतीया। तदात्मना चरामि। एवं वसुभिः इत्यादौ तत्तदात्मना चरामीति योज्यम्। तथा मित्रावरुणा मित्रं वरुणञ्च। 'सुपां सुलुक्' [७।१।३९] इति द्वितीयाया आकारः। उभा उभौ अहम् एव ब्रह्मीभूता* बिभर्मि धारयामि। इन्द्राग्नी अपि अहम् एव धारयामि। उभा उभौ अश्विना अश्विनौ अपि अहम् एव धारयामि। मयि हि सर्वं जगच्छुक्तौ रजतमिवाध्यस्तं सद् दृश्यते। माया च जगदाकारेण विवर्तते। तादृश्या मायाया आधारत्वेनासङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योपपत्तिः ॥१॥

अथर्ववेदभाष्यम्। 'अहं रुद्रेभिः' इति सूक्तेन जातकर्मणि शङ्खपुष्पिका-गन्धपुष्पिके पिष्ट्वा, अभिमन्त्र्य, हिरण्यशकलेन प्राशयेत्। तथा तत्रैव कर्मण्यनेन सूक्तेन शङ्खनाभिं पिप्पलीं च पिष्ट्वा, अभिमन्त्र्य हिरण्यशकलेन प्राशयेत्। तथा मेधाजननार्थं प्रथमं वाग्व्यवहारं कुर्वतः शिशोर्मातुरुत्सङ्गे विहितस्य अनेन सूक्तेनाज्यं हुत्वा तालुनि सम्पातानानयेत्। तथा दधिमधुनी एकत्र कृत्वा अनेन सम्पात्याभिमन्त्र्य शिशुं प्राशयेत्। तथोपनयनकर्मणि दण्डप्रदानानन्तरम् एतत् सूक्तं माणवकं वाचयेत्। तथायुष्कामोऽपि शङ्खपुष्पगन्धपुष्पप्राशनादीन्युक्तानि पञ्च कर्माणि कुर्यात्। तथा च कौशिकं सूत्रम्। अहं रुद्रेभिरिति शुक्लपुष्पे हरितपुष्पे शिंस्यनाभिपिप्पल्यौ जातरूपशकलेन प्राक् स्तनप्रदानात् प्राशयति। प्रथमप्रवदस्य मातुरुपस्थे तालुनि सम्पातान् आनयति। दधिमध्वाशयति। उपनीतं वाचयति। वार्षशतिकं कर्म" [कौ॰ २।१] इति। तथोपनयनेऽनेन

---

* M Bombay and Peterson. Some needlessly change ब्रह्मीभूता into ब्रह्मभूता; ब्रह्मीभूता occurs in Śāṅkara Bhāṣya on B. S. I 3 15

† The Gen. in मातुः shows that the reading उत्पत्ति found in all printed works is incorrect AVS shows the correct reading

सूक्तेनाज्यहोमं कुर्यात्। सुसितं हुपनयनं प्रक्रम्य "मेधाजननायुष्यैर्जुहुयात्" [कौ॰ ७।८] इति॥ तथाध्यायोत्सर्जनकर्मण्यनेन सूक्तेनाज्यं हुत्वा रसेषु सम्पातानानयेत्। तथा च कौशिकः [१४।३] 'उत्सर्जनम्' प्रक्रम्य "विश्वे देवाः" [१।३०] "अहं रुद्रेभिः" [४।३०] "सिंहे व्याघ्रे" [६।३८] "यशो हविः" [६।३९] इत्यादि॥

सर्वजगत्कल्पनास्पदं सच्चित्सुखात्मकं परं ब्रह्म स्वात्मत्वेन विदुषी अम्भृणाख्यस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मवादिनी स्वात्मानं सर्वात्मभावेन तुष्टाव। तदुक्तं दाशतय्यनुक्रमणिकायाम्— "अहमष्टौ वागाम्भृणी तुष्टावात्मानम्" [सर्वानुक्रमणी] इति। विशुद्धसत्त्वपरिणामरूपस्यान्तःकरणस्य वृत्तिविशेषोऽभिमानात्मकोऽहङ्कारः। तदुपलक्षितानवच्छिन्नात्मिका अहं रुद्रेभिः रुद्रैः एकादशभिः अष्टभिः वसुभिः। इत्थम्भावे तृतीया। तत्तद्देवात्मना चरामि। एवम् अहम् आदित्यैः इत्यादावपि योज्यम्। आदित्या द्वादशसंख्याका धात्रादयः। वसुरुद्रादित्यव्यतिरिक्ता गणशो वर्तमाना विश्वदेवाख्याः। एकस्यैव हि ब्रह्मणस्तत्तदुपाध्यवच्छेदेन वस्वादिदेवतारूपेण भेदावभासात्। वस्तुतस्त्वैक्यमेवेति तदनुसन्धाना ब्रह्मवादिन्येवं ब्रूते। तथा मित्रावरुणा। 'सुपां सुलुक्॰' [७।१।३९] इति द्वितीयाया आकारः। मित्रावरुणौ देवौ उभा उभौ अहम् एव परब्रह्मात्मिका बिभर्मि धारयामि। इन्द्राग्नी अपि अहम् एव धारयामि। उभा उभौ अश्विना अश्विनौ अपि अहम् एव धारयामि। मत्स्वरूपे अद्वितीये ब्रह्मणि सर्वं जगत्, शुक्तौ रजतमिव, अध्यस्तं सद् दृश्यते। माया च जगदाकारेण विवर्तते। तदाधारत्वेनासङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योपपत्तिः॥१॥

दुर्गभाष्यम्। वागाम्भृणीये वागेव ब्रवीति। अहम् एव रुद्रैः वसुभिः आदित्यैः विश्वदेवैः विश्वैश्च देवैः सहभूता चरामि स्तुतिरूपेण। अहम् एव मित्रावरुणा मित्रावरुणौ उभा उभावपि इन्द्राग्नी अश्विना अश्विनौ च उभा उभावपि बिभर्मि हविषा, मत्पूर्वकं हविःसम्प्रदानं सर्वदेवताभ्य इत्यभिप्रायः।

महेश्वरभाष्यम्। वागाम्भृणीयं सूक्तम्। वाग् वैदिकीयम्। आम्भृणस्य महतः फलस्य हेतुभूतेति तत्सम्बन्धिन्याम्भृणी च। सा वाग् आम्भृणीति विशेषणसमासः। वागाम्भृणी आत्मनो महिमानमाचष्टे। असत्यां सम्बन्धिभूतायां मयि* रुद्रादयश्चरन्तः कथं भवेयुः†, मूकास्तिष्ठेयुरित्येवमर्थं स्तुतिभूता वा तेषाम्। अहं रुद्रेभिः रुद्रैः वसुभिः च सह चरामि। अहम् आदित्यैः उत विश्वदेवैः अपि सर्वैर्देवैः। अहम् एव मित्रावरुणौ हविस्सम्प्रदानं कुर्वती‡ उभा उभावपि बिभर्मि पुष्णामि। अहम् एव इन्द्राग्नी। अहम् एव अश्विना अश्विनौ उभा उभौ। सर्वत्राकारो द्विवचनस्य स्थाने।

दीपिका। "इह शिष्टानुशिष्टानां शिष्टानामपि सर्वदा। वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥" इत्यादिवचनशतैः कविभिर्वाचां लोकयात्रामूलकत्वं प्रतिपादितम्। सा च निखिलव्यवहारनिदानं वाक् स्वमहिमानं प्रकटयति—अहमित्यादिभिरष्टाभिरृग्भिः। यद्यपि "आत्मप्रशंसां परगर्हामिव वर्जयेत्" [आप॰ ध॰ सू॰ १।७।२४] इति आगस्त्यनुशासनं तथापि भक्तजनानुकम्पया भूतार्थकथनं कथमप्यात्मप्रशंसाकोटौ विनिवेशयितुं न शक्यते, न वा दोषलेशेन स्पृश्यते। ये तावद् गणदेवता रुद्राश्च वसवश्च आदित्याश्च विश्वदेवाश्च सर्वे ते ममैवानुचराः। ये च प्रायेण युग्मश आहूयन्ते मित्रावरुणौ च इन्द्राग्नी च अश्विनौ च तेऽपि मयैव विधार्यन्ते। "स्तूयमाना हि देवता वीर्येण विवर्धते" "यस्य ब्रह्म वर्धनं यस्य सोमः" [ऋ॰ सं॰ २।१२।१४] इत्याद्युक्तेर्देवानां वक्ष्यमाणपुष्टिः स्तुत्याहुत्यधीना, स्तुतिराहुतिश्च मन्त्राधीना, मन्त्राश्च वागात्मकाः, अतः सर्वेषां देवानां वागधीनत्वमुपपद्यते। "यदाऽतमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः। तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी॥" [श्वेताश्व॰ ४।१८] इति श्रुतिरप्यक्षरशब्देन मामेव लक्षीकरोति। श्रुत्यन्तरमपि श्रूयताम्—"वागक्षरं प्रथमजा ऋतस्य। वेदानां मातामृतस्य नाभिः। सा नो जुषाणोपयज्ञमागात्। अवन्ती देवी सुहवा मे अस्तु॥" [तै॰ ब्रा॰ २।८।८।५] इति ॥१॥

रुद्रेभिः—The Maruts are known as Rudras from the name of their father: मरुतो तु नामास्यैवैतम् रुद्रा इति स्मृतम् *Bṛhaddevatā* v. 48. In

* यामपि—मुद्रितपाठः। † भवेरन्—मु॰ पा॰। ‡ कुर्वन्तो—मु॰ पा॰

the Brahmanas they become a separate class and their number is eleven त्रयस्त्रिंशद्वै देवा सोमपा । अष्टौ वसव एकादश रुद्रा द्वादशादित्या प्रजापतिश्च वषट्कारश्च । A B ii 4 For the ending see p 22

वसुभि —In RV the Vasus are vague in number and character They are specially connected with Indra though in later Vedic texts they are specially connected with Agni In AB, SB and later literature they are eight in number Of the four instrumentals only वसुभि is analysed in the Pada-text In the case of रुद्रेभि since भि comes after a long vowel no अवग्रह is used आदित्य and विश्वदेव are regarded as अ acc. to यचि अत् and not as पद, so the question of अवग्रह does not arise

आदित्यै —The Adityas are the sons of Aditi They are seven or eight in number in RV and much more definite than other groups Varuna is the chief of the Adityas In RV ii 27 1 six are enumerated Mitra, Aryaman, Bhaga, Varuna, Daksa and Amśa In the Brahmanas their number rose to 12 TB (i 1 [illegible] 1) mentions मित्र, वरुण, अर्यमन्, अंश, भग, धातृ, इन्द्र and विवस्वत् as the sons of Aditi *Cf* x 48 11 आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम

आदित्या द्युस्थाना द्वादश । तथा वसवोऽष्टौ पृथिवीस्थाना । तथा रुद्रा अन्तरिक्षस्थाना एकादश । Haradatta See also BU iii 9 2 5

विश्वदेवै —' A comprehensive group is formed of the Viśve devah or All Gods, who occupy an important position in the sacrifices *It is a fictitious sacrificial group meant to represent all the gods* in order that none should be excluded in laudations intended to be addressed to all But the All-gods are sometimes conceived as a narrower group, being invoked with other groups, such as the Vasus and Adityas ' MACDONELL, *Vedic Mythology* p 130

The names of the Vasus Rudras and Adityas as they appeared in later times are thus given in the *Mahabharata*

धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनल ।
प्रत्यूषश्च प्रभासश्च वसवश्चाष्ट विश्रुताः ॥
मृगव्याधश्च सर्पश्च निऋतिश्च महायशा ।
अजैकपादहिर्बुध्न्य पिनाकी च परंतप ॥

भवनोऽथेश्वरश्चैव कापाली च विशाम्पते ।
स्थाणुर्भगश्च भगवान् रुद्रास्तत्रावतस्थिरे ॥
धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या ज्वलन्तः सूर्यवर्चसः ।
महिमानं पाण्डवस्य कुर्वन्तस्तस्थुरम्बरे ॥

Ṣadguruśiṣya on AB. ii. 4.

मित्रावरुणा and अश्विना—the duals are irregular, as आ regularly occurs before consonants and at the end of a pāda in the older part of RV. See under x. 14. 11, p. 278.

बिभर्मि—like a mother; cf. मातेव यद् भरसे पप्रथानः v. 15. 4.

अश्विना—The two Aśvins are the surgeons of the gods and benefactors of gods and men. अश्विनौ—यद्व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः । अश्वैरश्विनावित्यौर्णवाभः । तत् कावश्विनौ ? द्यावापृथिव्यावित्येके । अहोरात्रावित्येके । सूर्याचन्द्रमसावित्येके । राजानौ पुण्यकृतावित्यैतिहासिकाः । Nir. xii. 1.

2

अहं सोममाहनसं बिभ-	अहम् । सोमम् । आहनसम् । बिभर्मि ।
र्म्यहं त्वष्टारमुत पूषणं भगम् ।	अहम् । त्वष्टारम् । उत । पूषणम् । भगम् ।
अहं दधामि द्रविणं हविष्मते	अहम् । दधामि । द्रविणम् । हविष्मते ।
सुप्राव्ये यजमानाय सुन्वते ॥२॥	सुप्रऽअव्ये । यजमानाय । सुन्वते ॥२॥

I (ahám) bear (bibharmi) the exciting (āhanásam) Soma (sómam). I (ahám) Tvaṣṭṛ (Tváṣṭāram), also (utá) Pūṣan (Pūṣáṇam) and Bhaga (Bhágam). I (ahám) bestow (dadhāmi) wealth (dráviṇam) on the sacrificer (yájamānāya) that offers oblation (havíṣmate) and that presses Soma (sunvaté), deserving of careful protection (suprāvyè).

आहनसम् आहन्तव्यमभिषोतव्यं सोमम्। यद्वा, शत्रूणामाहन्तारं दिवि वर्तमानं देवतात्मानं सोमम् अहम् एव बिभर्मि। तथा त्वष्टारम् उत अपि च पूषणम् भगम् च अहम् एव बिभर्मि। तथा हविष्मते हविर्भिर्युक्ताय सुप्राव्ये शोभनं हविर्देवानां प्रापयित्रे* तर्पयित्रे। अवतेस्तर्पणार्थात् 'अवितृस्तृतन्त्रिभ्य ईः' [उ० ३।१५८] इतीकारप्रत्ययः। चतुर्थ्येकवचने यणि 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' [८।२।४] इति सुपः स्वरितत्वम्। सुन्वते सोमाभिषवं कुर्वते। 'शतुरनुमः०' [६।१।१७३] इति चतुर्थ्या उदात्तत्वम्। ईदृशाय यजमानाय द्रविणम् धनं यागफलरूपमहमेव [दधामि] धारयामि। एतच्च ब्रह्मणः फलदातृत्वं 'फलमत उपपत्तेः' [ब्र० सू० ३।२।३८] इत्यधिकरणे भगवता भाष्यकारेण[1] समर्थितम्॥२॥

अथर्ववेदभाष्यम्। आहनसम् आहन्तव्यम् अभिषोतव्यं सोमम्, यद्वा शत्रूणाम् आहन्तारं दिवि वर्तमानं देवतात्मानं सोमम् अहम् एव बिभर्मि धारयामि पोषयामि वा। तथा त्वष्टारम् उत अपि च पूषणम् भगम् च एतत्संज्ञान् देवान् अहमेव बिभर्मि। तथा हविष्मते हविर्भिर्युक्ताय सुप्राव्ये शोभनहविर्भिर्देवानां प्रावित्रे तर्पयित्रे। अवतेस्तर्पणार्थात् 'अवितृस्तृतन्त्रिभ्यः'

---

* AVS shows the correct reading : शोभनहविर्भिर्देवानां प्रावित्रे Cf नियमनाख्य for विमानाख्यम् on p 270.

[1] "'फलम्' 'अतः' ईश्वराद् भवितुम् अर्हति। कुतः? 'उपपत्तेः'। स हि सर्वाध्यक्षः सृष्टि-स्थिति-संहारान् विचित्रान् विदधद् देशकालविशेषाभिज्ञत्वात् कर्मिणां कर्मानुरूपं फलं सम्पादयतीत्युपपद्यते।.. धर्माधर्मयोरपि हि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्यते फलस्य च दातृत्वेन—'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' इति। स्मर्यते चायमर्थो भगवद्गीतासु [७।२१]—

'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हि तान्॥'

इति। सर्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते। तदेव चेश्वरस्य फलहेतुत्वं यत् स्वकर्मानुरूपाः प्रजाः सृजतीति। विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते।" शारीरकभाष्यम्।

[उ°, ३।१५८] इति ईकारप्रत्ययः। चतुर्थ्येकवचने यणि 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' [८।२।४] इत्यनुदात्तस्य सुपः स्वरितत्वम्। सुन्वते सोमाभिषवं कुर्वते। 'शतुरनुमः' [६।१।१७३] इति विभक्तेरुदात्तत्वम्। ईदृशाय यजमानाय द्रविणम् धनं यागफलरूपम् अहम् एव दधामि प्रयच्छामि, फलमत उपपत्तेः [ब्र° सू° ३।२।३८] इति न्यायेन परब्रह्मणः फलदातृत्वस्य निर्णीतत्वात्॥२॥

दीपिका। न केवलं गणदेवता युग्मदेवताश्च मदधीनाः, स्वतन्त्रा अपि देवाः सर्वथा मम प्राधान्यमनुरुध्यन्ते। यागविशेषेषु नान्तरीयकतया वर्तमानं समुद्दीपकं सोमं तथा जगद्विधातारं त्वष्टारं पुष्टेः प्रापकं पूषणं सौभाग्यदैवतं च भगम्, अन्यांश्च तांस्तान् देवान् उक्तन्यायेनाहमेव धारयामि। यश्च यजमानो यथाविधि सोमाभिषवं विधाय मामुद्दिश्य हविः समर्पयति[1], स सर्वथा मदीयं रक्षणमर्हति, अहञ्च तस्मै धनसम्पदं प्रसादीकरोमि। यो यावद्ददाति हविरल्पं वा बहु वा, अहमेव तस्मै तावदेव गवाश्ववसुहिरण्यरूपं धनं ददामि, 'यादृगिव वै देवेभ्यः करोति तादृगिवास्मै देवाः कुर्वन्ति' इति न्यायात्। (न केवलं सोमयागेषु यागात्मका मन्त्रा अपेक्ष्यन्ते, वाचैव स्त्रीभूतया स्त्रीकामेभ्यो गन्धर्वेभ्यः सोमः क्रीयते। एतच्चैतरेय-ब्राह्मणे प्रथमाध्यायस्य प्रथमे खण्डे प्रपञ्चितम्।) यस्तावत् सर्वात्मना मामुपास्ते स आर्त्विजीनो[2] भवति, ममैव च प्रसादेन प्रभूतं दक्षिणादिकं लभते॥२॥

आहनसम्—the meaning of the word is doubtful Here it seems to mean striking, exciting, or foaming, fermenting Yāska explains आहनसः as आहननवन्तः वचनवन्तः (Nir. iv. 16) which is explained by Durga as सम्मोहयितारः, causing infatuation or delusion Under ix 75 5 S says ग्रावाभिषुतेन हन्यमानः, अभिहन्यमानः, अभिषूयमाणः, स्तुतिमन्तः शब्दवन्तो वा

त्वष्टारम्—"Tvaṣṭṛ is the Hephaistos or Vulcan of the Indian pantheon, the ideal artist, the divine artisan, the most skilful of workmen." (Mum) "He is the power which shapes the

[1] Cf. इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति। यन्ति प्रमादमतन्द्राः॥ viii. 2.18.

[2] यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधाति स आर्त्विजीनो भवति। Mahābhāṣya (ed Kielhorn), Vol. I, p. 3.

germ in the womb for men and animals alike he fashions husband and wife for each other from the womb and presides over generations" (KEITH)

भगम्—The god of fortune and one of the Ādityas. Av. bagha god.

द्रविणम्—AV reads the pl. द्रविणा for द्रविणम्. For mng. see p. 126.

हविष्मते—not analysed in the Pada text because हविस् is a भ here and not a पद. Cf. x. 48. 4 पुरु सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमन्दिषुः।

सुप्राव्ये—As Geldner points out सुप्रावी in ii. 26. 1 is explained by प्रविद् in the next stanza. S. derives it from अव् to aid, western scholars evidently derive it from प्री 'to lead, guide' and think the word means 'well advised', 'well prompted'. The analysis in the Padapāṭha is peculiar. As प्रावी occurs several times, सु has evidently been compounded with प्रावी, so we should expect the avagraha after सु but we find the avagraha after सुप्र. The Atharva Veda Prātiśākhya notes the peculiarity in its rule सुप्राव्या च iv. 11. In our stanza AV reads सुप्राव्या which Bloomfield regards either as the feminine Nom. sing. or neut. Acc. plural of सुप्राव्य but which the com. on the Atharvaveda Prātiśākhya regards as the Inst. sing. of सुप्रावी—भवति सुप्रपूर्वस्य टाशब्द स्वरित पर। सुप्राव्येति तृतीयाया वैयग्लन्दसि सर्वत्र॥ The opposite of सुप्रावी is दुष्प्रावी iv. 25. 6 (analysed as दुःऽप्रऽअव्य). देवावी occurs several times in RV.

3

अहं राष्ट्री संगमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम्॥३॥

अहम्। राष्ट्री। सम्ऽगमनी। वसूनाम्।
चिकितुषी। प्रथमा। यज्ञियानाम्।
ताम्। मा। देवाः। वि। अदधुः। पुरुऽत्रा।
भूरिऽस्थात्राम्। भूरि। आऽवेशयन्तीम्॥३॥

I (*aham*) am queen (*rāṣṭrī*), gatherer (*saṅgamanī*) of treasures (*vasūnām*), the wise (*cikituṣī*), first (*prathamā*) of those that are worthy to be worshipped (*yajñiyānām*) Me (*mā*) as such (*tām*) the gods (*devāḥ*) have put (*vyadadhuḥ*) in many places (*purutrā*), making me dwell in many abodes (*bhūri sthātrām*) and enter into (*ā veśayantīm*) many (*bhūri*)

अहं राष्ट्री। ईश्वरनामैतत्। सर्वस्य जगत ईश्वरी। तथा वसूनाम् धनानां सङ्गमनी सङ्गमयित्री उपासकानां प्रापयित्री। चिकितुषी यत् साक्षात्कर्तव्यं परं ब्रह्म तज् ज्ञातवती स्वात्मतया साक्षात्कृतवती। अत एव यज्ञियानाम् यज्ञार्हाणां प्रथमा मुख्या। या एवंगुणविशिष्टाहं तां [मां] मा भूरिस्थात्राम् बहुभावेन प्रपञ्चात्मनावतिष्ठमानाम्। भूरि भूरीणि बहूनि भूतजातानि आवेशयन्तीम् जीवभावेनात्मानं प्रवेशयन्तीम् ईदृशीं मां पुरुत्रा बहुषु देशेषु व्यदधुः देवा विदधति कुर्वन्ति। उक्तप्रकारेण वैश्वरूप्येणावस्थानाद्* यद् यत् कुर्वन्ति तत् सर्वं मामेव कुर्वन्तीत्यर्थः ॥३॥

अथर्ववेदभाष्यम्। अद्वितीयब्रह्मात्मिका अहं राष्ट्री। ईश्वरनामैतत्। कृत्स्नस्य दृश्यप्रपञ्चस्य राज्ञी नियन्त्री। अत एव वसूनाम् धनानां सङ्गमनी सङ्गमयित्री, उपासकानां फलस्य प्रापयित्री। चिकितुषी यत् साक्षात्कर्तव्यं परं ब्रह्म तज् ज्ञातवती स्वात्मतया साक्षात्कृतवती। कित ज्ञाने [धा° ३।११९] इत्यस्मात् लिटः क्वसुः। तदन्तात् 'उगितश्च' [४।१।६] इति ङीप्। अत एव यज्ञियानाम् यज्ञार्हाणां देवानाम् प्रथमा मुख्या। 'यज्ञर्त्विग्भ्यां घखञौ' [५।१।७१] इत्यर्हार्थे घ-प्रत्ययः। तां तादृशीं मा मां भूरिस्थात्राम् बहुभावेन प्रपञ्चात्मना स्थितामवस्थानां भूरि बहुत्वं एवम् आवेशयन्तीं, उपासकान् प्रापयन्तीं देवाः पुरुत्रा बहुषु स्थानेषु व्यदधुः विदधति कुर्वन्ति। 'देव-मनुष्य-पुरुष-पुरु-मर्त्येभ्यः'' [५।४।५६] इति सप्तम्यर्थे त्रा-प्रत्ययः। उक्तप्रकारेण वैश्वरूप्येणावस्थानाद् यद् यत् कुर्वन्ति देवास्तत् सर्वं मामेव कुर्वन्तीत्यर्थः ॥३॥

* Many printed editions wrongly place a full stop here

दीपिका। अहमेव दिवश्च पृथिव्याश्चेशे, अहमेव द्विपदश्चतुष्पदश्चेशे। ममैव प्रशासने सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, ममैव प्रशासने द्यावापृथिव्यौ विधृते तिष्ठतः, ममैव प्रशासने निमेषा मुहूर्त्ता अहोरात्रा अर्धमासा मासा ऋतवः संवत्सरा विधृतास्तिष्ठन्ति, ममैव प्रशासने सागराः सरितः सरस्यश्च सम्यक् स्यन्दन्ते, किं बहुना समग्रस्य ब्रह्माण्डस्य सम्राडहमेवास्मि। दिवि वा भुवि वा यानि मणिरत्नानि विलसन्ति तानि सर्वाणि मदायत्तानि। देवेषु मनुजेषु च ये धनिककुबेरास्तेषामपि मनोरथानामप्यभूमिर्या सम्पत् सापि ममैव वशे वर्तते। अत एव च वाग् वै वसिष्ठेति [श॰ ब्रा॰ १४।९।२।२] श्रुतिमां वसिष्ठेति व्यपदिशति। मम भक्तेषु यो य ऐश्वर्यं कामयते तं तं तेन योजयामि। किञ्च भूतं भवद्भविष्यच्च व्यवहितं विप्रकृष्टञ्च सर्वमेव करामलकवत् पश्यामि, मत्त एव सर्वस्य प्रवृत्तेः। "इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥" 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥" इत्यादिन्यायेन विश्वं समग्रं समुद्भासयित्र्यहं सर्वज्ञानानामायतनम्। ये च देवा यज्ञेषु हूयन्ते तेषु च मम प्राथम्यं निर्विवादम्, वाङ्मुखेनैव यज्ञस्य प्रवृत्तेः। अहं तावत् तेषु तेषु प्राणिजातेषु नानाभावेनावस्थिता। सरीसृपाणां स्फुरितेषु विहगानां कूजितेषु पशूनां वाशितेषु नराणां च भाषितेषु ममैवाभिव्यक्तिर्भवति। सुसंस्कृता च वाक् प्रथमतो मन्त्रेष्वेवावस्थिता ततश्च वेदानां समनुशीलनेन तस्या बहुलप्रचारः समजनि, एवम् ऋषिषु प्रविष्टाहं देवैर्बहुधा प्रचारिता। तदेतदृषिणाप्युक्तम्—

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते॥ इति॥३॥

राष्ट्री—*fem. of* राष्ट्र *formed with* ङन् *from* राज् *Cf* क्रोष्ट्री Under viii 100 10 यद्वाग् वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा। चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम॥ "When, uttering words that no one comprehended, Vāk, Queen of Gods, the Gladdener, was seated, the heaven's four regions drew forth drink and vigour now whither hath her noblest portion vanished?" S explains it as राजनशीला Under AV iv. 1. 2 S. says. ईश्वरनामैतत्। राष्ट्री सर्वजगद्व्यवहारस्य ईश्वरा नियन्त्री। *Cf.* AB iv 2 वाग् वै राष्ट्री. Acc. to some scholars राष्ट्री (ruler) is masc V. G. S, p 87 top.

सङ्गमनी वसूनाम्—*cf* TS III 5 1 1 निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती holder and gatherer of riches clad in all rich forms (K) In x 48 1 Indra says अहं धनानि सं जयामि शश्वत *Cf* गोभिरश्वेभिर्वसुभिर्हिरण्यैः vii 9 6 Some explain, because I am the gatherer up of treasures therefore I am the first of those that merit worship—यज्ञियानाम्

चिकितुषी—See p 198 प्रथमा—See p 157

भूरिस्थात्रां भूर्यावेशयन्तीम्—*Cf* RV x 71 3 यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम् । तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥ With sacrifice the track of Vak they followed and found her harbouring with the Rs s They brought her dealt her forth in many places seven singers make her tone resound in contrast Both stanzas are in reality addressed to Vac speech the atmastuti 10 125 containing perhaps, the later elaboration of the idea *Repetitions*

पुरुत्रा—Note that though त्र and त्रा are added in practically the same sense (V G S p 218) त्रा is accented while त्र (अत्र) accents the immediately preceding syl In the Pada text also त्रा is separated by अवग्रह but त्र is not so separated Doubtless it is the character of the form to which त्र is attached as being pronominal roots that prevents its separation from them rather than anything in the suffix itself The suffix त्र is preserved in Beng दखीनर which is formed by popular etymology from देवता Skt *puru* Av *pouru* O P *paru* Gk *polus* (from **palus*) Lith *pilus* I E **pllus*

भूरिस्थात्राम्—occurs only here in RV The accent shows that it is a बहुव्रीहि compound like *bhūri śṛṅga* many horned *bhūri varman* etc भूरि being formed with the उणादि suffix क्रिन् (अदि शदि भू शुभिभ्यः क्रिन् iv 65) is accented on the first syl lit becoming more and more increasing hence abundant स्थात्र is formed in the अधिकरण वाच्य and means station place The suffix त्र (ष्ट्रन्) was originally the primary ending त with a secondary र and was generally added in the करण or अधिकरण वाच्य

आवेशयन्तीम्—*Cf* अनेन जीवेनात्मनानुप्रविश्य—छा ह 3 2 AV reads आवेशयन्त which qualifies देवा TS III 5 1 1 however reads आवेशयन्ती.

4

मया सो अन्नमत्ति यो विपश्यति	मया सः अन्नम् । अत्ति । यः विऽपश्यति ।
यः प्राणिति य ईं शृणोत्युक्तम् ।	यः । प्राणिति । यः । ईम् । शृणोति । उक्तम् ।
अमन्तवो मां त उप क्षियन्ति	अमन्तवः माम् । ते । उप । क्षियन्ति ।
श्रुधि श्रुत श्रद्धिवं ते वदामि ॥४॥	श्रुधि । श्रुत श्रद्धिऽवम् । ते । वदामि ॥४॥

By me (*maya*) he (*sah*) eats (*atti*) food (*annam*) who (*yah*) sees (*vipaśyati*), who breathes (*yah prāṇiti*), who (*yah*) hears (*śrnoti*) what is spoken (*īm uktam*) Unknowing (*amantavah*), they (*te*) dwell (*upakṣiyanti*) on me (*mam*) Hear (*śrudhi*), O illustrious one (*śruta*) That which is creditable (*śraddhivam*), I say (*vadami*) unto you (*te*)

योऽन्नमत्ति स भोक्तृशक्तिरूपया मया एव अन्नमत्ति । यः च विपश्यति आलोकयतीत्यर्थः । यः च प्राणिति श्वासोच्छ्वासादिव्यापारं करोति सोऽपि मयैव । यः च [ईम्] उक्तं शृणोति । श्रु श्रवणे [धा° १।९२४] । 'श्रुवः शृ च' [३।१।७४] इति श्रुधातोः शृ-भावः । य ईदृशीमन्तर्यामिरूपेण स्थितां मां न जानन्ति ते अमन्तवः अमन्यमाना अजानन्त उपक्षियन्ति उपक्षीणाः संसारेण हीना भवन्ति । मनेरौणादिकस्तु-प्रत्ययः । नञ्समासे व्यत्ययेनान्तोदात्तत्वम् । यद्वा भावे तु-प्रत्ययः । ततो बहुव्रीहौ 'नञ्सुभ्याम्' [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम् । माम् अमन्तवः मद्विषयज्ञानरहिता इत्यर्थः । हे श्रुत विश्रुत सखे, श्रुधि मया वक्ष्यमाणं शृणु । छान्दसो विकरणस्य लुक् । 'श्रुशृणुपॄकृवृभ्यः०' [६।४।१०२] इति हेर्धिभावः । किं तच्छ्रोतव्यम् ? श्रद्धिवम् । श्रद्धिः श्रद्धा तया युक्तम् । श्रद्धायत्नेन लभ्यमित्यर्थः । 'श्रदन्तरोरुपसर्गवद्वृत्ति'रिष्यते [३।३।१०६ का*] इति श्रच्छब्दस्योपसर्गवद्वर्तमानत्वात् 'उपसर्गे घोः किः' [३।३।९२] इति कि-प्रत्ययः । मत्वर्थीयो वः । ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि उपदिशामि ॥४॥

---

* वक्ष्या Mallinātha on *Śiś* viii. 11. This is not found in *Mbh* M² wrongly gives the reference as 1 4 57 2

wonder that we should find forms like विवसेत्, भावसेषु, etc., in class. Skt.

ईम्—anticipates सत्यम्. See p. 174.

अमन्तवः—अमन्तु occurs in x. 22. 8 also: अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः। "Around us is the Dasyu, riteless, void of sense, inhuman, keeping alien laws."

क्षियन्ति—See p. 193.

श्रुधि—See p 122.

श्रुत—S appears to be right in regarding it as a vocative. Most European scholars think it is the 2. plural root-aorist imperative of श्रु Peterson translates: "Listen, one and all, this is a true thing I say." This is ingenious but not at all convincing Though both finite verbs and vocatives are liable to loss of accentuation, श्रुत as a finite verb would have been accented as beginning a new sentence Pāṇini distinctly says तिङ्ङतिङः i.e., a finite verb is unaccented *except after a finite verb* And the plural श्रुत almost immediately followed by the singular ते would be singularly inappropriate Ludwig in his commentary takes श्रुतश्रद्धिवम् as one word and explains what is worthy of credence acc. to tradition. In his translation he takes श्रुत as the 2. pl. imperative of श्रु

श्रद्धिवम्—worthy of credence, true It is a peculiar form with the sense of a gerundive It had already become rare in the Vedic period and AV. substitutes the more usual श्रद्धेय for it

5

अहमेव स्वयमिदं वदामि	अहम् । एव स्वयम् । इदम् वदामि ।
जुष्टं देवेभिरुत मानुषेभिः ।	जुष्टम् देवेभिः उत । मानुषेभिः ।
यं कामये तंतमुग्रं कृणोमि	यम् । कामये । तम्ऽतम् । उग्रम् । कृणोमि ।
तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥५॥	तम् । ब्रह्माणम् । तम् ऋषिम् ।
	तम् । सुऽमेधाम् ॥५॥

I of my own self (*aham evá svayam*) say (*vadāmi*) this (*idam*), welcome (*juṣṭam*) to gods (*devebhiḥ*) and (*uta*) men (*mā́nuṣebhiḥ*) whomsoever (*yam*) I desire (*kāmaye*) him (*tam-tam*) I make (*kṛṇomi*) mighty (*ugrám*), him (*tam*) priest (*Brahmā́ṇam*), him (*tam*) the seer (*ṛṣim*), him (*tam*) the sage (*su-medhā́m*).

अहं स्वयमेव इदम् वस्तु महात्म्यकं वदामि उपदिशामि। देवेभिः देवैरिन्द्रादिभिरपि जुष्टम् सेवितम्। उत अपि च मानुषेभिः मनुष्यैरपि जुष्टम्। ईदृगस्मदात्मिकाहं कामये यं पुरुषं रक्षितुमहं वाञ्छामि तंतम् पुरुषम् उग्रं कृणोमि सर्वेभ्योऽधिकं[1] करोमि। तम् एव ब्रह्माणम् स्रष्टारं करोमि। तम् एव ऋषिम् अतीन्द्रियार्थदर्शिनं करोमि। तम् एव सुमेधाम् शोभनप्रज्ञं करोमि ॥५॥

अथर्ववेदभाष्यम्। अहं स्वयमेव आत्मनैव। [एवकारः] 'नान्योऽस्ति ममोपदेष्टा' इत्यवधारणार्थः। इदम् आपरोक्ष्येणानुभूयमानं महात्म्यं वस्तु वदामि लोकहितार्थम् उपदिशामि। तद् विशेष्यते। देवानाम् इन्द्रादीनां जुष्टं प्रियम् उत मानुषाणाम् मनुष्याणामपि प्रियम् परानन्दरूपत्वात्। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' [बृ आ ४।३।३२] इति श्रुतेः। यद्वा देवमनुष्यादिभिः सेवितम् इष्टं वक्ष्यमाणं मदीयं माहात्म्यम् अहम् एव स्वयम् वदामि प्रकटयामीत्यर्थः। किं पुनस्तद् इत्याह— यम् इति। यं कामये। तंतम् इति प्रतिनिर्देशस्य वीप्सितत्वाद् अत्रापि वीप्सा द्रष्टव्या। यंयं पुरुषं रक्षितुम् अहं वाञ्छामि तंतं कृत्स्नं पुरुषम् उग्रं कृणोमि। सर्वेभ्योऽधिकं[1] दुर्धर्षं करोमि। यद्वा उग्र ईश्वरः। जगन्निर्माणसमर्थमीश्वरं करोमि। तम् एव ब्रह्माणं स्रष्टारं करोमि, तथा तम् ऋषिम् अतीन्द्रियार्थदर्शिनं करोमि, तम् एव सुमेधाम् शोभनप्रज्ञं च करोमि। एवं सर्वजगदधिपत्य-महात्म्यकरं मामात्मन्याविष्कृतम् ॥५॥

---

[1] Strict grammar as well as logic requires सर्वेभ्यः or सर्व-भ्योऽधिकम्.

अथर्ववेदभाष्यम्। यः भोक्तृजनः अन्नम् अत्ति सः भोक्तृशक्तिरूपया मया एव अन्नम् अत्ति। यः [illegible] जनः विपश्यति विविधं जगत् चक्षुषा साक्षात्करोति। यः [illegible] प्राणिति श्वासोच्छ्वासादिव्यापारं करोति। अन प्राणने [धा° २।६०]। अदादित्वाच्छपो लुक्। रुदादिभ्यः सार्वधातुके [७।२।७६] इतीडागमः। अनितेः [८।४।१९] इति णत्वम्। ईम् इदम् उक्तं स्वरूपं यः च पुरुषः शृणोति श्रोत्रेन्द्रियेण गृह्णाति ते सर्वेऽपि तत्तदुक्तरूपात्मना अवस्थितया मयैव तत्तद्व्यापारं कुर्वन्तीत्यर्थः। शृणोतीति। श्रु श्रवणे [धा° १।९२४]। श्रुवः शृ च [३।१।७४] इति श्नुप्रत्ययः धातोः शृभावश्च। ये ईदृशीम् अन्तर्यामिरूपेण स्थितां मां न जानन्ति ते माम् अमन्तवः अमन्यमाना अजानाना मद्विषयज्ञानरहिताः उप क्षियन्ति उपक्षीणाः संसारेण निहीना भवन्ति। मनेरौणादिकस्तुप्रत्ययः। नञ्समासे [व्यत्यये]नान्तोदात्तत्वम्। यद्वा भावे तु-प्रत्ययः। ततो बहुव्रीहौ 'नञसुभ्याम्' [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम्। हे श्रुत विश्रुत हे सखे श्रुधि मयोक्तं शृणु। छान्दसो विकरणस्य लुक्। 'श्रुशृणुपॄकृवृभ्यः०' [६।४।१०२] इति हेर्धिभावः। अहं ते तुभ्यं श्रद्धेयं श्रद्धातव्यम्। श्रद्धा भक्तिः। तया प्राप्यं परतत्त्वस्वरूपं वदामि उपदिशामि। श्रद्धेयम् इति। अचो यत् [३।१।९७] इति धातो यत्प्रत्ययः। ईद्यति [६।४।६५] इतीकारः ॥४॥

दीपिका। "दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे। केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥" इति न्यायेन ये सम्यग् वा असम्यग् वा पश्यन्ति, ये सम्यग् वा असम्यग् वा शृण्वन्ति, किं बहुना येषामेव प्राणा वर्तन्ते तेषामाहार्यसम्पादनं मयैव विधीयते। मया प्राणिनः प्राणवन्त इति विद्धि। एते सर्वे मामेवोपजीवन्ति दौर्भाग्यात्तु नैतदवबुध्यन्ते। स्वो हि भावो मनुष्याणामात्मनो हृदयानुमानेन दर्शनं नाम। सत्यसंहिताश्च देवाः, अनृतसंहिता मनुष्याः।[1] तस्यैतदाश्चर्यं यत् सर्वं सत्यं वदितुमसमर्थस्त्वं मामप्येवं-

[1] AB. 1. 6

वादिनीं न श्रद्धास्यसि। तद् [illegible] न समीचीनं स्यात्। सत्कार्यपरम्परया प्रज्ञाप्रकर्षेण च शारदसुधाकरसमुज्ज्वलं यशःपटलं त्वया समधिगतम्, उपदेशभाजनत्वं च समासादितम्। अतः सर्वथा सत्यमेवैतत् ते पुरतो विवृणोमि, मास्म ते विशङ्का भूत्। न खलु 'अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्ते' इतिवद् व्यामोहकम्, न वा 'शिला ते वर्धते वत्स गुडूचीं श्रद्धया पिब' इतिवत् प्ररोचकम् अश्रद्धेयं किमपि प्रलपामि। प्रायेण त्वयापि बहुशः प्रत्यक्षीकृतं यद् वाच उत्क्रान्तौ शरीरं काष्ठकुड्यकल्पं सम्पद्यते, दर्शनस्य श्रवणस्य प्राणनस्य च वार्ताप्यस्तमेतीति। तथा च श्रुतिः—"वाचं देवा उपजीवन्ति विश्वे। वाचं गन्धर्वाः पशवो मनुष्याः। वाचीमा विश्वा भुवनान्यर्पिता।" [तै° ब्रा° २।८।८।४] इति। "वागग्रेगा अग्र एतृजुगा देवेभ्यो यशो मयि दधती, प्राणान् पशुषु प्रजां मयि च यजमाने च" [तै° सं° ३।१।१०।२] इति। "वाग् वै शर्म" [ऐ° ब्रा° १०।८] इति च ॥४॥

मया सो अन्नमत्ति—Both here and under AV iv 30 4 S supplies यः which he construes with अत्ति and explains—he who eats food does so through me, etc. This अध्याहार to preserve symmetry is however, a bit far fetched. Vak is solicited for food and vigour in viii 100 11 देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु॥ 'The gods generated Vak the goddess, animals of all forms speak her. May she, the Gladdener, yielding food and vigour, the milch cow Vāk, properly praised, approach us.' Cf x 48 1 अहं दाशुषे विभजामि भोजनम्

For सो अन्नमत्ति AV has सोऽन्नमत्ति. The metre shows that the RV form is original.

विपश्यति—Cf x 187 4 यो विश्वाभि विपश्यति भुवना सं च पश्यति।

प्राणिति—Note that it is not analysed in the Pada text.* AV. reads प्राणति for प्राणिति. Similarly we have in AV. यच्च प्राणति यच्च न though ŚB., TB. and BU show the normal प्राणिति. Similarly ŚB has कर्ण इव प्राणिति चाप चानिति where GB has प्राणति चापानति च. No

---

* प्राणीत्यादिति नेङ्ग्यते प्राकृतो ह्युपसर्गः।

दीपिका। देवानां मनुष्याणाञ्च प्रियमिदं रहस्यं भक्तजनानुकम्पया स्वयमेव सुहृद्भूय विवृणोमि। अतोऽस्य सत्यतायां लेशतोऽपि संशयो न कार्यः। भक्ताश्चोपासकाश्च भक्तिप्राग्भारविवशीकृतस्वान्ताः सर्वथा विचारविधुरा भजनीयस्य परमाणुप्रमाणानपि गुणान् पर्वतीकुर्वन्ति। आश्रिताश्च शरणागताश्च शरण्यस्य सौमनस्यमेवाधिगन्तुकामास्तस्य प्रशंसायां सहस्रमुखतामात्मन आविष्कुर्वन्ति, न च गणयन्त्युत्कटतममप्यतिशयोक्तिजातम्। दूताश्च स्वभावत एव यथाभूतं वस्तुतत्त्वं विपर्यासयन्ति। 'नाहं दूती तनोस्तापस्तस्याः कालानलोपमः' इत्यादिदूतिकाणामुदाहरणमेवात्र साक्षिभूयमावहति। परं स्वप्नेऽपि भ्रमप्रमादविप्रलिप्साकरणापाटवादिभिरनाक्रान्तायाः परापराणां परमया परमेश्वर्या मया यदुच्यते, देवानां मनुष्याणां च हितकाम्यया तेषां हृदयाह्लादकरं यदुपदिश्यते, सर्वथा श्रद्धेयतममेव तत्।

जगतीतलस्थं निखिलं बलं च प्रज्ञानं च मदधीनमेव। देवो वा मर्त्यो वा य एव बलं कामयते स क्षेमे बहुमततमस्तमोजिष्ठं बलिष्ठं च विदधामि, येन सुरेषु वाप्यसुरेषु वा, नरेषु वा पशुषु वा नैव प्रभवति कोऽपि तमभिभवितुम्। यो वा 'धिग् बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम्' इति मन्यमानः शारीरं वीर्यं श्वादवत् चेतस्तं समाचरन् सर्वथा बलास्थाविरहितः परलोकसाधनीं प्रज्ञां प्रार्थयते तस्य भक्तेः कर्मणश्च तारतम्येन तं सर्वजनवरणीयं बृहस्पतिप्रतिमं पुरोहितं वा विदधामि, भूदेवकुलशिखरचरणयुगलम् इन्द्रादीनामपि 'पूज्यं' स्तुत्यं मन्त्रद्रष्टारं वा सम्पादयामि, सर्वधामप्रतिहतगतिप्रसरमतीन्द्रियाणामपि भावानां सम्प्रेक्षितारं त्रिभुवनशरण्यं देवदानवादिसर्वसत्त्ववरेण्यं वा विदधामि। सर्वरूपा सर्वाधिष्ठात्री नियामिका, यदेवेच्छामि तदेव तदात्व एव सत्यं सञ्जायते। सर्वथा भक्तानां कल्पलतैवास्मि। श्रुतिरप्येतदेव समुद्घोषयति— वागृषयो मन्त्रकृतो मनीषिणः। अन्वैच्छन् देवास्तपसा श्रमेण। तां देवीं वाचं हविषा यजामहे। सा नो दधातु सुकृतस्य लोके॥ [तै° ब्रा° २।८।८।५] इति। वाचं धेनुमुपासीत। तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः। तस्यै द्वौ स्तनौ देवा उपजीवन्ति—स्वाहाकारं च वषट्कारं च, हन्तकारं मनुष्याः, स्वधाकारं पितरः, [illegible] वत्सः। बृ° आ° उ° ५।८। इति च॥५॥

स्वयम्—from the stem sva after the analogy of अयम्, though popularly it is dissolved as सु अयम् on the principle सर्वं कार्यमात्मीयं पश्यति

जुष्टम्—Note that unlike most past participles जुष्ट is accented on the first syl नित्यं मन्त्रे ६।१।२१० (*following* जुष्टार्पिते च छन्दसि ६।१।२०९) As the word is found thrice accented on the second syl in AV later grammarians repudiate the rule नित्यं मन्त्रे and stick to जुष्टार्पिते च छन्दसि It was probably because जुष्ट lost the sense of a participle and came to be used as an ordinary adjective in the sense of *agreeable, pleasing* that the accent was shifted *Cf.* धूर्त which is evidently a past participle (उ° ३।८६) but which along with हस्त, गर्त, मर्त, etc, is accented on the first syl

देवेभिरुत मानुषेभिः—AV reads देवानामुत मानुषाणाम् When क्त is added to denote past time the Instr is used in connexion with it, when it denotes present time the Gen is used acc to क्तस्य च वर्तमाने 2 3 67 जुष्ट is read in the list of words with क्त denoting present time

शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि।
रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि॥
हृष्टतुष्टौ तथाकान्तस्तथोभौ संयतोद्यतौ।
कष्टं भविष्यतीत्याहुरमृताः पूर्ववत् स्मृताः॥

Mahābhāṣya, 3 2 188 The Dat is also often used with जुष्ट (क्रियायोगे चतुर्थी or रुच्यर्थानां प्रीयमाण इति चतुर्थी) *e g* जुष्टं मनाय दाशुषे i 11 4

तम्—Rhetoricians point out that the repetition of तम् makes the repetition of यम् unnecessary, the same however, can hardly be said of यम् which is not उद्देश्य but प्रतिनिर्देश्य Because of the वीप्सा of तम् we are to understand another यम् after यम्

तम्—there will be अनुषङ्ग of one तम् from तं ब्रह्माणं, etc, in each case—i e तं ब्रह्माणम्, etc *Cf* CU v 10 6 [illegible] etc

ब्रह्माणम्—superintending priest "[illegible]" See *Vedic Index*, II 77 78 *Cf.* [illegible]

सामगम् x. 107. 6 (तमेव दक्षिणाया दातारम् ... यज्ञन्यम् ... अध्वर्युम्, सामगा सार्थ गातारम् ... उक्थशासं होतारम्. S)

सुमेधाम्—occurs also in स सुक्रतुमृत्यधीतिं सुमेधा बृहस्पति मतिरच्छा जिगाति x 47 6.* It is evidently a contracted form of सुमेधसम् for metrical reasons. See Lanman's *Noun-Inflection in the Veda*, p 552, *Alt-indische Grammatik*, III, 284 β. Skt. *medhā'*, Av. *mazdā*, from **maz-dhā* from **mndh-tā*.

सुमेधाम् appears like an anticlimax after ब्रह्माणम् and ऋषिम् who certainly can never be accused of lacking in मेधा. Can we not regard the last सम as पुरस and construe सुमेधाम् with ऋषिम् or with both ब्रह्माणम् and ऋषिम्? The figure of speech will then be सार or climax (उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते।)

6

अहं रुद्राय धनुरा तनोमि	अहम् । रुद्राय । धनुः । आ । तनोमि ।
ब्रह्मद्विषे शरवे हन्तवा उ ।	ब्रह्मऽद्विषे । शरवे । हन्तवै । ऊँ इति ॥
अहं जनाय समदं कृणो-	अहम् । जनाय । सऽमदम् । कृणोमि ।
म्यहं द्यावापृथिवी आ विवेश ॥६॥	अहम् द्यावापृथिवी इति । आ । विवेश ॥६॥

I (*aham*) stretch (*ā tanomi*) the bow (*dhanuḥ*) for Rudra (*Rudrā'ya*) for his arrow (*śarave*) to kill (*hantavai u*) the Brahman-hater (*brahma dviṣe*). I (*aham*) make (*kṛṇomi*) strife (*samadam*) for the people (*janāya*). I (*aham*) have entered (*ā viveśa*) heaven and earth (*Dyā'vā-pṛthivī*)

पुरा त्रिपुरविजयसमये रुद्राय रुद्रस्य । षष्ठ्यर्थे चतुर्थी [२।३।६२।१] । महादेवस्य धनुः चापम् अहम् आतनोमि ज्यया ततं करोमि । किमर्थम् ? ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे शरुं हिंसकं त्रिपुरनिवासिनमसुरं हन्तवै

* In RV. viii. 5. 6 सुमेधाम् is fem.

हन्तु हिंसितुम्। हन्तेः 'तुमर्थे सेसेन्' [३।४।९] इति तवै-प्रत्ययः। 'अन्तश्च तवै युगपत्' [६।१।२००] इत्याद्यन्तयोर्युगपदुदात्तत्वम्। शॄ हिंसायाम् [धा॰ ९।१६] इत्यस्मात् 'शॄस्वृस्निहि' [उ॰ १।११] इत्यादिना उ-प्रत्ययः। 'क्रियाग्रहणं कर्तव्यम्' [१।४।३२ भा॰] इति कर्मणः सम्प्रदानत्वाच्चतुर्थी। उ-शब्दः पूरकः। अहम् एव समदम्। समानं माद्यन्त्यस्मिन् (?) इति समत् संग्रामः। स्तोतृजनार्थं शत्रुभिः सह संग्राममहमेव कृणोमि करोमि। तथा द्यावापृथिवी दिवञ्च पृथिवीञ्च अन्तर्यामितया अहमेव आविवेश प्रविष्टवती ॥६॥

अथर्ववेदभाष्यम्। पुरा त्रिपुरविजयसमये रुद्राय। षष्ठ्यर्थे चतुर्थी। रुद्रस्य महादेवस्य धनुः अहम् आ तनोमि आततज्यं करोमि। किमर्थम्? ब्रह्मद्विषे ब्राह्मणानां द्वेष्ट्रे शरवे। शॄ हिंसायाम् [धा॰ ९।१६]। 'शॄस्वृस्निहि' [उ॰ १।११] इत्यादिना उ-प्रत्ययः। हिंसकाय। उभयत्र 'क्रियाग्रहणं कर्तव्यम्' [१।४।३२ भा॰] इति कर्मणः सम्प्रदानत्वाच्चतुर्थी। ब्रह्मद्विषं शरुं त्रिपुरनिवासिनम् असुरगणं हन्तवै हन्तुं हिंसितुम्। हन्तेः 'तुमर्थे सेसेन्' इति तवै-प्रत्ययः। 'अन्तश्च तवै युगपत्' [६।१।२००] इत्याद्यन्तयोर्युगपदुदात्तत्वम्। उशब्दः पूरणः। अहम् एव जनाय स्तोतृजनार्थं समदम्। समानं माद्यन्त्यस्मिन् (?) इति समत् संग्रामः। तं कृणोमि करोमि तथा द्यावापृथिवी द्यावापृथिव्यौ अहम् आ विवेश अन्तर्यामित्वेन प्रविष्टवती ॥६॥

दीपिका। या च का च पश्कृतिर्मम कर्मैव तत्। का कथा पार्थकर्णादिकीटानाम्, यो हि रुद्रः पिनाकेन त्रिभुवनं भाययति, उद्दीपितामर्षाद् यस्माद् ब्रह्मद्विषः सन्त्रस्यन्ति, उग्रनमस्य तस्य साधूनां परित्राणाय दुष्कृतां च विनाशाय धनुषि ज्यारोपणं मदायत्तमेव। भक्तानां चाह्वानमनुरुध्यमानया 'सत्यश्रवण्या' मया समरेष्वपि व्याप्रियते, श्रुतित्रिपथगुणया च मया निदं व्याप्यावस्थीयते। "यो देवो अग्नौ यो अप्सु यो विश्वं भुवनमाविवेश। य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः॥" [श्वेताश्व॰ २।१७] इति श्रुतिरपि मामेव सर्वगत्वेन वर्णयन्ती संगृणाति ॥६॥

रुद्राय—Dativus commodi.

रुद्राय धनुरातनोमि—In RV Rudra is well known for his bow and arrows (ii 33 10 11 v 42 11), he is called स्थिरधन्वन् and क्षिप्रेषु in इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने RV vii 46 1 What Vāk means is that even the great archer Rudra owes his skill in archery to her Contrast यद् वज्र बाहवो इषुं ददे v 49 2

ब्रह्मद्विषे शरवे हन्तवे—ब्रह्मद्विषे is the obj of हन्तवे and should have been put in the Acc The dative infinitive "is commonly used without an object, hence a dative often appears beside it by attraction instead of an accusative" MACDONELL *Vedic Grammar* p 408 *Cf* हन्तवे सूर्याय x 14 12 (p 281), ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ v 31 4 the Brahmans with their songs exalting Indra strengthened him with hymns to slay the serpent मय पतिभ्यो जनये परिष्वजे AV xiv 1 46 a joy to husbands (it is) to embrace a wife See also under पश्चिमाग्नेयाशत्र SB i 8 1 1

In x 182 3 तपुर्मूर्धा तपतु रक्षसो ये ब्रह्मद्विषः शरवे हन्तवा उ the Dat in ब्रह्मद्विषे has been changed into the Nom May he whose head is flame burn the Brahman hating Rakṣasas in order that his arrow may slay them —thus translates Bloomfield who rightly regards x 182 3 as patterned upon x 125 6

ब्रह्मद्विषे—Dative by Attraction Regular form is ब्रह्मद्विषम्

शरवे—Final Dative For mg see p 189 f n 3 and p 191

हन्तवे—Dative infinitive See p 257

आ ततान—In the Vedas the Perfect is used even when there is no परोक्ष Panini s rule is छन्दसि लुङ् लङ् लिटः ३ ४ ६

अहं जनाय समदं कृणोमि—The suggested sense is that she is also जनस्य समदम् (ii 12 3) like Indra *cf* वामदेन्द्री सपत्नक्षयी TS i 6 10 6 For समद् see p 168 समदिति ज्यो लड़ सगाममाम सम मद आयन्ति यौद्धारो यतु इति। Haradatta समदो वाच सम्मदो वा मदतेः Nir ix 17 Indra gives specific instances of his help to mortals

अहं गुङ्गभ्यो अतिथिग्वमिष्करमिषं न वृत्रतुरं विक्षु धारयम्।
यत् पर्णय उत वा करञ्जहाहं महे वृत्रहत्ये अशुश्रवि ॥ x 48 8

अहं द्यावापृथिवी आ विवेश—She pervades heaven and earth *Cf* गीता—मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव In Babylonian mythology the word of Bel Marduk is described as "a net of majesty that encompasseth heaven and earth

7

अहं सुवे पितरमस्य मूर्धन्
मम योनिरप्स्व१न्तः समुद्रे।
ततो वि तिष्ठे भुवनानु विश्वो-
तामूं द्यां वर्ष्मणोप स्पृशामि ॥७॥

अहम् । सुवे । पितरम् । अस्य । मूर्धन् ।
मम । योनिः । अप्ऽसु । अन्तरिति । समुद्रे ॥
ततः । वि । तिष्ठे । भुवना । अनु । विश्वा ।
उत । अमूम् । द्याम् । वर्ष्मणा । उप । स्पृशामि ॥७॥

I (*ahám*) give birth to (*suve*) the father (*pitáram*) on his head (*asya mūrdhán*), my (*máma*) origin (*yónih*) is within the ocean (*samudré*) in the waters (*apsú antáḥ*). Thence (*tátaḥ*) I spread through (*vitiṣṭhe*) all (*víśvā*) beings (*bhúvanā ánu*), and (*utá*) I touch (*úpaspṛśāmi*) yonder (*amū́m*) sky (*dyā́m*) with my summit (*varṣmáṇā*).

'द्यौः पिता' [तै० ब्रा० ३।७।५।५] इति श्रुतेः पिता द्यौः। पितरम् दिवम् अहं सुवे प्रसुवे जनयामि, 'आत्मन आकाशः सम्भूतः' [तै० आ० ८।१] इति श्रुतेः। क्वेति तदाह—अस्य परमात्मनो मूर्धन् मूर्धन्युपरि। कारणभूते तस्मिन् हि वियदादिकार्यजातं सर्वं वर्तते, तन्तुषु पट इव। मम च योनिः कारणं समुद्रे। समुद्रवन्त्यस्माद्भूतजातानीति समुद्रः परमात्मा। तस्मिन् अप्सु व्यापनशीलासु धीवृत्तिषु अन्तः मध्ये यद्ब्रह्मचैतन्यं तन्मम कारणमित्यर्थः। यत ईदृम्भूताहमस्मि ततः हेतोः विश्वा विश्वानि सर्वाणि [भुवना] भुवनानि भूतजातानि अनुप्रविश्य वितिष्ठे विविधं व्याप्य तिष्ठामि। 'समवप्रविभ्यः स्थः' [१।३।२२] इत्यात्मनेपदम्। उत अपि च अमूं द्याम् विप्रकृष्टदेशेऽवस्थितं स्वर्गलोकम्। उपलक्षणमेतत्। एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा कारणभूतेन मायात्मकेन मदीयेन देहेन उपस्पृशामि। यद्वा, अस्य भूलोकस्य मूर्धन् मूर्धन्युपरि अहं पितरम् आकाशं सुवे। समुद्रे जलधौ अप्सु उदकेषु

अन्तः मध्ये मम योनिः कारणभूतोऽम्भृणाख्य ऋषिर्वर्तते। यद्वा, समुद्रे अन्तरिक्षे अप्सु अम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्मचैतन्यं वर्तते। ततोऽहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि। अन्यत् समानम् ॥७॥

अथर्ववेदभाष्यम्। अस्य दृश्यमानस्य प्रपञ्चस्य मूर्धन् मूर्धनि उपरिभागे सत्यलोके पितरं प्रपञ्चस्य जनकं विधातारम् अहं सुवे जनयामि। षूङ् प्राणिगर्भ-विमोचने [धा°२।२१]। अदादित्वाच्छपो लुक्। लष्टसहितस्य जगतः कारणभूताया मम योनिः कारणं समुद्रे। समुद्द्रवन्त्यस्माद् भूतजातानीति समुद्रः परमात्मा। 'समुद्र एवास्य बन्धुः समुद्रो योनिः' [श° ब्रा° १०।६।४।१] इति वाजसनेयकश्रुत्या समुद्रशब्दवाच्यत्वं परमात्मनो दर्शितम्। तस्मिन् परमात्मनि अप्सु व्यापन-शीलासु धीवृत्तिषु अन्तः मध्ये यद् ब्रह्मचैतन्यं तत् मम कारणमित्यर्थः। यद्वा समुद्रे जलधौ अप्सु उदकेषु अन्तः मध्ये वाडववैद्युतरूपेण यत् तेजो वर्तते तदेव माध्यमिकवाग्रूपाया मम योनिः कारणम्। ततः तेजःकारणत्वाद्धेतोः विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि वि चष्टे प्रकाशयामि। उत अपि च अमूं द्याम् विप्रकृष्टां दिवम्। उपलक्षणमेतत्। एतदुपलक्षितं कृत्स्नं ब्रह्मण्यध्यस्तं विकारजातं वर्ष्मणा देहेन कारणभूतमायात्मकेन उप स्पृशामि। यद्वा अस्य भूलोकस्य मूर्धन् मूर्धनि उपरि पितरम् आकाशम्। 'द्यौः पिता पृथिवी माता" [तै° ब्रा° ३।७।५।५] इति श्रुतेः। सुवे प्रेरयामि। तथा समुद्रे अन्तरिक्षे अप्सु अब्विकारेषु देवशरीरेषु मम कारणभूतं ब्रह्म व्याप्य वर्तते इत्यर्थः। शेषं पूर्ववत् ॥७॥

दीपिका। परिदृश्यमानस्य प्रपञ्चस्याध्यक्षोऽपि मयैव परमे व्योमनि प्रसूयते। अहं पुनः सागरसलिलेषु समधिगतजन्मास्मि। समुद्रे कल्लोलकोलाहलरूपेण लब्धात्मा क्रमेण वायवीयतरङ्गसङ्गेनोर्ध्वमुपगच्छन्ती समग्रे जगति कृतपदा सती सुदूरवर्तिनं स्वर्लोकमपि शरीराग्रेण स्पृशामि। तथाच श्रुतिः—"देवीं वाचमजनयन्त यद् वाग् वदन्ति। अनन्तामन्तादधिनिर्मितां महीम्। यस्यां देवा अदधुर्भोजनानि। एकाक्षरां द्विपदां च। यां देवा उपजीवन्ति विश्वे।" [तै° ब्रा° २।८।८।४] इति ॥७॥

Bergaigne translates—"I give birth to the father even on the head" and adds in a foot-note: an enigma which seems to mean "I give birth to the heaven at the top of the heaven Vāc represents there particularly the roar of the thunder [which practically divests the sky of the clouds under which it had become invisible]" Geldner translates. "I give birth to (or, I drive) the father on the summit of this world." Hopkins translates "I beget the father of this (all) on the height, my place is in the waters, the sea, thence I extend myself among all creatures and touch heaven with my crown"

सुवे—सू would appear to have been originally used with reference to females and सू with ref to males सूकर, सूनु, सुत, son, son, swine, etc, are from the same root. See p. 48.

पितरम्—Geldner points out that the *father* is the पर्जन्य in x. 120 7 धी रत्नधाय: परमे व्योमन् as whose mother or guide appears वाक् in this hymn and compares SB v 1.3 11: यदि वै प्रजापतेः परमस्ति—वागेव। (तस्मा …पूर्वमव्यानादिति भाव —S)

मूर्धन्—The Loc. would appear to have been an indefinite case in the beginning, so we find the Loc sing. of many stems in several I. E. languages without ending. In Skt several *an*-stems have Loc singular without ending as also i and u- stems which appear in the lengthened grade in the Loc. without ending. In the Av Gathic forms like *dam*, *dan*, 'in the house', in Greek, infinitives like *dómen* (दामन् to give), *ídmen* (विद्मन्, to know) and isolated forms like *aiés* (ever, always) and in Latin the preposition *penes* (with') are instances of Locatives without ending.

मूर्धन् is mentioned in the Uṇādi rule: श्वन्‌ पूषन्‌ प्लीहन्‌ क्लेदन्‌ स्नेहन्‌ मूर्धन्‌ मज्जन्नर्यमन्‌ विश्वप्सन्‌ परिज्मन्‌ मातरिश्वन्‌ मघवन्निति I. 158 and is derived from मुर्वी or मुह् with कनिन् and is consequently accented on the first syllable. In Vedic literature, however, it is accented on the second syllable. Under i 59. 2 S. merely says: मूर्धन्निति

धीयत इति मूर्धा [निरुक्त ७।२७]। अनुचत्रिलादी निगातनात्पसिद्धि। Av *kamoroδa* (= Skt * कमूर्धन् कमूर्धन्) head (of demons, animals, etc, Old English *molda* 'head', Gk. *blothros* (*mlothros)

मम योनिरप्स्व् न्तः समुद्रे—वाक् remained in these waters as the roar of the sea, as the thunder and further as the cosmic principle in the ancient waters from which acc to x 121 7 the असु of the gods, i e, the wind came out. Geldner समुद्रे अप्स्व् न्तः occurs in x 45 3 also समुद्रे अप्सु x 177 1 वाक् is also often identified with the ocean वाग् वै समुद्र Tandya B vii 7 9 वाग् वै समुद्रो न वै वाक् क्षीयते, न समुद्र क्षीयते। AB xxiii 1

ततः—from there *Cf* ततो देवानां समवर्ततासुरेक x 121 7

वितिष्ठे—AV reads विशष्टे

भुवना—AV has the later form भुवनानि Similarly प्रता तु विभद्र भवना भद्राय occurs in TB, but भवानि in AB *Variants*, III 67

वर्ष्मणा—वर्षिमन्, वर्षीयस, वर्षिष्ठ, etc, are from the same root वृष् (स with *s* extension) The corresponding Greek word is *herma* prop support (for *wersma I E *uersmn)

8

अहमेव वात इव प्र वा-	अहम् एव | वातःइव | प्र | वामि ।
म्यारभमाणा भुवनानि विश्वा ।	आऽरभमाणा | भुवनानि | विश्वा ॥
परो दिवा पर एना पृथि-	परः | दिवा | परः | एना | पृथिव्या ।
व्यैतावती महिना सं बभूव ॥८॥	एतावती | महिना | सम् | बभूव ॥८॥

I myself (*ahám evá*) blow forth (*pravami*) like the wind (*vā́talj iva*), grasping (*ar ibhamana*) all (*viśva*) beings (*bhuvanani*), beyond (*parih*) heaven (*diva*), beyond (*parah*) this earth (*enā pṛthivyā*), such (*etā vati*) I have become (*sámbabhuva*) through my greatness (*mahinā*)

विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपेणोत्पादयन्ती अहमेव परेणानधिष्ठिता स्वयमेव प्रवामि प्रवर्ते वात इव। यथा वातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत्। उक्तं सर्वं निगमयति। परो दिवा। पर इति सकारान्तं परस्तादित्यर्थे वर्तते, यथाध इत्यधस्तादर्थे*। तद्योगे च तृतीया सर्वत्र दृश्यते। दिव आकाशस्य परस्तात्। एना पृथिव्या। 'द्वितीयाटौस्स्वेनः' [२।४।३४] इतीदम एनादेशः। अस्याः पृथिव्याः परः परस्तात्। द्यावापृथिव्योरुपादानमुपलक्षणम्। एतदुपलक्षितात्† सर्वस्माद्विकारजातात्‡ परस्ताद्वर्तमानासङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपाहं महिना महिम्ना एतावती संबभूव। एतच्छब्देनोक्तं सर्वं परामृश्यते। [एतावती।] एतत् परिमाणमस्याः। 'यत्तदेतेभ्यः परिमाणे०' [५।२।३९] इति वतुप्। 'आ सर्वनाम्नः' [६।३।९१] इत्यात्वम्। सर्वजगदात्मनाहं सम्भूतास्मि। [महिना।] महच्छब्दादिमनिचि 'टेः' [६।४।१५५] इति टिलोपः। तत्र तृतीयायाम्, उदात्तनिवृत्तिस्वरेण तस्या उदात्तत्वम्। छान्दसो मलोप ॥८॥

अथर्ववेदभाष्यम्। विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कार्यरूपेणोत्पादयन्ती अहमेव अनन्यसहाया प्रवामि प्रवर्ते। वा गतिगन्धनयो [धा° २।४०]। अदादित्वाच्छपो लुक्। तत्र दृष्टान्तः—वात इव। यथा वायुः परेणाप्रेरितः स्वेच्छयैव प्रवाति तद्वदित्यर्थः। उक्तं सार्वात्म्यं निगमयत्युत्तरार्धेन। परो दिवा। परः इति सकारान्तं परस्ता-

---

* The temptation is great to change अधस्तादर्थे into अधआदित्यर्थे but AVS. also shows अधस्तादर्थे

† सर्वात् is a misprint for सर्वस्मात् in M but has been copied all the same in certain printed editions

‡ पञ्चमी was expected acc to अन्यारादितरर्त्ते॰. Cf भुवनित हारि विश्वधी स्मात् Kādambari "पञ्चमी [२।३।२८] अत्र—'पञ्चमीविभक्ते'ति पञ्चमी अवधेः' इति।" Vātsyāyana folio 70b.

दित्यर्थे वर्तते, यथा अध इत्यधस्तादर्थे। तद्योगे च तृतीया सर्वत्र दृश्यते। दिवा आकाशस्य परस्तात् एना पृथिव्या। 'द्वितीया टौस्स्वेनः' [२।४।३४] इतीदम एनादेशः। 'सुपां सुलुक्०' [७।१।३९] इति तृतीयाया आच् आदेशः। अस्याः पृथिव्याः परः परस्तात्। द्यावापृथिव्योरुपादानम् उपलक्षणम्। एतदुपलक्षितात् सर्वस्माद् विकारजातात् परस्ताद् वर्तमाना असङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपा अहं महिम्ना माहात्म्येन एतावती सं बभूव एतत्परिमाणा उदीरितसकलजगदात्मना सम्भूतास्मि। एतच्छब्दाद् 'यत्तदेतेभ्यः०' [५।२।३९] इति वतुप्। 'आ सर्वनाम्नः' [६।३।९१] इत्यात्वम् ॥८॥

दीपिका। एवञ्च वायुरूपाहं वायुरिव निराबाधं निरङ्कुशं च वहमाना विश्वं समग्रं निर्मिमाणा उद्गततमाया दिवः पृथुतमायाश्च पृथिव्याः प्रान्तात् ममतिक्रान्तवती। अत एव "वाग् वै त्वष्टा" इति श्रुतिः [ऐ॰ ब्रा॰ ६।४] मां त्वष्टेति व्यपदिशति। इत्थञ्चेदन्तयेयत्तया वा परिच्छेत्तुं न शक्यं मे महत्त्वम्। विस्तीर्णमर्णवनेमियो सर्वतोविसारि गगनमण्डलं वा नैव प्रभवति मातुं मे माहात्म्यम्। यथाहि यथेच्छं सञ्चरतो वातस्य घोषा एव श्रूयन्ते, रूपं पुनर्न प्रत्यक्षीक्रियते, तथैव मम कार्यमिदं विश्वं सन्दृश्यते सर्वैः रूपं पुनर्मे प्रायेण न प्रत्यक्षीभावमुपयाति प्राकृतजनानाम्। नैवाहं चक्षुषा ग्राह्या न च शिष्टैरपीन्द्रियैः। मनसा तु प्रयत्नेन गृह्येऽहं सूक्ष्मदर्शिभिः॥ "यस्मात् परं नापरमस्ति किञ्चिद् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्॥" [श्वेताश्व॰ ३।९] इति श्रुतिरपि मामेवोपवर्णयति। अतो मामेव शरणं गच्छ सर्वभावेन भारत। मत्प्रसादात् परां शान्तिं स्थानं गच्छसि शाश्वतम् ॥८॥

इति काश्यप-श्रीविश्वेश्वरचन्द्र शर्म-विरचिता देवीसूक्त-दीपिका समाप्ता।

वात ११—*Cf.* वायुर्न पाथो vi. 4. 5. (said of Agni); अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः going along his paths in the air he (Vāta) rests not for a single day. x. 168. 3; आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः। घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम "Breath

of the gods, germ of this world, this god fares according to his will. His sounds are heard, (but) his form is not (seen). To that Vāta we would pay worship with oblation" (MACDONELL)

परो दिवा, etc.—See p. 337. *Cf.* x. 85. 5 परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति. *Cf.* also *Raghu* vi. 77:

पाश्चात्यमद्रीनुदधीन् वितीर्य सुव्यक्तमानां ययतिं प्रविष्टम् ।
कथं मतं यस्य न चाक्षुषाभ्यां यथा: परिच्छेत्तुमियत्तयालम् ॥

दिवा—AV. shows दिव.. *Similarly in the case of* परो देवेभिरसुरैर्यदस्ति RV. x. 82. 5, MS. ii. 10. 3 reads देवैः.. "The prepositional adverbs परस्, अवस्, अर्वाक् govern either abl. or instr. without difference of meaning. This use of the abl. is apparently related to the abl. of comparison." BLOOMFIELD, *Variants* § 574.

परः—See pp. 58-59. "पर इत्येतत् उकारान्तमव्ययं वैदूर्यमाचष्टे । 'परो दिवा पर एना' इति यथा ।" S. under इन्द्र' को वीर्यो परः i. 80. 15.

महिना—See p. 335.

एतावती महिना संबभूव—*cf.* एतावानस्य महिमा x. 90. 3. *Cf.* न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ ॥ i. 81. 5.

सम्बभूव—Veṅkaṭamādhava's remarks on the use of लङ्, लुङ् and लिट् are interesting. ननु भूतलकारेषु सर्वेषु तत्त्वतः । परोक्षादिविभागोऽपि निर्मितः केन पाणिनिः ॥ लिट्लिट्सु लकारेषु भूतमात्रे ततो मयम् । तत्तदाख्यातानुसारेण बह्यामोऽर्थ-कथा तथा ॥ नैवं पुनः कर्मविहाद्यर्थभेदस्य युज्यते । पश्यामोऽपि च वाक्येषु भेदं पाणिनि-दर्शितम् ॥ ... लङ्ग्येव लकारार्थान् पश्यामी ब्राह्मणेषु च । हरिश्चन्द्रो ह वैधसः ऐक्ष्वाकः-... परोक्षत्वनाम् । तथाह यथा तथा सूत्रे परोक्षायतनादिकम् । ... च पठितः ॥ ... संवादसूक्तेषु परोक्षायतनादिकम् । ... च सूक्तेषु न तं भेदं परिलक्षेत् ॥ न पश्यति यदा सर्वं तं विशेषं प्रयत्नतः । अपि वैयाकरणं भवति छान्दसास्तदा ॥ A comparison of this hymn with the other आत्मस्तुति hymns of RV. reveals its great delicacy in contrast with the bravado of those hymns. Compare for instance अहं दधामि द्रविणं हविष्मते of this hymn with अहमस्मि महामहो ... इषुमन्तमभिभूतिभिः ।

अहं शुष्णस्य श्नथिता वधर्यमं न यो रर आर्यं नाम दस्यवे ॥ अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रन्धयम् । अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे ॥ अहं रन्धयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चनानुषक् । अहं वेशं नम्रमायवेऽकरमहं सव्याय पड्गृभिमरन्धयम् ॥ x. 49. 3-5.

A Paurāṇic देवीसूक्त is current in some parts of Bengal. We are indebted to Prof. Satyendra Nath Sen for the following stanzas of this hymn:

कात्यायनकुलोद्भूते सर्वदेवांशसम्भवे ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
महासुरौघनिर्णाशि महादेव-मनोहरे ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
सुरयाधिष्ठिते गौरि ब्रह्मादिसुरवन्दिते ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
चतुर्वर्गप्रदे देवि चतुर्वर्णात्मिके शुभे ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
चण्डेश्वरि महामाये महामोहविनाशिनि ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
राज्यधामाज्यप्रदे राजराजेश्वरप्रिये ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ।
सर्वशान्तिप्रदे सौम्ये अभयदे भुवनमयि ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
देवीसूक्तमिदं राजन् पराशर-प्रबोधितम् ।
पठन् समस्तो राजन् पठित्वा फलमाप्नुयात् ॥
देवीसूक्तमनभ्याय पठेत् सप्तशतीं यदि ।
अभिचाराय भवति फलं नाप्नोति निश्चयम् ॥
इति श्रीब्रह्म-महापुराणे बृहत्पराशर-संवादे देवीसूक्तं समाप्तम् ॥

The prayer in the fifth chapter of the Caṇḍī beginning with नमो देव्यै महादेव्यै is also known as देवीसूक्त.

शतपथब्राह्मणम्

Mādhyandina recension 1 8 1

MANUMATSYA-KATHĀ

Introductory Note

"One special interest in the story lies in the curious points of resemblance and contrast to other Deluge stories. The warning of the Deluge by an animal, the fastening of the ship by a rope, the post diluvian sacrifice, and the miraculous reproduction of men, have all their analogies, but they are not found, as here, in combination, and the towing of the ship by a fish is quite unique The probability is, therefore, that the legend is of native growth

"Weber and to a less extent, Muir see in the story a tradition of an original immigration of the race from across the Himalayas They base their opinion on a rendering *over* the Northern Mountains Eggeling, however, renders 'up to' and some writers suppose the story to have originated in an exceptional overflowing of the Ganges The question is primarily one of textual criticism the choice lying between the reading *abhi dudrava* (Eggeling) and *ati dudrava* (Weber etc) The chief argument against an originally mythical origin of the story is that here also the tendency is become more and more mythical, and if we reverse this tendency we can easily explain the story as having grown out of an external inundation"

For the different versions of the story the student is referred to the article on Deluge in Hastings *Encyclopædia of Religion and Ethics*, Vol IV, from which the above extract has been taken as also to Muir's *Original Sanskrit Texts*, Vol I pp 181ff

For an account of the *Satapatha Brahmana*, see Macdonell's *History of Sanskrit Literature* (pp 212 16) and *India's Past* (pp 48-49) and Weber's *Indian Literature*

MANUMATSYAKATHĀ

1

मनवे ह वै प्रातः । अवनेग्यमुदकमाजह्रुर्यथेदं पाणिभ्यामवने-जनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्यः पाणीऽआपेदे* ॥१॥

To Manu in the morning they brought water for ablution, exactly as men bring it for washing the hands As he was washing a fish came into his hands

हरिस्वामिभाष्यम् । मनवे ह वै । इडाब्राह्मणमेतत् । यसेडायो मानवीमिडां[1] देवता वक्तुं 'मानवी घृतपदी मैत्रावरुणी' [आ॰ श्रौ॰ १।७।७] इत्येतानि च निगदपदानि व्याख्यातुमितिहासः प्रवृत्तः । स चेतिहासः प्रसन्न एव, किञ्चित्तु दर्शयाम । मनवे वैवस्वताय । तादर्थ्ये चतुर्थी[2] । अवनेज्यते हस्तादमेनेत्य-वनेग्यम् । करणे कृत्यः । आजह्रुः आनीतवन्तः परिचारकाः । यथा इदम् अधुना पाणिभ्याम् हस्तार्थं[3] यदवनेजनं तस्मै आहरन्ति तथा आजह्रुः ।

---

* The Kānva recension reads मनवे ह वा उदकमाजह्रुः प्रातरवनेज्यं, यथेदं पाणिभ्यामवनेजनायाहरन्ति । तस्य हावनेनिजानस्य मत्स्यः पाणिमापेदे ।

[1] The goddess Idā or Ilā (the daughter of Manu or of man), thinking on and worshipping the gods, she is the wife of Budha and mother of Purūravas, in another aspect she is called Maitravarunī, as daughter of Mitra and Varuna (M W)

Ida is the sacrificial food "offered between the Pra-yāja and Anu yāja, and consisting of four preparations of milk, poured into a vessel containing water, and then partially drunk by the priest and sacrificers."

The name gave rise to the legend described here

[2] क्रियार्थेऽपि चतुर्थी acc to the Vārttika क्रियाग्रहणमपि कर्तव्यम् appears preferable

[3] करणे तृतीया (पाणिभ्याम् चावः पाणिभ्याम्) is also possible

तस्य मनो [अवनेनिजानस्य] मत्स्य पाणी [आपेदे] प्रास ।
भाविनोऽर्थस्य सिद्ध्यर्थं देवतैव मत्स्यरूपेणाजगाम ॥

• In the *Satapatha Brahmana* the Udatta alone is marked with a horizontal stroke below *e g* प्रात = *pratah* मत्स्य = *matsyah* When there is a succession of two or more Udattas only the last is marked, *e g* मनवे ह वै प्रात = *Manave ha vai pratah* In the case of all independent Svaritas the preceding syllable is marked with the Udatta stroke, *e g* [illegible] = *avanegyam* For further details see Macdonell s *Vedic Grammar* p 80

In our text initial य is written as य to show that it is गुरु except in the case of mono syllabic nipatas

एकाक्षरे यकारस्य निपातस्थो यदा भवेत् ।
संहितायां लघुत्वात् पदत्वाद् गुरुर्भवेत् ॥
यकारस्त्रिविध प्रोक्तो गुरुर्लघुर्लघुतर ।
आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतर ॥
[illegible] शिक्षा १६ १० ।

Hence [illegible] but वै [illegible] etc

Similarly anusvara before श ष स ह and र is pronounced something like गुं and is written ॅ

[illegible]

[illegible]

मनवे—Dativus Commodi

[illegible]—formed with यत् from निज् to wash preceded by अव [illegible]—formed with [illegible] [illegible]. See p 210 [illegible] is formed with [illegible] [illegible] righteousness (its) handwashing [illegible] [illegible] 8 13 [illegible] [illegible] [illegible] [illegible] R A B xl 4 [illegible] etc [illegible] [illegible] formed with [illegible] the initial syllable being [illegible] [illegible] to

बिभ्रं सद्यस्त्वा गुष शो P 7 4 25 According to western scholars however the form is the intensive present participle The present participle from the simple root which is भदादि आत्मनेपदिन is बिभ्राण Note that K reads अवनेग्य for अवनेग्य

व्याहृत —the older form is व्याहृत

पालिपात्राय—This use of the Dat is analogous to that found in इत्यो मृगाय (see p 281) भरत इभार्ये (see p 383) etc an abstract substantive taking the place of the infinitive V G S, p 315a

पाणी—K reads पाणिम् probably with a view to avoiding the hiatus आत्मावेत्रयचनम् *Cf* Gk *palame* Lat *palma* open hand

2

स हास्मै व्याचमुवाद। बिभृहि मा पारयिष्यामि* त्वेति† कस्मान्मा‡पारयिष्यसीत्यौघ इमा सर्व्वा प्रजा निर्व्वोढा§ततस्त्वा पारयितास्मीति||कथं ते भृतिरिति ॥२॥

And he spoke unto him these words Maintain me I will deliver thee From what wilt thou deliver me? A flood shall sweep away all these creatures from that will I deliver thee How am I to maintain thee?

स मात्स्य मत्स्यो मनवे वाचम् [उवाद] उदितवान्। कीदृशीम्? बिभृहि पुष्याण' भर माम्। किमर्थम्? पारयिष्यामि पाळ रक्षणे' [धा° १०।७५]

* पारयिताखि ई आ K

† K adds स होवाच at the beginning of each speech

‡ पारयितासि K § निर्वोढ़ ईति तस्मात् K

|| स होवाच—अ कथं आर्तीस्तोति K

¶ The B I ed reads दुष्णि which is probably to be attributed to the ignorance of scribes

¹ Evidently चुरादिप इति अधाताऽ रक्षण acc to the commentator As a matter of fact the root is the causal of पृ

रक्षिष्यामि त्वा इति। कस्मात् इति भयहेतुप्रश्नः। वहतीति औघ. उदकसङ्घातः। स इमाः भारतवर्ष-निवासिनीः [सर्वाः] प्रजाः निर्वोढा निःशेषं वोढा देशान्तरं प्रापयिता। [तत] तस्माद् भयहेतोः त्वा [पारयिता अस्मि] पालयितास्मि इति मत्स्यवचः। कथम् इति मनोः प्रश्न। कथं [ते] तव भृतिः भरणं पुष्टिः इति।

वर्च—In the Vedas and Brahmanas वह्, ब्रू, वच, वद meaning to say (=announce, explain) are construed with the Dative of person V G S, p 310 c In classical Skt ब्रू and वद govern the acc of person

पारयिष्यामि—Note that K changes the two first futures into periphrastic futures for the sake of symmetry The periphrastic future expresses that something will take place at a definite time to come (e g, रतिर्यो समा तदौघ आगन्ता) or that it will take place with certainty (e g, औघ इमा सर्वा प्रजा निर्वोढा) As this was often accompanied by न, it came to be known as श्वस्तनी V.G.S, pp 340 9

निर्वोढा—Periphrastic future (लुट्) of निर् वह् In class Skt निर् वह् is generally used in a metaphorical sense Note that the Kānva recension reads ऊह् for ऋ like the वह्‌ न a

भृति —K uses the gerundive भार्यं from which we have भार्या in class Skt in a specialised sense Cf the use of परिवार in the sense of 'wife' in modern Bengali Skt bhrtih Av borəti, Lat: fors, Goth gabaurθs, Arm bard

3

स होवाच। यावद्वै क्षुल्लका भवामो* बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां माऽग्रे बिभरासि स यदा तामतिवर्धा अथ कर्षूं खात्वा तस्यां मा बिभरासि स यदा तामतिवर्धा अथ मा समुद्रमभ्यवहरासि तर्हि वा अतिनाष्ट्रो भवितास्मीति ॥३॥

* K adds an इति here

He said, So long as we are small, we are liable to great danger Even fish devours fish Thou shalt keep me first in a jar When I outgrow that then thou shalt dig a trench and keep me in it When I outgrow that, thou shalt carry me away to the ocean Then I shall be beyond destruction *

क्षुल्लका, क्षुद्रका अल्पका । नाष्ट्रा इति । गॄ निगरणे [धा° ६।१२१] । निगिरति । बिभरासि । अन्वेषणायां 'लिङर्थे लेट्' [३।४।७] । बिभृयाः *पुष्णीयाः । पुनरेव अन्यद्धरासि खनासि आपयासि इति व्याख्येयानि । अतिवर्धै अतिरिच्य वर्धितास्मीति प्राप्ते 'लिङर्थे लेट्' [३।४।७] इति यदा-योगे लेट् । कर्षूः खातिका । अतीतो नाष्ट्रान् नाशयितॄन् इति अतिनाष्ट्रः ॥३॥

क्षुल्लका —the Prakrit form of क्षुद्रका. Just as भल्ल (Bengali भाल) is the Prakrit for Skt भद्र मल्ल for मद्र and चल्ल for चाद्रे Cf Bengali खुल्ल in words like खुल्लपितामह खुड्डक is another Prakrit form of क्षुद्रक and is found in the *Caraka Saṃhita* in the sense of 'small minor

नाष्ट्रा—fem like classical दंष्ट्रा and Ved अष्ट्रा (goad) formed from the causal of नश् with the suffix ष्ट्रन् in the कर्तृवाच्य नाष्ट्रा नाशकारिण्य AVS viii 3 7, नाष्ट्राश्च आर्तिश्च Uvata, नाशकर्त्र्यः पिशाचादिका Mahidhara under VS xxxvii 12 इन्द्रा वै सर्वा अथ सर्वा नाष्ट्रा अपाघ्नन् रक्षांसि नाष्ट्रात् KS xxxvii 8

मत्स्य —In the *Nirukta* (vi 27) मत्स्य is derived thus मत्स्या मधौ (=) उदके स्यन्दन्ते, माद्यन्ते ऽन्योन्यं भक्षणायेति वा Skt *matsya*, Av *masya* (lit 'the wet' from *madsa from mad to be wet) मत्स्या हीनतेजसमत्स्यौरिति Nir vi 27

उत—appears to be used here in the sense of अपि According to Macdonell it means 'also' "Even when preceding a substantive उत seems to refer to the whole statement उत मत्स्य एव मत्स्यान् गिलति it is also the case that one fish devours another" V G S, p 223 a

---

* The *Bibliotheca Indica* ed reads बिभिया which is on a par with पुष्णीयाः.

मत्स्य एव मत्स्यं गिलति—this appears to be the origin of the मात्स्यन्याय of the Nitisastras Cf Mahabhārata दण्डश्चेन्न भवेल्लोके विनश्येयुरिमाः प्रजाः । जले मत्स्यानिवाभक्ष्यन् दुर्बलान् बलवत्तराः ॥ १२।१५।३० । Curiously enough the expression मात्स्यन्याय is often used with reference to Manu मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे । कौटिल्य १।१३ ।

गिलति—K has the earlier form गिरति Panini also reads the root as गृ and prescribes the optional change of र to ल by अचि विभाषा 8 2 21 RV shows forms with र only In classical Skt ल generally occurs when the root is used in the literal sense of 'swallowing' and र is found when it is used in a metaphorical sense The original root is *gwer, *gwor, which is found in Lat vorare 'to devour', carni vor us 'flesh eating', and Gk obra' food, bi brō sko 'I eat', etc

कुम्भ्याम्—कुम्भी is the fem of कुम्भ in a diminutive sense स्त्री स्यात् काचिन्मृणाल्यादिर्विवक्षापचये यदि । Cf घटी, कलशी, etc कुम्भीपाक originally meant the contents of a cooking vessel then a hell in which the wicked are baked like potter s vessels or cooked like the contents of a cooking vessel Av xumba, Mod Persian xumb, xum Gk kumbos 'cup', Irish cum 'vase'

बिभराणि—2 sing subjunctive present of भृ to bear The form expected is बिभरसि, बिभराणि appears to be due to the analogy of बिभराणि, etc Note that K changes the subjunctive into the imperative बिभृहि In B. the 2 pers subj is used only when the speaker makes a condition or gives a direction relating to the (not immediate) future V G S, p 353 The subjunctive forms of भृ (भ्वादि) will be P. भराणि or भराम्, भरतः, भरान् , भरसि or भरः, भराथ , भराव , भराणि or भरा, भराव भराम , A भरातै or भराते, भरैते, भराते , भरासै or भरासे , भराथै, भरैथै, भराध्वै , भरे, भरावहै, भरामहै

चरितवै—1 sing. pres subjunctive Ātm of चरि चर

अभ्यवहराणि—2 sing. pres. subj of भृ with अव

कर्षूः—from कृष् to plough, Av. karšū arable land, Skt कर्षति ploughs, Av karšaiti. The suffix is ऊ as in चमू dish, तनू body,

वधू bride etc कर्षू खाता occurs again in का 8 3 10 where Harisvāmin explains कर्षम् as गर्तम् 'furrow' or 'trench'

खाता—Alt form खनिता.

4

शश्वद्ध झष आस। स हि ज्येष्ठं वर्धते*ऽथेतिथीं† समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स औघ उत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति ॥४॥

Straightway he became a large fish; for he waxes to the utmost. He said, 'Now in such and such a year the flood will come, thou shalt therefore construct a ship and wait expectantly for me Thou shalt embark the ship when the flood rises and I shall ferry thee across'

शश्वच्छब्दोऽत्र सामर्थ्यात् क्षिप्रवचनः। झष. महामत्स्यः क्षिप्रमेव महामत्स्योऽभ्यावर्ततेत्यर्थः। अथ कस्मात् स शीघ्रमेव महामत्स्यः संवृत्तः। हि यस्मात् सः ज्येष्ठं बृहत्तमं वर्धते। सर्वे एव हि जलचरा अतिशयेन वर्धन्ते, स तु मात्स्यत्वादनात्मत्वाच्च बृहत्तमं वर्धत इति श्रुतिवचनम्। अथेतिथीम् इति मत्स्यवचनम्। अयमपि समुद्रम् अभ्यवहृते(?)। इतिथीम् इत्यभिनयः तेन संख्येयां समा दर्शितवान्। इयतीनां दशाना द्वादशाना वा पूरणी इतिथी। इदम इवादेशश्छान्दस, टित्वात् ङीप्। इयत्यस्तिथयो यस्या सा इतिथीति केचुचित् कोषेषु। तेष्वपि इयतिथीं यावतिथीं तावतिथीम् इति प्राप्ते छान्दसो यशब्दवशब्दलोपः। समा संवत्सरः तां समा समायामित्यर्थं। तत् स इति।

* स होवाचेतिथी, वै समामौघ आगन्तेति K

† Either स or इति should be dropped तदौघ cannot be regarded as a compd because both तत् and औघ are accented K. drops this तत्

एिङ्व्यत्ययः । स पूर्वोक्त ओघः आगन्ता तत् तदा नावम् उपकल्प्य [मा] माम् उपासासै उपासीथा । ओघे च उत्थिते तां नावम् त्वम् आपद्यासै आरोहेरित्यर्थः ॥

मयत्—See p 190 मयत् इ—at once, forthwith

झष—Etymology obscure (A G I 163) It is found in the Bengali expression झषमारि झकमार in Hindi means a fisherman (lit one who kills fish) As fish tastes as insipid as paper in places like Benares झषमारि means any idle and useless under taking In a similar way रोष becomes रोक in Bengali In the Brahmanas *jasa-* means 'an aquatic animal' and *jhasa* 'a large fish ' See *Calcutta Oriental Journal*, Vol II, pp 97, 100

भाव—one of the Vedic forms used by Kalidasa and others भावस्य उत्पाद्य इवास यव, Ku ı 34

इतिथीम्, यतिथीम्, ततिथीम्—"The suffix थ forms a few ordinals from cardinals, and adjectives from pronominal stems with a general numerical sense " *Vedic Grammar*, p 139 इतिथीम्—so-m nieth यतिथीम्—how manieth, ततिथीम्—so manieth

समाम्—originally 'summer' then, by synecdoche, year Skt परुत in this year Av *ham* summer, Arm *am* year *amarn* summer In the older language समा was declined in all numbers Cf Panini समां समां विजायते, 5 2 12 Temporal Acc for the Loc. Cf यां च रात्रीमजायथा AB xxxix 1

ओघ—from आ वह् with the suffix घञ्. ओघ is from वह

उपासासै, आपद्यासै—The middle ending for the subjunctive 2 sing is सै in RV In AV and the Brāhmanas, however, सै is used beside से

5

तमेवं भृत्वा समुद्रमभ्यवजहार। स यतिथीं तत्समां परिदिदेश ततिथींसमां नावमुपकल्प्योपासांचक्रे स ओघ उत्थिते नावमापेदे

* स तथा—K † K omits स ‡ त्वं नावमुपकल्पोप निदध्याद् K

Q—1451 B T

तꣳ स मत्स्य उपन्यापुप्लुवे *तस्य शृङ्गे नावः पाशं प्रतिमुमोच तेनैतमुत्तरं गिरिमतिदुद्राव† ॥५॥

Having reared it in this way he took it down to the sea. [And] in the very year which the fish had pointed out to him he prepared a ship and waited expectantly. When the flood had risen he stepped into the ship. The fish (then) swam up to him, (and) he tied the rope of the ship to its horn. By that means he crossed over to the northern mountain.

यावतीनां परुणीं यतिथीम् परिदिदेश परिदिष्टवान् आख्यातवान् ततिथीं तावतीनां परुणीं समाम् नावम् उपकल्प्य मत्स्यम् उपासितवान्। ओघे च उत्थिते नावम् अधिरूढः तं च मनु सः मत्स्य. उप समीपे [नि] नीचैः एनमुपकल्प्यंम् (?) इति सम्बन्धः। आपुप्लुवे आगतः। तस्य मात्स्यस्य शृङ्गे भवितव्यतयैव निष्पादिते नाव पाशं प्रतिबद्धवान्। तेन पाशेन सह मत्स्यः एतम् उत्तरं गिरिम् हिमवन्तम् [अतिदुद्राव] अधिजगाम ॥

उपासाञ्चक्रे—आस् 'to sit' with उप 'near' means to sit by expectantly, to sit waiting for. In classical Skt. it is used in the sense of to sit by (in sign of readiness to serve), i.e., to serve, to worship.

Since this perfect has been formed not directly but with the help of an auxiliary (by a 'periphrasis') it is known as the periphrastic perfect. Only one instance of the periphrastic

* तस्य नाव पाशं शृङ्गे प्रतिमुमोच K

† The Kanva recension reads अभिदुद्राव and Harisvamin's synonym अधिजगाम would appear to show that he also read अभिदुद्राव. But the stroke below the syllable containing भ clearly shows that that the correct reading is अति for the अ of अति is accented, whereas in the case of अभि it is the इ that is accented. निपाता आद्युदात्ता। उपसर्गाश्चाभिवर्जम्।

perfect has been found in the metrical portion of the Saṁhitās[1]; hence Pāṇini, following the principle न वा एकमुदाहरणं योगारम्भं प्रयोजयति inserts the reservation अमन्त्रे in his rule कास्प्रत्ययादाममन्त्रे लिटि 3. 1. 35. The first element in the Acc. sing, of a fem. verbal noun in आ and is, as a rule, accented. Only a very few cases of the periphrastic perfect with अस् occurs in the older language, hence Pāṇini mentions only कृञ् in his rule कृञ्चानुप्रयुज्यते लिटि iii. 1. 40.

आपेदे—आ-पद् 'to step into', then esp. to step into trouble.

अभ्यवजहार—3 sing. perfect of अभि-अव-हृ. Older form °जभार. अव-हृ to carry down, अभ्यव-हृ to carry down completely. In classical Skt. the sense is that of carrying down the throat, i. e., eating

उपन्यापुप्लुवे—3 sing perfect of प्लु 'to float' with उप (near), नि (down), आ (completely)—to swim near.

प्रतिमुमोच—fastened on, from मुच् 'to release' and प्रति 'in reversed direction, to, towards'.

पाशम्—from पश् to fasten. पशु is derived from this root.

6

स होवाचापीपरं वै त्वा वृक्षे नावं प्रतिबध्नीष्व तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीद्यावद्यावदुदकꣳ समवायात्तावत्तावदन्वव-सर्पासीति। स ह तावत्तावदेवान्ववससर्प तदप्येतदुत्तरस्य गिरेर्मनोरव-सर्पणमित्यौघो ह ताः सर्वाः प्रजा निरुवाहाथेह मनुरेवैकः परिशिशिषे ॥६॥

---

[1] मृत्युर्यमस्यासीद् स प्रचेता असून् पितृभ्यो गमयाञ्चकार AV. xviii 2. 27 The commentator merely says —आम्प्रत्ययादित्याम्-प्रत्ययः कृञोऽनुप्रयोगश्च।

* प्र मा सुपेल्यस वृक्षे नावं प्रबध्नीष्व मा तु त्वा...न्वैत्सीन्मा त्वा विदासीद्। K.

† स ह मनुस्तथान्ववससर्प। तदाप्येतदौत्तरस्य गिरेर्मनोरवसर्पणमिति तदोघ इमाः सर्वाः प्रजा निरुवाहाथेदं मनुरेवैकः—K.

And he said, I have ferried thee across Bind the ship securely to a tree, but let not the water cut across thee while thou art on the mountain As the water subsides gradually thou shalt slide down And he slid down accordingly, and hence the slope of the northern mountain is called Manu's descent The flood swept away all those creatures and Manu alone remained here

स होवाच। मत्स्यवचनम्—अपीपरं वै त्वा पारितवानस्मि त्वाम्। अनुमात वृक्षे नावं प्रतिबध्नीष्व। किञ्चापरम्—गिरौ सन्तं त्वा त्वाम् उदकम् मा अन्तश्छैत्सीत् तद्देशमध्यं भित्त्वा पृथगकार्षीत्, इदम् अस्माद्देशादित्यर्थः। कथं पुनस्त्वां नावं छिनत्ति? यावद् यावद् अध्वनः उदकं समवायात् एकीभावाय अव अध अयात् गच्छेत् अवतरेदित्यर्थः। तावत्तावत् त्वमपि सर्वेमोदकम् अनु अवसर्पासि अवतरे। स. मनुः मासे काले तावत् तावत् एव [अन्ववससर्प] अन्ववसृतः। येन च वर्त्मना मनुरवसृतः तद् अद्यत्वे अपि एतद् उत्तरस्य गिरेः मनोरवसर्पणम् इति आहुरिति शेषः। अवसृतोऽनेनेत्यवसर्पणम्॥

अपीपरम्—1 sing red aor of the causal of पृ 'to pass

अन्तश्छैत्सीत्— 3 sing s aor injunctive of अन्तर् छिद् "अच्छन्दस्त्र रिष्टिताचार्य शाकटायन। उपसर्गान् क्रियायोगान्मेने ते तु यथोऽधिका॥ B D ii 95.

प्रतिबध्नीष्व—बन्ध् is उभयपदिन् in Vedic literature प्रति बन्ध् means 'to tie to, to fasten, in Ātm to fasten something of one's own. Then प्रति बन्ध् came to mean 'to exclude to cut off' as in प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः Raghu I 79.

समवायात्—3 sing subj of सम् अव इ lit 'go down together' The normal form समवेयात् is found in K

अन्ववसर्पासि—2 sing subjunctive present of अनु अव सृप् 'slide down gradually'

निरुवाह—निर् वह् means 'to carry off'

ईशोपनिषत्

The *Isopanisad* forms the fortieth and last chapter of the *Vajasaneyi Samhitā*. Like the *Kenopanisad* it derives its name from the first word ईश. It is the shortest of the Upanisads containing as it does 18 stanzas only, even as the *Brhadaranyaka* is the longest. "It is about contemporaneous with the latest parts of the *Brhadāranyaka*, is more developed in many points than the *Kathaka*, but seems to be older than the *Svetaśvatara*. Its leading motive is to contrast him who knows himself to be the same as the Atman with him who does not possess true knowledge. It affords an excellent survey of the fundamental doctrines of the Vedanta philosophy." (MACDONELL, *A History of Sanskrit Literature*, p. 236)

Otto Wecker made an exhaustive investigation into all the varying uses of the six oblique cases in the Upanisads and one important result of the investigation was the following conjectural chronological order and grouping of the principal Upanisads relative to the great grammarian Pāṇini *viz.* Group I, the earliest *Brhadaranyaka*, *Chandogya* and *Kausitaki*. Group II, also pre Pāṇinean, *Aitareya*, *Taittiriya* and *Katha*, Group III posibly pre Pāṇinean *Kena* and *Iśa*. Group IV post Pāṇinean *Svetaśvatara* and *Maitrayani* (HUME *The Thirteen Principal Upanishads*)

'No knowledge without virtue' may possibly be the thesis propounded in the conclusion of the Kena Upanisad, yet it is the Iśā Upanisad that first deliberately teaches the samuccaya doctrine. The importance, however, of this precious little text for the history of Indian thought is still greater in that it is also the first gospel of that *karma yoga* which is often erroneously believed to have appeared with the Bhagavad Gita only." Schrader in *Indian Antiquary*, LXII 205

1

ॐ ईशा वास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम् ॥१॥

Enveloped by the Lord must be This All—each thing that moves on earth. With that renounced enjoy thyself. Covet not the wealth of any one.

शाङ्कर-भाष्यम्। ईशा वास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्ताः, तेषामकर्मशेषस्या[1]त्मनो याथात्म्यप्रकाशकत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम्। तच्च कर्मणा विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः। न ह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं[2] कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्। सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात्, गीतानां मोक्षधर्माणां चैवंपरत्वात्। तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वापापविद्धत्वादि[4] चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि। 'यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काणत्वकुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मसु' इति ह्यधिकारविदो वदन्ति। तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेनात्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्म-

---

[1] अकर्मशेषस्य—अकर्माङ्गस्य। 'यः परस्योपकारे वर्तते स शेषः' Sabara on M. S. iii 1. 2

[2] किञ्च यः कर्मशेषः स उत्पाद्यो दृष्टो यथा पुरोडाशादि। विकार्यः सोमादिः। आप्यो मन्त्रादिः। संस्कार्यो व्रीह्यादिः। आनन्दगिरिः।

[3] उपनिषदात्मयाथात्म्यविज्ञानवत एव कर्मकाण्डाप्रामाण्यम्। यथा न हिंस्यात् सर्वा भूतानीति निषेधशास्त्रनिश्चयवत एव श्येनादिविध्यप्रामाण्यम्। यथा च तीव्रक्रोधाक्रान्तं प्रत्येव श्येनादिविधिप्रामाण्यं तथा मिथ्यादर्शिनं प्रत्येव कर्मविधिप्रामाण्यमित्यर्थः। आ°

[4] चाशुद्धत्वापापविद्धत्वादि—चाशुद्धत्वपापविद्धत्वादि—A., Mah

[5] काणकुब्जत्वादि—A., काणत्वकुब्जत्वादि V.

[1]विच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्ति। इत्येवमुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनान्मन्त्रान् संक्षेपतो व्याख्यास्यामः।

ईशा वास्यमित्यादि। ईशा ईष्टे इतीट् तेन ईशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन् प्रत्यगात्मतया, तेन स्वेन रूपेणात्मना ईशा वास्यम् आच्छादनीयम्। किम्? इदं सर्वं यत् किंच यत्किंचित् जगत्यां पृथिव्यां जगत् तत् सर्वं स्वेनात्मनेशेन प्रत्यगात्मतया 'अहमेवेदं सर्वम्' इति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना। यथा चन्दनागुर्वादेरुदकादिसम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाच्छाद्यते स्वेन पारमार्थिकेन गन्धेन, तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगत् द्वैतरूपं जगत्यां पृथिव्याम्। जगत्यामित्युपलक्षणार्थत्वात् सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्। एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो वा भृत्यो वात्मसम्बन्धिताया अभावादात्मानं पालयति, अतस्त्यागेनेत्ययमेव वेदार्थः। भुञ्जीथाः पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः गृधिमाकाङ्क्षां[2] मा कार्षीर्धनविषयाम्। कस्यस्वित् धनं कस्यचित् परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा मा गृधः। कस्मात्? कस्यस्विद्धनम् इत्याक्षेपार्थः। न कस्यचिद्धनमस्ति यद् गृध्येत। आत्मैवेदं सर्वमितीश्वरभावनया सर्वं त्यक्तम्, अत आत्मन एवेदं सर्वम् आत्मैव च सर्वम्, अतो मिथ्याविषयां गृधिं[2] मा कार्षीरित्यर्थः ॥१॥

उपनिषत् is explained thus in the introduction to the Kaṭhopaniṣad-bhāṣya: सदेर्धातोर्विशरणगत्यवसादनार्थस्य [illegible] इदम् 'उप

---

1 विच्छित्ति is used in Alaṁkāra-literature in a different sense.

2 गृधि is not met with in classical Sanskrit. Probably the great Ācārya was thinking of न जीर्यति मर्त्यो वा गृधिं कुर्वीतारब्धिमान् [illegible] (quoted under the next stanza).

निषत्' इति । उपनिषच्छब्देन च व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते । केन पुनरर्थयोगेन उपनिषच्छब्देन विद्योच्यत इत्युच्यते । ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्याम् 'उप'सद्य उपगम्य तन्निष्ठतया 'नि'श्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य 'विशरणात्' हिंसनाद् विनाशनात् इत्यर्थयोगेन विद्या 'उपनिषत्' इत्युच्यते । Similarly in the Mundakopanisadbhāṣya we find य इमां ब्रह्मविद्यामुपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तः, अविद्यादिसंसारकारणं वात्यन्तम् अवसादयति विनाशयति इत्युपनिषत् ।

वास्यम्—Gerundive of the causal of वस आच्छादने [धा° २।१३]। "सर्वं जगत् परमात्मनि ओत च प्रोत च इति विभाव्यम् ।' Or, 'आवास्यम्—to be inhabited by the Lord i e , to be looked at as the Lord's abode ' Schrader

जगत्यां जगत्—Cf गच्छति जायते जगत् । महा° शान्ति° २०।१ ।

तेन त्यक्तेन—Instrumental Absolute तेन चानेन सर्वेण 'त्यक्तेन स्वात्मस्वामिसम्बन्धेन Uvata It is because of the spirit of renunciation of the Brahmanes that Manu wrote सर्वं स्वं ब्राह्मणस्येदं यत् किञ्चिज्जगतीगतम् ॥ आनृशंस्यात् ब्राह्मणस्य भुञ्जते हीतरे जनाः ॥ (i 100 101)

भुञ्जीथा —पालयेथा S आत्मानमिति शेष save yourself सर्वासिन् शरीरसंस्कारोपयुक्तकौपीनाच्छादनभिक्षान्नादिव्यतिरिक्तेऽपि कस्मिंश्चिद् द्रव्यविशेषे रागमेव प्राप्ति तन्निरोधं एव कर्त्तव्य । But भुज् is Atm in this sense So Uvata Mah and others explain भोगमनुभवे

तेन त्यक्तेन भुञ्जीथा —[illegible] By renouncing the world and all the enjoyments that it stands for we gain true enjoyment

गृध —2 sing root aor injunctive of गृध् 'to be greedy Cf • चर्दैमा हीन्ध p 325 For गृध see p 302

कस्यस्विद्धनम्—स्विद् imparts an indefinite sense to the interrogative in माता पुत्रस्य चरतः क्वस्वित् RV x 34 10 So we can translate Do not hanker after the wealth of any one It is generally used with an interrogative pronoun or adverb which it emphasizes so we may also translate 'to whom, pray, doth wealth belong? Cf the Bengali expression दुनियाटा कार which also admits of two constructions—दुनियाटा कार ? and दुनिया टा कार For स्विद् see p 316

'Moral life is a God-centred life, a life of passionate love and enthusiasm for humanity, of seeking the infinite through the finite, and not a mere selfish adventure for small ends ' RADHAKRISHNAN, *The Philosophy of the Upanishads*, p 89

2

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

Only performing works here, one should desire to live a hundred years. While thus you (live) there is no way but this. Action cleaves not to man.

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतयात्मा रक्षितव्य इत्येष वेदार्थः । अथेतरस्यानात्मज्ञतयात्मग्रहणायाशक्तस्येदमुपदिशति मन्त्रः—कुर्वन्नेवेति । कुर्वन् एव निर्वर्तयन्नेव इह कर्माणि अग्निहोत्रादीनि जिजीविषेत् शतम् शतसंख्याकाः समाः संवत्सरान् । तावद्धि पुरुषस्य परमायुर्निरूपितम्[1] । तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत् कुर्वन्नेव कर्माणीत्येतद्विधीयते । एवम् एवंप्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनि इतः एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात् प्रकारात् अन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्यते इत्यर्थः । अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत् । कथं पुनरिदमवगम्यते—पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति ? उच्यते । ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम् ? इहाप्युक्तं यो हि जिजीविषेत् स कर्म कुर्वन् । 'ईशा वास्यमिदं सर्वं तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्' इति च । 'न जीविते मरणे वा गृधिं कुर्वीतारण्यमियात्' इति च पदम् । 'ततो न *पुनरेयात्' इति †संन्यासशासनात् । उभयोः फलभेदं च वक्ष्यति । 'इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः । क्रियापथश्चैव पुरस्तात्

[1] शतायुर्वै पुरुषः AB vii. 7.

* पुनरियात् all except V. † न्यासशासनात्—Ānandabhaṭṭa

[2] Cf. Bhāṣya on BU. ii. 4. 1 सर्वक्रियाकारकफलोपमर्दस्वरूपायां च विद्यायां सत्यां सह कार्येणाविद्याया अनुपपत्तिश्चायं विरोधस्तेन विज्ञातः, व्यासवाक्यं च तेन श्रुतम् । कर्मविद्यास्वरूपयोः विद्याविद्यात्मकयोः प्रतिकूलवर्तनं विरोधः ।

यदिदं वेदवचनं कुरु कर्म त्यजेति च ।
कां गतिं विद्यया यान्ति कां च गच्छन्ति कर्मणा ॥

सन्न्यासश्चोत्तरेण निवृत्तिमार्गेणैषणात्रयस्य त्यागः ।' तयोः सन्न्यासपथ एवाति-रेचयति' । 'न्यास इत्याहुरतिरेचयत्' [तै° आ° १०।७८] इति च तैत्तिरीयके । 'द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्मो निवृत्तौ च विभाषितः[†] ॥' [महा शान्ति २४०।६] इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता । विभागं चानयोर्दर्शयिष्याम ॥२॥

‘ The Upanisads do not ask us to renounce life, do not taboo desires as such The essence of ethical life is not the sublation of the will The false asceticism which regards life as a dream and the world as an illusion is foreign to the prevailing tone of the Upanisads A healthy joy in the life of the world pervades the atmosphere To retire from the world is to despair of humanity and confess the discomfiture of God "Only per forming works one should desire to live a hundred years " There is no call to forsake the world, but only to give up the dream of its separate reality We are asked to pierce behind the veil realise the presence of God in the world of nature and

एतद्वै श्रोतुमिच्छामि तद्भवान् प्रब्रवीतु मे ।
एतावन्योन्यवैरूप्ये वर्तेते प्रतिकूलतः ॥ [महा° शान्ति° २४०।१ २]
इत्येव पृष्टस्य प्रतिवचनेन—
कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ [महा° शान्ति° २४१।७]
इत्येवमादिविरोधः प्रदर्शितः ।

* V rightly omits उत्तरेण निवृत्तिमार्गेणैषणात्रयस्य त्यागः which explains सन्न्यास, and is probably a reader's note Cf Gitabhasya II 21 तथाच पुत्राय भगवान् व्यासः—धर्मिणापत्य प्रत्यात्मनिष्ठायाम्, अतश्च क्रियापथश्च पुरस्तात् पश्चात् सन्न्यासश्चेति । Anandabhatta also says क्रियापथश्च पुरस्तात् सन्न्यासपथश्च ।

† अतिरेचयति अत्यर्थमतिशेते । अतः सन्न्यास एव एव सर्वोपरि सर्वश्रेष्ठतरम् अतिरिक्तत्वम् ।

‡ Mah Mbh reads निवृत्तौ च सुभाषितः. Anandāśrama MSS show निवृत्तौ च विभाषितः, निवृत्ति विभाषितः (V), निवृत्तौ चैव भाषितः and A reads निवृत्ति विभाषितः where निवृत्ति evidently means निवृत्तिपथः.

society. We are to renounce the world in its immediacy, break with its outward appearance, but redeem it for God and make it express the divinity within us and within it. The Upaniṣad conception of the world is a direct challenge to the spiritual activity of man. A philosophy of resignation, an ascetic code of ethics, and a temper of languid world-weariness are an insult to the Creator of the universe, a sin against ourselves and the world which has a claim on us. The Upaniṣads believe in God, and so believe in the world as well." RADHAKRISHNAN, *The Philosophy of the Upanishads*, p. 95.

So long as we perform selfish work we are subject to the law of bondage, when we perform disinterested work we reach freedom. "While thus you live there is no way by which Karma clings to you." What binds us to the chain of birth and death is not action as such but selfish action. *Ibid.*, p. 121-22.

'त्वयि—is detrimental to the metre and appears to have crept into the text from a gloss. Schrader (*Indian Antiquary*, Vol. LXII, p. 206) thinks otherwise.

न कर्म लिप्यते नरे—शुभाशुभं क्रियमाणं कर्म नरे मनुष्ये न लिप्यते न सम्बध्यते । Mah.

Cf. लिप्यते न स पापेन पद्मपत्रमिवाम्भसा. In English we generally speak of water gliding off the duck's back

मूलभूतविमी मध्ये । शिष्टैरियमोरेव व्याख्यानम् । शङ्करानन्दः ।

3

असुर्या* नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥३॥

To the asuras belong those regions enveloped in blinding darkness. To them, departing from this world, go the men who kill the self.

* Some read असूर्याः.

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते—असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुराः, तेषां च स्वभूता लोका असुर्या नाम। नामशब्दोऽनर्थको निपातः। ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्ते एषु* इति जन्मानि। अन्धेन अदर्शनात्मकेनाज्ञानेन तमसा आवृताः आच्छादिताः तान् स्थावरान्तान्, प्रेत्य त्यक्त्वा इमं देहम्, अभिगच्छन्ति "यथाकर्म यथाश्रुतम्"[1]। ये के चात्महनः। आत्मानं घ्नन्तीत्यात्महनः। के ते जनाः? येऽविद्वांसः। कथं त आत्मानं नित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात्। विद्यमानस्यात्मनो यत् कार्यं फलमजरामरत्वादिसंवेदनलक्षणं तत् हतस्येव तिरोभूतं भवतीति प्राकृताविद्वांसो जना आत्महन उच्यन्ते। तेन ह्यात्महननदोषेण संसरन्ति ते ॥३॥

"This stanza is connected, by way of contrast, with stanza 6 (note the *tu*). The intervening two stanzas (4 and 5), with other metres, are consequently quotations and may have been interpolated by a later hand." Schrader.

असुर्या.—The word is derived from असुर with यत्. As असुर (Av. *ahura*) is used in the sense of the divine spirit in the oldest language, असुर्य generally means divine dominion in RV. From expressions like असुराः अदेवाः viii. 85. 9 असुर came to be regarded by popular etymology as a compd. of नञ् and सुर, thus giving rise to the word सुर which came to be used in the sense of God (*cf.* सित). Then असुर्य came to mean the dominion of the demons, owned by the demons. Pāṇini's rule is असुरस्य स्वम् 4. 4. 123. असुर्य is the opposite of दैव्य. *Cf.* TB. i 2.6.7 दैव्यो वै वर्णो ब्राह्मणः। असुर्यः शूद्रः।

अन्धेन—अन्ध is used as an adj. to तमः even in RV. *cf.* यो अन्धे चित् तमसि ज्योतिर्विदत् मरुत्वान् नो भवत्विन्द्र ऊती i. 100. 8. Let Indra accom-

* एषु omitted in all, but is absolutely essential. See विवृति.

[1] This is from Kaṭha U. ii. 2. 7: योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्॥

pamed by the Maruts come to our help, finding light in the blinding darkness Yaska says in Nir v 1 तमोऽप्यन्धम् उच्यते नास्मिन् ध्यानं भवति। न दर्शनम् अन्धन्तम इत्यभिभाषन्ते। (तमोऽप्यन्धम् उच्यते। किं कारणम्? नास्मिन् ध्यानं दर्शनं कृतं भवति। किं कारणम्? चक्षुषो दृष्टिनिरोधात्। लौकिका अपि दर्शननिरोधे सति अन्धन्तम इत्यभिभाषन्ते। Durga)

प्रेत्य—is generally used in the sense of having gone over to the other world 'after death

ये के च—whoever cf यस्य कस्य तरोर्मूलं येन केनापि मिश्रितम्। यस्मै कस्मै प्रदातव्यं यद्वा तद्वा भविष्यति ॥

आत्महन—class आत्मघातिन The scope of Panini's rule ब्रह्मभ्रूण वृत्रेषु क्विप् 3 8 121 is restricted in various ways

Bhavabhuti alludes to this stanza in his *Uttaracarita* अन्धतामिस्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते (Act IV)

With this stanza may be compared *Gita* xiii 28 समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्। न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥

The idea of godhead is connected with light and the idea of the demons is naturally connected with darkness *blinding* darkness, because the demon's life is only a brief *blind* process in which no whence or whither is discerned because the demons are intellectually *blind*

This stanza inculcates the necessity of transcending our individuality and cultivating personality which is essentially universal

4

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत्
तस्मिन्नपो मातरिश्वा दधाति ॥४॥

Unmoving one swifter than mind—the gods failed to overtake it speeding on before them Standing still it outstrips

the others running. Herein doth Mātariśvan place the [primeval] waters.

यस्मादात्मनो हननादविद्वांसः संसरन्ति *तद्विपर्ययेण विद्वांसो जना मुच्यन्तेऽ†नात्महनः। तत् कीदृशमात्मतत्त्वमित्युच्यते—अनेजदिति। अनेजत् न एजत्। एजृ कम्पने [धा° १।२३१]। कम्पनं चलनं स्वावस्थाप्रच्युतिः तद्वर्जितं सर्वदैकरूपमित्यर्थः। 'तच्चैकं सर्वभूतेषु'। मनसः संकल्पादिलक्षणात् जवीयः जववत्तरम्। कथं विरुद्धमुच्यते—ध्रुवं निश्चलमिदं मनसो जवीय इति च? नैष दोषः, निरुपाध्युपाधिमत्त्वेनोपपत्तेः। तत्र निरुपाधिकेन स्वेन रूपेणोच्यते—अनेजदेकमिति। मनसोऽन्तःकरणस्य संकल्पविकल्पलक्षणस्योपाधेरनुवर्तनादिह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं संकल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन् मनसि ब्रह्मलोकादीन् द्रुतं गच्छति सति प्रथमं प्राप्त इवात्मचैतन्यावभासो गृह्यते, अतो मनसो जवीय इत्याह। ‡न एनत् देवाः द्योतनाद्देवाश्चक्षुरादीन्द्रियाणि, [एनत्] एतत् प्रकृतमात्मतत्त्वं नाप्नुवन् न प्राप्तवन्तः। तेभ्यो मनो जवीयः, मनोव्यापारव्यवहितत्वादाभासमात्रमप्यात्मनो नैव देवानां विषयीभवति। यस्मा§ज्जवनान्मनसोऽपि पूर्वमर्षत् पूर्वमेव गतम्। व्योमवद्व्यापित्वात्। सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सद् उपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह—तत् धावतः द्रुतं गच्छतः अन्यान् आत्मविलक्षणान् मनोवागिन्द्रियप्रभृतीन् अत्येति अतीत्य गच्छतीव। इवार्थं स्वयमेव दर्शयति—तिष्ठत् इति। स्वयमविक्रियमेव सदित्यर्थः। तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत्क्रियात्मकः, यदाश्रयाणि कार्यकारणजातानि

* Should we drop the तत् ?

† V. मुच्यन्ते ह्यनात्महनः A.

‡ Either drop this न or read नैनत्—नैनद्देवा इति।

§ जवन reminds one of [illegible] sl. 10.

यस्मिन्नोतानि प्रोतानि च, यत्सूत्र[1]संज्ञकं सर्वस्य जगतो विधारयितृ[2] स मातरिश्वा । अप कर्माणि प्राणिनो चेष्टालक्षणानि । अग्न्यादित्यपर्जन्यादीनां ज्वलन-दहन-प्रकाशाभिवर्षणादिलक्षणानि दधाति विभजतीत्यर्थः । धारयतीति वा । 'भीषास्माद्वात पवते' [तै॰ उ॰ २।८।१] इत्यादि-श्रुतिभ्य । सर्वा हि कार्य-कारणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थ ॥४॥

All sorts of contradictory statements are often made of the Atman The absolute is not in space which is expressed by the assertion that it is infinitely large and infinitely small The absolute is not in time hence it appears as above the three times independent of the past and the future on the one hand it is of infinite duration but at the same time it is of the instantaneous character of the flash of the lightning or the swift rush of thought ' (KEITH p 522) Cf Kumara II 15

त्वमेव हव्य होता च भोज्य भोक्ता च शाश्वत ।
वेद्यश्च वेदिता चासि ध्याता ध्येयश्च यत् परम ॥

अनेजत्—एज by itself is generally Par in Vedic literature though उप एज् is used as Ātm In the Nighantu एजति is mentioned in the list of गतिकर्मन roots But एज् has become exclusively Ātm in classical Sanskrit

मनसो जवीय —The idea is common from RV downwards Cf यो वामश्विना मनसो जवीयान् RV i 117 2 यो मर्तास्य मनसो जवीयान् Ib i 118 1 यस्ते रथो मनसो जवीयान् x 112 2 मनसोऽप्याशुतर यत Kirat xiv 22 सह दूरतर तु चिन्तया Ib xiv 27[*] (Cf also COWPER How fleet is a glance of the mind!)

---

[1] वायुर्वै गौतम तत् सूत्रम् । वायुना वै गौतम सूत्रेणायं च लोक परश्च लोक सर्वाणि च भूतानि सन्दृब्धानि भवन्ति । ' BU iii 7 2

[2] ' एष सेतुर्विधरण एषां लोकानामसम्भेदाय । ' BU iv 4 22

[*] In several other passages also Bharavi uses Vedic imagery, thus अथ दीर्घतमं तम प्रवेक्ष्यन् xiii 30 is reminiscent of दीर्घं तम आशयिन्द्र x 124 1 etc

[3] आशयदिन्द्रशत्रु RV i 32 10 ...

अर्षत्—pres. part. neut. of ऋष् to flow, to run. Skt. ऋषभ, Av., O. P. *aršan* man, Gk. *arsēn*- male, etc., are all derived from this root. VS. reads अर्षत्.

तिष्ठत्—standing from स्था to stand. The original form of the root was **stā*, Lat. *stāre*, Gk. *histēmi* (=तिष्ठामि).

धावतोऽन्यानत्येति तिष्ठत्—*cf.* आसीनो दूरं व्रजति शयानो याति सर्वतः; Katha U. i. 2. 21.

अपः—Acc. sing. of *ápas* (Lat. *opus*) work. The Acc. pl. of *áp* [Av. *ap*] water is accented on the second syllable acc. to ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः; 6. 1. 171. As the word is accented on the second syllable in the *Vājasaneyi Saṁhitā* the meaning is waters.

Kūranārāyaṇa explains in his *Prakāśikā*: 'तस्मिन्' सर्वाधारेऽवस्थिते; 'मातरिश्वा' वायुः। 'अपः' इत्युपलक्षणम्, पयोधरवहनचलनतारकादिकं बिभर्तीत्यर्थः। सर्वाधारभूतेन सर्वेश्वरेण बिभ्रतो वायुरप्यनेनैव बिभर्तीत्यभिप्रायः। 'एष सेतुर्विधरण एषां लोकानामसम्भेदाय' [बृ० आ० ४।४।२२]। 'द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः। वासुदेवस्य वीर्येण विधृतानि महात्मनः॥' इत्यादिषु प्रसिद्धमेतत्।

मातरिश्वा—मातरिश्वा यदमिमीत मातरि RV. iii. 29. 11 अयं वै वायुर्मातरिश्वा योऽयं पवते SB. vi. 4. 3. 4; मातरिश्वा वायुः। मातर्यन्तरिक्षे श्वसिति। मातर्याश्वनितीति वा। Nir. vii. 26.

टु ओ श्वि मातरिपूर्वः। सप्तम्या अलुक्। Uj. on Uṇ. i. 158 (p. 387). 'He who grows in his mother,' accent after the analogy of *prātaritvan* (*Vedic Grammar* p. 75, f.n. 11). Acc. to some मातृ is also a name of wood in I.E. and मातरिश्वन् means 'the foetus of the wood' as fire is produced from fuel. See also JAOS. xxxii, p. 392.

5

तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥

"It moves. It moves not. It is far and (उ) It is near. It is within all this, and (उ) It is outside of all this." (HUME)

'न मन्त्राणां जामिता'[1] ऽस्ति' इति पूर्वमन्त्रोक्तमप्यर्थं पुनराह —तदेजतीति। तत् आत्मतत्त्वं यत् प्रकृतं तत् एजति चलति तत् एव च नैजति स्वतो नैव चलति स्वतोऽचलमेव सचलतीवेत्यर्थः। किं च तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद्दूर इव। तत् उ अन्तिके इति छेदः। तदन्तिके समीपेऽत्यन्तमेव, विदुषामात्मत्वात्*। न केवलं दूरे अन्तिके च तत् अन्तः अभ्यन्तरे अस्य सर्वस्य

---

[1] जामिता—पौनरुक्त्यम्। 'जाम्यतिरेकनाम'—*Nir* iv 20 पुनरुक्तनामेत्यर्थं—Durga तद् यत् समान्यामृचि समानाभिव्याहारं भवति, तज्जामि भवतीत्येकम्—'मधुमन्तं मधुयुतम्' इति यथा। यदेव समाने पादे समानाभिव्याहारं भवति तज्जामि भवतीत्यपरम्—'हिरण्यरूप स हिरण्यसंदृक्' इति यथा। यथा कथा च विशेषोऽजामि भवतीत्यपरम्—'मण्डूका इवोदकान्मण्डूका उदकादिव' इति यथा। *Nir* x 16

Ānandagiri explains जामिता [illegible] आलस्यम् Rāmacandra in his ईशावास्यरहस्यविवृति says the same thing जामितालस्यम्। रहस्यं हृद्गतं विदो नायातीत्यनलसा श्रुतिः सकृदुक्तमपि पुनः पुनरुपदिशतीति। Under AB xv 3 जामि वा एतद् यज्ञे क्रियते यत्र समानीभ्यामृग्भ्यां समानेऽहन् यजतीति ('There is tediousness in the sacrifice when on the same day he uses the same verses as offering verses'—KEITH) S says जामि वै आलस्यमेव क्रियते सम्पाद्यते। प्रयुक्तयोरेवर्चोः पुनः प्रयोगस्य चर्वितचर्वणसदृशत्वात्। S is here following Ṣaḍguruśiṣya who says जामि अपटुता आलस्यम् Under TS i 5 9 7 ii 6 6 4 and vii 12 2 3 also S says आलस्यम् *Cf* also KS जामि तु तदा योऽस्य पूर्वोऽधिपतिमपरं करोति। xi 2 यदेन्द्रं वै सह कुर्याज्जामि स्यात्। न पुनरुक्तं महान् न मन्त्राणां जामितास्ति—*Cf* Sabara on M S iv 2 18 न पुनरुक्तं महान् दोषः। बहुकृत्वोऽपि पथ्यं वेदितव्यं भवति। *Cf* also *Nir* x 42 अभ्यासे भूयांसमर्थं मन्यन्ते

* Could the correct reading have been विदुषामात्मत्वात् or विदुषाम् प्राप्यत्वात्? In the previous sentence Ācāryapāda says वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद् दूरे, it is therefore reasonable to suppose that we have the exact opposite to that statement here But in the first place we have nothing corresponding to वर्षकोटिशतैरपि here Secondly commentators who follow S have आत्मत्वात् Thus Mah says तद् दूरे अविदुषामब्दकोट्याऽप्यप्राप्यत्वाद् दूरे वर्तते। तत् उ तदेव अन्तिके समीपे। विदुषामात्मत्वेन आसन्नत्वात्। Rāmacandra says यद्वा अन्तिके समीपे। विदुषामात्मत्वेन आसन्नत्वात्। आत्मत्वेन अविदुषां वर्षकोटिभिरप्यप्राप्यत्वाद् दूर इव स्थितम्। आत्मत्वादन्तिके तु समीप एव आत्मत्वेन सुप्रापत्वात् सुप्रापम्।

'य आत्मा सर्वान्तरः' [बृ° आ° ३।४।१] इति श्रुतेः। अस्य सर्वस्य* जगतो नामरूपक्रियात्मकस्य। तत् उ अपि सर्वस्यास्य बाह्यतः व्यापकत्वादाकाशवत्, निरतिशयसूक्ष्मत्वाद् अन्तः, 'प्रज्ञानघन एव' [बृ° उ° ४।५।१३] इति च शासनान्निरन्तरं च ॥५॥

Cf Gita xiii 15 बहिरन्तश्च भूतानामचरं चरमेव च। सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥

तद्दूरे तद्वन्तिके—*Cf* SB x 5 2 17 अन्तिके च दूरे चेति च ब्रूयात्। *Mundaka*, iii 7 दूरात् सुदूरे तदिहान्तिके च।

अन्त—अन्तर generally governs the Loc, *e g*, कदा न्वन्तर्वरुणे भुवानि RV vii 86 2, योऽयं पुरुषेऽन्तः प्रविष्टः BU v 9 1, अन्तराक्षिणि CU i 6 6, etc For the use of the Gen with अन्त *cf* यदपूर्वं यक्षमन्तः प्रजानाम् VS xxxiv 2, अन्तश्चरति भूतानां सर्वेषां किल साक्षि Rām i 84 18, बहिरन्तश्च भूतानाम् *Gitā*, xiii 15

बाह्यत—बाह्य is generally used with the Abl बाह्यतः though not directly coming under the rule षष्ठ्यतसर्थप्रत्ययेन is used with the Gen after the analogy of other words ending in तस् like दक्षिणतः, उत्तरतः, etc

6

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते† ॥६॥

Now he who sees all creatures in the self and the self in all creatures, [nobody] shrinks away from him or, does not shrink away from Him (Self)

यः परिव्राट् मुमुक्षुः सर्वाणि भूतानि अव्यक्तादीनि स्थावरान्तानि आत्मनि एव अनुपश्यति आत्मव्यतिरिक्तानि न पश्यतीत्यर्थः। सर्वभूतेषु च तेष्वेव च

---

* जगतो नामरूपक्रियात्मकस्य could easily have been placed after अस्य सर्वस्य in the previous line अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य would therefore appear to have crept into the text from a gloss.

† VS (Mādhyandina recension) reads विचिकित्सति

आत्मानं तेषामपि भूतानां स्वमात्मानमात्मत्वेन। यथाऽस्य देहस्य कार्यकारणसङ्घातस्यात्माऽहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता[1] केवलो निर्गुणः, अनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवात्मेति सर्वभूतेषु चात्मानं निर्विशेषं यस्त्वनुपश्यति। स तत तस्मादेव दर्शनात् न विजुगुप्सते विजुगुप्सां घृणां न करोति। प्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणा आत्मनोऽन्यद् दुष्टं पश्यतो भवति, आत्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तम् अर्थान्तरम् अस्तीति प्राप्तमेव—ततो न विजुगुप्सत इति ॥६॥

तस् in ततः appears to be the correlative of यद् but Indian commentators generally explain ततः as तस्मात् दर्शनात्.

In the next stanza तत्र refers to य, it stands to reason therefore that ततः here should refer to य also In this stanza we are told that there is a gentleness and grace about the man of personality that draws all people towards him and nobody shrinks from him

Kuranarāyana explains यच्छब्दस्य स इति प्रतिनिर्देशोऽध्याहार्यः। स उक्तविधज्ञानी। ततः तेषु। सप्तम्यर्थे तसिः। ब्रह्मात्मकतया दृष्टेषु सर्वेषु भूतेष्वित्यर्थः। न विजुगुप्सते कुतश्चिदपि न बीभत्सते। स्वात्मविभूतित्वज्ञानेन[2] क्वचिदपि निन्दां न करोतीति भावः।

Anantācārya says ततः तस्मात् दर्शनात् न विजुगुप्सते जुगुप्सां नाप्नोति [illegible] भवतीत्यर्थः। "उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे" [अमर]। गुप धातोः "गुप्तिज्किद्भ्यः सन्" [३।१।५] इति स्वार्थे सन् प्रत्ययः। "यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥" [गी० ६।३०] इति भगवद्वचनसमानार्थकमन्त्रोऽयम्।

7

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥

---

1 Cf साक्षी चेता केवलो निर्गुणश्च (श्वेताश्वतर० ६।११)।

2 स्वात्मनि सर्वभूतानां [illegible] निन्दां [illegible] —इति [illegible] पाठः [illegible]।

"In whom all beings have become just the Self of the discerner —then what delusion, what sorrow is there of him who perceives the unity!" (HUME)

इममेवार्थमन्योऽपि मन्त्र आह—यस्मिन् सर्वाणि भूतानि । यस्मिन् काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनाद् आत्मैवाभूत् आत्मैव संवृत्तः परमार्थवस्तु विजानतः, तत्र तस्मिन् काले तत्रात्मनि वा को मोहः कः शोकः ? शोकश्च मोहश्च कामकर्मबीजम् अजानतो भवति[1] न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः । को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेणासम्भवप्रदर्शनात् सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥७॥

8

स पर्यगाच्छुक्रमकायमव्रण-
मस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भू-
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

He has attained unto the bright, the bodiless, the scatheless, the sinewless, the pure, the un pierced of evil Wise, intelligent encompassing, self existent, he has distributed objects as propriety demands through the eternal years

सोऽयमतीतैर्मन्त्रैरुक्त आत्मा स्वेन रूपेण किंलक्षण इत्याहायं मन्त्रः—स पर्यगादिति* । स यथोक्त आत्मा पर्यगात् परि समन्ताद् अगाद् गतवान् आकाशा-

[1] निरतिशयानन्दस्वरूपम् [illegible] एव दुःखात्मकम् आत्मानम् अजानतः शोको भवति—'[illegible] न मे पुत्रोऽस्ति न मे धनम्' इति । तत्र पुत्रादीन् कामयते, तदर्थं [illegible] विकीर्यते, न तु आत्मैकत्वं पश्यतः । The Acarya is thinking of BU I 4 17 सोऽकामयत जाया मे स्यादथ प्रजायेय, वित्तं मे स्यादथ कर्म कुर्वीय ।

* Printed editions read मन्त्रः । स पर्यगात् स यथोक्त आत्मा etc

वद्नापीत्यर्थः। शुक्रं शुद्धं ज्योतिष्मत्* दीप्तिमानित्यर्थः। अकायम् अशरीरं लिङ्ग-शरीरवर्जित इत्यर्थः। अव्रणम् अक्षतम्। अस्नाविरम् स्नावाः[1] शिरा यस्मिन्† न विद्यन्त इत्यस्नाविरम्। अव्रणमस्नाविरमित्येताभ्यां‡ स्थूलशरीरप्रतिषेधः। शुद्धं निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः। अपापविद्धं[2] धर्माधर्मादिपाप-वर्जितम्। शुक्रमित्यादीनि वचांसि पुंलिङ्गत्वेन परिणेयानि, 'स पर्यगात्' इत्युपक्रम्य 'कविर्मनीषी' इत्यादिना पुंलिङ्गत्वेनोपसंहारात्। कविः क्रान्तदर्शी सर्वदृक्, 'नान्योऽतोऽस्ति द्रष्टा' [बृ आ° ३।७।२३] इत्यादिश्रुतेः। मनीषी मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः। परिभूः सर्वेषां परि उपरि भवतीति परिभूः। स्वयम्भूः स्वयमेव भवतीति, येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयम्भूः§। स नित्यमुक्त ईश्वरो याथातथ्यत सर्वज्ञत्वाद् यथातथाभावो याथातथ्यं[3] तस्माद् यथाभूतकर्मफलसाधनतः अर्थान् कर्तव्यपदार्थान् व्यदधात् विहितवान् यथानुरूपं व्यभजदित्यर्थः। शाश्वतीभ्यः नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः ॥८॥

---

* With the exception of दीप्तिमान् and लिङ्गशरीरवर्जित the synonyms are all neuter So we should read ज्योतिष्मत् and लिङ्गशरीरवर्जितम् as Ānandabhatta actually does

[1] स्नावन् n , m is the more usual word acc to सामदिभ्यो मनिन् [illegible] Uṇādi iv 112 Saṅkarānanda says स्नावानि सिरा .

† यस्मिन् would appear to be the better reading

‡ °भ्याम्—all except V.

[2] Cf. Rāmacandra पुण्यमपि पुनरावृत्तिहेतुत्वात् पापमेव, तेन [illegible] [illegible] अविद्धम् असम्बद्धम्। [illegible] [illegible] कर्मणा भूयात्, नो [illegible] कर्मणा [illegible] [illegible] [illegible] [illegible] [गीता ४।१४] इति ३।३।२२] इति श्रुतेः, नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः [गीता ५।१५] इति भगवद्वचनाच्च. Uvata and Mah explain लिङ्गशरीररहितमित्युक्तम्

§ So also Ānandabhatta and Mahidhara Rāmacandra reads [illegible] स्वयमेव भवति, न तु [illegible] । [illegible] [illegible] [illegible] [illegible] स्वयमेव भवतीति [illegible] ।

[3] Mahābhāṣya 7. 3. 31

"One more quotation (but hardly interpolation) seems to be stanza 8, where the omission of one word (याथातथ्यत) and the reading व्यधात् (cf पर्यगात्) for the ill suited imperfect व्यदधात् would heal the metre though merely as to the number of syllables" Schrader

Commentators generally follow Sankarācarya and resort to लिङ्गव्यत्यय in the case of the neuters शुक्रम्, etc This would appear to be hardly necessary स can easily refer to the person spoken of in the previous stanzas and अकायमव्रणम् etc to ब्रह्म Cf सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। सम्पश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति॥ Thus Uvata says य एवमात्मानम् उपास्ते स पर्यगात् परिगच्छति शुक्रं शुक्रं विज्ञानानन्दस्वभावम् ब्रह्मभूत ब्रह्म प्रतिपद्यते। अथात्मोपासकस्य फलमाह—यस्य कवि क्रान्तदर्शन etc Similarly the *Prakāsika* says य सर्वभूतान्यात्मत्वेन पश्यति स पर्यगात् प्राप्नुयात् इत्यर्थः। ब्रह्मविदाप्नोति परम् [तै० उ० २।१।१] इति श्रुतेः। शुक्रम् ज्योतिः स्वप्रकाशमित्यर्थः। स्थूलशरीरकल्पनमपि कर्मकृतदेहशरीररहितमित्यर्थः। "न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसम्भवा" इति देहशरीरस्यैवान्यत्र प्रतिषेधदर्शनात्। न तु दिव्यमङ्गलविग्रहरहितमित्यर्थः। "यत्ते रूपं कल्याणतमं तत्ते पश्यामि" [ईशा १६] इत्यादौ दिव्यमङ्गलविग्रहस्य विधेयत्वात्। एवमर्हेयदेहमस्तीक परमात्मानं स विद्वान् पर्यगात् इति पूर्वेण सम्बन्धः। एवंरूप परमात्मा प्राप्य प्रापक उपासकस्य यस्य स ब्रह्मविद् विशिनष्टि—कवि, etc

¹ Kathaka U v 8 which is evidently the source of our passage runs य एष सुप्तेषु जागर्ति कामं कामं [पुरुषो] निर्मिमाणः तदेव शुक्रं तद्ब्रह्म etc Here we have the neuter noun शुक्र, here we have the masc corresponding with the neut (स तद्), and here we have the correspondence with व्यधात् व्यदधात् I therefore regard याथातथ्यतोऽर्थान् as corrupted (through a gloss) from यथार्थान् because the omission of the relative pronoun is utterly improbable here and construe स कविर्मनीषी व्यधात् (for व्यदधात्) (तत्) शुक्रम् अकायम् यथार्थान् स यथार्थान् पर्यगात् i e, He has reached the bodiless Essence [or Light] which is also the Sage who has allotted

"Instead of the neuter we could of course have masculines by regarding शुक्रम् as an adjective and supplying तम् (or ईश्वरम् or

परमात्मानम्) instead of तत् But the series of epithets used here is of the kind found generally with the neut ब्रह्म or अक्षर only and the Upanisads distinguish between शुक्र which is a noun and शुक्र which is an adj " Schrader, pp 206 7

अस्नाविरम्—The possessive suffix इर (र with the connecting vowel इ) has been added to स्नावन् This suffix is confined to Vedic literature and Kātyāyana has the Vārttika मेधारथाभ्यामिरन्निरचौ ५।२।१०९ to explain मेधिर and रथिर Its later form is इल which is found in जटिल, सिकतिल, पिच्छिल, etc This इल became इल्ल in Prakrit because of strong stress accent on the final syllable

कविर्मनीषी—"This is a clear distinction in Vedic thought between *kavi* the seer and *manisin* the thinker The former indicates the divine supra intellectual Knowledge which by direct vision and illumination sees the reality the principles and the forms of things in their true relations, the latter the labouring mentality which works from the divided consciousness through the possibilities of things downward to the actual manifestation in form and upward to their reality in the self existent Brahman " GHOSE

मनीषी—formed with possessive suffix इन् from मनीषा which is formed from मन् with the agent suffix ष and the connecting vowel ई Cf ऋजीष rushing, पुरीष rubbish

परिभू —See p 81 Note that परि has got nothing to do with उपरि even as पर has got nothing to do with अपर Because of the stress accent in Bengali उपरि often becomes परि just as उपाड़ has become फाड and अभ्यन्तरे भितरे

शाश्वतीभ्य समाभ्य—Temporal Dative V G S , p 311, 3 Cf संवत्सराय समममत MS, ii 1 2 for a year an allowance is made Cf. [illegible] forthwith, चिराय—for अदराय—for the future, अह्ने—for the day [illegible] long चिररात्राय—for the long night etc Rāmacandra says शाश्वतीभ्य समाभ्य इति तादर्थ्ये चतुर्थी। अनवरतं[illegible]

9

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥९॥

BU. iv. 4 10

Into blinding darkness enter they who worship ignorance. Into darkness greater than that, as it were, they that find pleasure in knowledge

अनाद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता—प्रथमो वेदार्थः 'ईशा वास्यमिदं सर्वं' मा गृधः कस्य स्विद्धनम्' [१] इति । अज्ञानां जिजीविषूणां ज्ञाननिष्ठाऽसम्भवे 'कुर्वन्नेवेह कर्माणि जिजीविषेत्' [२] इति कर्मनिष्ठोक्ता—द्वितीयो वेदार्थः । अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि [१।४।१७] प्रदर्शितः—'सोऽकामयत - जाया मे स्यात्' इत्यादिनाज्ञस्य कामिनः कर्माणीति । 'मन एवास्यात्मा वाग् जाया' [१।४।१७] इत्यादिवचनादज्ञत्वं कामित्वं [redacted] कर्मनिष्ठस्य निश्चितमवगम्यते । तथा च तत्फलं सप्तान्नसर्गः[1] तेष्वात्मभावेनात्मस्वरूपावस्थानम् । जायाद्येषणात्रयसंन्यासेन चात्मविदां कर्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता 'किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः' [बृ° आ° ४।४।२२] इत्यादिना । ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्यः 'असुर्या नाम ते' इत्यादिनाऽविद्वन्निन्दाद्वारेणात्मनो याथात्म्यं 'स पर्यगात्' इत्येतदन्तैर्मन्त्रैरुपदिष्टम् । ते ह्यत्राधिकृता न कामिन इति । तथा च श्वेताश्वतराणां मन्त्रोपनिषदि 'अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम्' [६।२१] इत्यादि विभज्योक्तम् । ये तु कामिनः* कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते—'अन्धं तमः' इत्यादि । कथं पुनरेवमवगम्यते—न

[1] सप्तान्नानि मेधया तपसाजनयत् पिता BU. i. 5. 1 is evidently refers to सप्त and is to be justified acc. to Vāmana's dictum सर्वेनाम्नः संज्ञायाम् । (Kāvyālaṁkārasūtra v. 1. 11. See COJ, Vol I, No. 6.)

* कामिनः—All except V.

तु [1]सर्वेषामिति ? उच्यते—अकामिनः साध्यसाधनभेदोपमर्देन 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥' [७] इति यदात्मैकत्वविज्ञानं तन्न केनचित् कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति। इह तु समुच्चिचीषयाऽविद्वदादिनिन्दा क्रियते। तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते। तद्दैवं* वित्तं[2] देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानम्, 'विद्यया देवलोकः' [बृ० आ० १।५।१६] इति पृथक्फलश्रवणात्। तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया, न निन्दापरैव, एकैकस्य पृथक्फलश्रवणात्—'विद्यया तदारोहन्ति' [श० ब्रा० १०।५।४।१६], 'विद्यया देवलोकः', 'न तत्र दक्षिणा यन्ति' [श० ब्रा० १०।५।४।१६], 'कर्मणा पितृलोकः' [बृ० आ० १।५।१६] इति। न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात्। तत्र अन्धं तमः अदर्शनात्मकं तमः प्रविशन्ति। के ? ये अविद्यां विद्याया [3]अन्याऽविद्या, † कर्मेत्यर्थः कर्मणो विद्याविरोधित्वात्। तामविद्यामग्निहोत्रादिलक्षणामेव केवलाम् उपासते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः। ततः तस्मादन्धात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति। के ? कर्म हित्वा ये च ये तु विद्यायाम् एव देवताज्ञान एव रताः अभिरताः[4] ॥९॥

प्रकाशिका। एवं विचित्रशक्तिक-परमात्मविषयां कर्मयोगाद्यङ्गिकां विद्यामुपदिश्यानन्तरं त्रिभिर्मन्त्रैः केवलकर्मावलम्बिनः केवलविद्यावलम्बिनश्च पुरुषान् विनिन्दन् वर्णाश्रमधर्मानुगृहीतया विद्ययैव निःश्रेयसावाप्तिमाह—अन्धमिति।

---

1 सर्वेभ्यः was expected because of तेभ्यः in the previous line

* यद्दैवम्—All except V

2 चक्षुर्मानुषं वित्त श्रोत्रं दैवम् BU. 1. 4. 17

3 Acc. to the Kārikā तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञोऽर्थाः षट् प्रकीर्तिताः॥ विरोध also is one of the senses of नञ्. So we can easily say विद्याविरोधिनी अविद्या just as we say असुराः सुरविरोधिनः.

† तां कर्मेत्यर्थः—All except V.

4 विद्यायाम् अविद्यावस्तुप्रतिपादिकायां कर्मार्थायां श्रुत्यामेव विद्यायां रता अभिरताः। विधिप्रतिषेधपर एव वेदो नान्योऽस्ती—[illegible]: । BUS.

बृहदारण्यके [४।४।१०] चायं मन्त्रः पठितः। ये भोगैश्वर्यप्रसक्ता अविद्यां विद्यातोऽन्याम्, क्रियाम्, केवलं कर्मेत्यर्थः। विद्याविधुरं कर्मेति यावत्। .. उपासते अनुतिष्ठन्ति, अन्धं तमः अतिगाढं तमः, अज्ञानमित्यर्थः। त्रिवर्गाभिसङ्गान्तरीयं नरकमन्धं तमो वा।

प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म।

एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति॥ [मुण्डक १।२।७]

इति श्रुतेः। य उ विद्यायां रताः। उकार उत्तरपदेनान्वेतव्यः। स्वाधिकारोचितकर्मपरित्यागेन विद्यायामेव रताः। ते ततः कर्ममात्रनिष्ठाः प्राप्यादन्धतमसाद् भूय इव तमः तदधिकम् अज्ञानं प्रविशन्ति। इवशब्दस्तमस इयत्ताया दुर्ग्रहत्वं द्योतयति।

विद्या and अविद्या—As has been pointed out by many commentators the whole philosophy of the *Īśopaniṣad* is contained in the first two stanzas dealing with ज्ञान and कर्म. विद्या, therefore, can only mean knowledge proper or ज्ञान and अविद्या the reverse of knowledge, *i.e.*, कर्म. What our author wants to emphasize is that neither virtue (sacrifices, etc.) alone nor knowledge alone is enough for the attainment of salvation, a harmonious combination of the two like the two wheels of a cart or the two wings of a dove can alone lead us to our goal. And mere knowledge without the performance of pious acts is the worse of the two, because the man possessed of such knowledge shirks his duty in this world (कर्मभूमि).

Our explanation has the support of the *Manusaṃhitā* which substitutes तपः for अविद्या in xii. 104:—

तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्बिषं हन्ति विद्ययामृतमश्नुते॥

which corresponds exactly with *Īśā* 11:

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते॥

By Avidya one may attain to a sort of fullness of power joy world knowledge, largeness of being which is that of the Titans or of the Gods of Indra of Prajapati This is gained in the path of self enlargement by an ample acceptance of the multiplicity in all its possibilities and a constant enrichment of the individual by all the materials that the universe can pour into him GHOSE

The usual senses of Vidya and Avidya are thus explained by Schrader

Kathaka Up speaks of *vidya* and *avidya* as widely different (दूरमेते विपरीते विषूची ii 4) and understands by *vidya* that wisdom (प्रज्ञान ii 24) i e *atmavidya* which cannot be gained by तर्क (ii 9) प्रवचन मेधा and बहुश्रुत (ii 23) and it calls अविद्या the ignorance (ii 9) of the sensualist (ii 4 वित्तमोहेन मूढम् ii 6 the कामकामिन् of Bhag Gita ii 70) who prefers enjoyment to spiritual welfare (प्रेय to श्रेय ii 2) and the mock wisdom of philosophical materialism (ii 5 6) So also Maitr Up (viii 9) calls *avidya* or false learning the doctrine imparted to the Asuras by Brhaspati (Sukra) Mundaka Up understands by *avidya* (i 2 8 9) the *apara vidya* of the Karmakanda (i 1 4 5) speaks with contempt of the pious Vaidikas (i 2 1 10 source of Bhag Gita ii 42 ff) and denies brahmaloka to be accessible through karman (नास्त्यकृत कृतेन i 2 12)—which seems to be the very attitude declined in Iśa Up 2 Vidyā appears in Mundaka Up as सम्यग्ज्ञान (iii 1 5) In Kena Up also *vidya* is आत्मविद्या (12) and this higher wisdom is expressly stated to be different from empirical knowledge (3 and 11)

10

अन्यदेवाहुर्विद्यया अन्यदेवाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥

Different (is the means for the attainment of salvation) from knowledge they say and different they say from ignorance This we have heard from the wise who revealed it to us

तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह—अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितैव[1] स्यादिति*—अन्यदेवेत्यादि। अन्यत् पृथग् एव विद्यया क्रियते फलम् इति आहुः वदन्ति। 'विद्यया देवलोकः' [बृ° आ° १।५।१६] 'विद्यया तदारोहन्ति'† [श° ब्रा° १०।५।४।१६] इति श्रुतेः। अन्यत् आहुः अविद्यया कर्मणा क्रियते 'कर्मणा पितृलोकः' [बृ° आ° १।५।१६] इति श्रुतेः। इति एवं शुश्रुम श्रुतवन्तो वयं धीराणाम् धीमतां वचनम्। ये आचार्या नः अस्मभ्यं तत् कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तः, तेषामयमागमः पारम्पर्यागत इत्यर्थः ॥१०॥

प्रकाशिका। किं तर्हि मोक्षसाधनम् इत्यत आह—अन्यदेवेति। विद्ययेति पञ्चम्यर्थे तृतीया, यथाश्रुतेऽन्यशब्दानन्वयात्, 'अन्यदेवाहुः सम्भवात्' [१३] इति वक्ष्यमाणानुरोधाच्च। तथा च विद्यायाः कर्मरहितविद्यातोऽन्यन्मोक्षसाधनमित्याहुः। उपनिषद इति शेषः। अविद्यया अविद्यायाः। ब्रह्मविद्याविधुरकर्मणोऽन्यदेव मोक्षसाधनमित्याहुः। एवं पूर्वसम्प्रदायसिद्धोऽयमर्थोऽस्माकम् इत्याह—इति शुश्रुमेति। ये पूर्वाचार्यास्ते प्रणिपातादिभिः सम्यगुपसन्नानाम् अस्माकं तन्मोक्षसाधनं विचचक्षिरे विविच्योपदिदिशुः। तेषां धीराणां धीमतां परमात्मध्यानपराणां वचनमित्यध्याहार्यम्। यद्वा धीराणामिति पञ्चम्यर्थे षष्ठी। तेभ्यो धीरेभ्य इति योज्यम्, नटस्य शृणोतीतिवत्[2]। इति शुश्रुम एवम्प्रकारम्

---

[1] फलवत्सन्निधावफलं तदङ्गम् Bhāṣya on M. S. iv. 4. 19 and B. S. ii. 1. 14.

* Ānandabhaṭṭa. °रङ्गाङ्गितया आमितेव स्यात्—V. °रङ्गाङ्गितैव स्यादित्यर्थः—A.

† विद्यया तदारोहन्ति यत्र कामाः परागताः।
न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः॥

यत्र स्वरूपे कामाः सर्वे परागताः ब्रह्मकामित्यर्थः। तदात्मस्वरूपं विद्यया ज्ञानेन आरोहन्ति प्राप्नुवन्ति। अविद्वांसः पुरुषाः तत्स्वरूपं दक्षिणा। तृतीयाया लुक्। दक्षिणाभिः। न यन्ति न गच्छन्ति। तथा तपस्विनः अपि अविद्वांसश्चेत् न गच्छन्ति। Sāyaṇa.

[2] The analogy hardly holds good here, for in नटस्य शृणोति there is no उपयोग (Pā. 1. 4. 29) whereas in the case of listening to the discourse of wise men there is नियमपूर्वक विद्याग्रहण, the नियम consisting in प्रणिपात, परिप्रश्न and सेवा mentioned in Gītā iv. 34.

अश्रौषम् । ननु परोक्ष एवार्थे लिड्विधानात् 'शुश्रुमे'त्युत्तमपुरुषो न घटत इति चेत्, सत्यम् । ब्रह्मविद्याया दुरवगाहत्वेन लिड्प्रयोगग्रहणमस्माभिर्न कृतमित्यभिप्रायकत्वादुत्तमपुरुषप्रयोगस्येत्याहु" ।

In the Kanva recension of VS this is the thirteenth stanza the tenth stanza reading सम्भवात् for विद्यया and असम्भवात् for अविद्यया The thirteenth stanza shows the normal Abl forms विद्याया and अविद्याया

विद्यया—Like श्रद्धा मेध etc in class Skt विद्या is found in AV and TS only as the final member of the compound ज्ञातविद्या It gradually appeared as an independent word like श्रद्धा in Bengali VS shows that the Instr stands for the Abl *Cf* Kena U 3 अन्यदेव तद्विदितादथो अविदितादधि । इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे ॥

As Kuranarayana pertinently points out विद्यया and अविद्यया here correspond to सम्भवात् and असम्भवात् in st 13 and the Instr for the Abl is analogous to the Instr of comparison as in कौऽन्यो धन्यतरो मया so common in the epics and Puranas In Buddhist Sanskrit and Pali अन्यत्र governs the Instr

धीराणाम्—See p 42 धीरा विचक्षिण 8 under Mundaka ii 8 The Abl was expected acc to आख्यातोपयोगे 'धीराणां वाक्यमिति शेष । अथवा प्रसिद्धत्वाद् वाक्यमिति कर्मणोऽप्रयोगे आख्यातोपयोगे इत्यपादानस्याविवक्षया षष्ठी । धीरेभ्य इत्यर्थ ।" Ramacandra

न —Dat *Cf* तन्नो विश्वे सवितासवं x 14 8 पूर्वे पूर्वेभ्यो वच एतदूचु TB iii 12 9 2, V G S p 810 c

विचचक्षिरे—This is certainly the older form and is found in VS. Some read व्याचचक्षिरे which is found in *Kena U* 3 इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे, BU iii 4 1 य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व, etc , etc

11

विद्या चाविद्यां च यस्तद्वेदोभय सह ।
अविद्यया मृत्यु तीर्त्वा विद्ययामृतमश्नुते ॥११॥

He who knows both knowledge and ignorance together crosses death by ignorance and attains to immortality by knowledge.

यत एवम् अतो विद्या च अविद्या च देवताज्ञान च कर्म चेत्यर्थ । य' तत् एतत् उभय सह एकेन पुरुषेणानुष्ठेय वेद तस्यैव समुच्चयकारिण

एवैकपुरुषार्थसम्बन्धः* क्रमेण स्यात् इत्युच्यते—अविद्यया कर्मणाग्निहोत्रादिना मृत्युम्, स्वाभाविक कर्म ज्ञानं च मृत्युशब्दवाच्यम्, तदुभय† तीर्त्वा अतिक्रम्य, विद्यया देवताज्ञानेन अमृतं देवतात्मभावम् अश्नुते आप्नोति। तद्ध्यमृतमुच्यते यद्देवतात्मगमनम् ॥११॥

Kūranarāyana refers to a stanza of the Viṣnu Purāṇa in this connexion Long long ago there were two kings—Khāndikya Janaka a follower of the कर्ममार्ग, and Keśidhvaja, a follower of the ज्ञानमार्ग. Khāndikya was attacked and defeated by Keśidhvaja and had to leave his kingdom and reside in the forest Then Keśidhvaja though resorting to the path of knowledge performed a large number of sacrifices with a view to crossing death by means of avidya (इयाज सोऽपि सुबहून् ज्ञानमार्गव्यपाश्रयः। ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ॥) Once by a curious irony of fate he had to approach Khāndikya on a point of Prayaścitta, which was performed according to his advice When Keśidhvaja offered गुरुदक्षिणा to Khāndikya, he wanted true knowledge from him. Thus both became adepts in both margas and attained salvation

A very good edition of the *Īśopaniṣad* is that published with the *Prakāśikā* of Kuranārayana by the Oriental Book Agency, Poona The Ānandaśrama edition contains a number of valuable commentaries Hume's *Thirteen Principal Upanishads* (*Oxford University Press*, 2nd edition) is invaluable to students The advanced student may read with advantage Schrader's "Critical Study of Īśopaniṣad" (*Indian Antiquary*, 1933, pp 205 212) as also the section on the *Īśopaniṣad* (pp 168 174) in Belvalkar and Ranade's *History of Indian Philosophy*, Vol II

After the analogy of Kena, Kaṭha, etc, which end in *a*, our Upaniṣad is often called Īśa, even as in Bengali the Sundarakāṇḍa and Uttarakanda of the *Rāmāyana* are known as Sundarā Kāṇḍa and Uttarā Kāṇḍa after the analogy of Ayodhyākāṇḍa, Kiṣkindhyā kāṇḍa, etc.

---

* एवैकपुरुषार्थसम्बन्धम्—I.

† उभयम्—all except V.

श्वेताश्वतरोपनिषत्

तृतीयोऽध्यायः

Introductory Note

"According to its own statement, the *Svetaśvatara Upanisad* derives its name from an individual author,* and the tradition which attributes it to one of the schools of the *Black Yajurveda* hardly seems to have a sufficient foundation Its confused arrangement, the irregularities and arbitrary changes of its metres, the number of interpolated quotations which it contains, make the assumption likely that the work in its present form is not the work of a single author In its present form it is certainly later than the *Kathaka* since it contains several passages which must be referred to that work, besides many stanzas borrowed from it with or without variation Its lateness is further indicated by the developed theory of Yoga which it contains, besides the more or less definite form in which it exhibits various Vedanta doctrines either unknown to or only foreshadowed in the earlier Upanisads Among those may be mentioned the destruction of the world by Brahma at the end of a cosmic age (*kalpa*) as well as its periodic renewal out of Brahma, and especially the explanation of the world as an illusion (*maya*) produced by Brahma At the same time the author shows a strange predilection for the personified forms of Brahma as Savitr, Iśana, or Rudra Though Siva has not yet

---

* तपःप्रभावाद्देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।
अत्याश्रमिभ्य परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम् ॥ VI 21

become the name of Rudra, its frequent use as an adjective connected with the latter shows that it is in course of becoming fixed as the proper name of the highest god In this Upaniṣad we meet with a number of terms and fundamental notions of the Samkhya, though the point of view is thoroughly Vedantist; matter (*Prakṛti*), for instance, being represented as an illusion produced by Brahma" MACDONELL, *A History of Sanskrit Literature*, pp 233 4

"It [redacted] somewhat hard to determine whether the present Upanishad obtained its name from the philosopher mentioned in it, namely, Śvetaśvatara, the philosopher of the white mule, to whom we are told, the Upanishad was revealed on account of the power of his penance and the grace of the Lord (vi 21), or whether the Upanishad came to be so called after the Śveta and the Aśvatara, two branches of the Carakaśakhā of the Black Yajurveda, to which the Upanishad has been customarily assigned The Vedic mantras quoted in the second chapter of the Upanishad and elsewhere do in any case preserve the readings and the sequence of the Yajurveda, which by itself is an argument for assigning the Upanishad to that Veda The Upanishad is an excellent illustration of the eclectic tendency of its author or authors it being in fact just a conglomeration of various original and borrowed ideas which makes it a very difficult task to critically evaluate the original contribution of the Śvetaśvatara to the Upanishadic philosophy" Belvalkar and Ranade, *History of Indian Philosophy*, Vol II, p 110

